पुरं धवलमित्याहुः प्रपिता तानभट्टकः ॥ ४१ ॥
पिता जनार्दनः साक्षाज्जनार्दन इवापरः।
मातुः स्वप्रभवा नाम भावेत्युक्तं स्वपूर्वजैः ॥ ४१ ॥
विकारो मानसो भावः पदवी भट्टसंज्ञिका।
भट्टः पूज्ये स्मृतः कोशे श्रीमदमरकोशके ॥ ४३ ॥
तेनेदं भावभट्टेति कीर्तितं शास्त्रसंभवम्।
तौर्यत्रिकं तु संगीतं संगीती तज्ज्ञ उच्यते ॥ ४४ ॥
घनश्यामेनचानुष्टुप्चक्रवर्तीतिकीर्तितम्।
श्रीमत्साहिजहांभूपतिलकोद्भूतभानुना ॥ ४५ ॥
श्रीमत्साहिसुजाभूपदत्तं रायपदं ततः।
श्रीभावभट्टसंगीतरायानुष्टुप्चक्रवर्ती ॥ ४६ ॥
एवं नाममिदं जातं श्रीमदनूपविभो मम।
श्रीमत्त्रैलोक्यनाथेन प्रतिज्ञापूरिताद्य मे ॥ ४७ ॥
तदुद्भूतसुखेनैष निबंधोऽसौ कृतो मया।
गुरुपितृप्रसादेन लब्धया ज्ञानसंपदा ॥ ४८ ॥

देवेंद्ररुद्रोपेंद्रद्रुहिणमुद्राधरं रूत्याश्रयं नासत्याः श्रयंते देवेन पवित्र-
चरित्राणि मित्राणि पुरस्कृतानि न तिरस्कृतानि देवाय सेवा यातयन्त-
द्द्रास्यदुःस्वीकृतं [illegible] सुहृयति। देवादेवाधिपादिव त्रस्ताः
समस्ता[illegible] निर्दोषः कोपः पोषयति
मनीषिमनीषितं देवे च [illegible] संमुखी शेमुषी अपि च देवस्य
महीमहेंद्रस्यापि [illegible]नयनलाभस्य सहज-
न्याया लोचनमनो[illegible] करसंभूत[illegible]कोटैरमृतभृतः । संतान-
प्राग्भारिणः [illegible]जितस्य स्वयंभूसहित-
स्थितेः [illegible] । सुधर्माः सभासदः सुमनसः काव्यं
मनोज्ञमुनि[illegible] [illegible] । सुवर्लीना गंधर्वाः गुरुगुरु-
मरुन्नर्तितरंभा संभावितं सदानंदनमुद्यानं अहो वैचित्र्यम् जन-
पदाः सदा[illegible], [illegible] उपचित[illegible]विग्रहाः स महाय-
न्वानः [illegible] बहुसत्त्वाः सज्जनालंकृताः लब्ध-
संनिधाना वैदूर्य[illegible] उच्चताभृतः कुलीनाः सदान
भोगामंत्रि[illegible] सदाचाराः आतंगास्पृहणीयदानाः भुजगवलयाः । दक्ष-
मुखभुजः । भूमिभृतो [illegible] सुकेशा निष्केशाः परिजनः
कलानिधिर्न दोषाकरः दानं [illegible] किं च किंचन
वचनमुच्य[illegible]मधुला [illegible] मधुबा [illegible]
क्ष[illegible]यंतु । तथा च [illegible]
मंडिताः खंडिता[illegible] नाम [illegible]
निवारयंतु च मया [illegible] सायदेवे [illegible]
चा[illegible] इव [illegible]सादितप[illegible]हिमानो
[illegible] संध्या[illegible]नाया
[illegible] इव [illegible]स्थल-
मलयज[illegible]-
राः [illegible]नाराः । अथंदम-
दरगिरि[illegible]सरकल्लोल[illegible]विमलसूक्तिमुक्ताफलक-



लापालंकृतकंठनालाः अनेककलाविलासोपहासितसितकलकलानिचयः,
निरवद्यविद्यानद्याश्रयपयोराशयः संसारसारस्वतस्वतःप्रकाशभासमाना
समानवाग् ब्रह्मब्रह्माणः ब्राह्मणाश्चतुरुदधिमेखलाखेलदुच्छृंखलकीर्ति-
नर्तकीकाः सकलसकलाविलासभाजनभाजः सभाजना भ्राजंते ।

इतिश्रीसंगीतानूपविलासे आशीर्वादभावप्रकाशो
नाम पंचमप्रकाशः ।

---

कृतांजलिपुटो भूत्वा नमस्कृत्य द्विजोत्तमान् ।
स बहुमानमाहूयप्रस्थापितोऽसौ स्वदक्षिणे ॥ ३९ ॥
ततः पप्रच्छ तं राजा नामगोत्रकुलानिच ।
क्षणं विमृष्य तत्सर्वं ब्रूते भावः सविस्तरम् ॥ ४० ॥
कृष्णात्रगोत्रसंभूतं कुलमाभीरदेशजम् ।
पुरं धवलमित्याहुः प्रपिता तानभट्टकः ॥ ४१ ॥
पिता जनार्दनः साक्षाज्जनार्दन इवापरः ।
मातुः स्वप्नभवा नाम भावेत्युक्तं स्वपूर्वजैः ॥ ४१ ॥
विकारो मानसो भावः पदवी भट्टसंज्ञिका ।
भट्टः पूज्ये स्मृतः कोशे श्रीमदमरकोशके ॥ ४३ ॥
तेनेदं भावभट्टेति कीर्तितं शास्त्रसंभवम् ।
तौर्यत्रिकं तु संगीतं संगीती तज्ज्ञ उच्यते ॥ ४४ ॥
घनश्यामेनचानुष्टुपचक्रवर्तीतिकीर्तितम् ।
श्रीमत्साहिजहांभूपतिलकोद्भूतभानुना ॥ ४५ ॥
श्रीमत्साहिसुजाभूपदत्तं रायपदं ततः ।
श्रीभावभट्टसंगीतरायानुष्टुपचक्रवर्ती ॥ ४६ ॥
एवं नाममिदं जातं श्रीमदनूपविभो मम ।
श्रीमत्त्रैलोक्यनाथेन प्रतिज्ञापूरिताश्च मे ॥ ४७ ॥
तदुद्भूतसुखेनैष निबंधोऽसौ कृतो मया ।
गुरुपितृप्रसादेन लब्धया ज्ञानसंपदा ॥ ४८ ॥

कवींद्रान् पंडितेंद्रांश्च भूपेन्द्रांश्चतुरान् नरान् ।
गायकान् वादकान् नर्तकांस्तांस्तानुपजीव्य च ॥ ४९ ॥

इतिश्रीसंगीतानूपविलासे स्वात्मभावप्रकाशो
नाम षष्ठप्रकाशः ।

---

## अथ संगीतम्

गीतं वाद्यं नर्तनं च त्रयं संगीतमुच्यते ॥
गीतं नादात्मकं वाद्यं नादव्यक्त्या प्रशस्यते ।
तद्द्वयानुगतं नृत्यं नादाधीनमतस्त्रयम् ॥
नादेन व्यज्यते वर्णः पदं वर्णात्पदाद्वचः ।
वचसो व्यवहारोऽयं नादाधीनमतो जगत् ॥
आहतोऽनाहतश्चेति द्विधा नादो निगद्यते ।
सोऽयं प्रकाशते पिंडे तस्मात्पिंडोऽभिधीयते ॥

इतिश्रीसंगीतानूपविलासे संगीतनामभावप्रकाशो
नाम सप्तमप्रकाशः ।

---

## अथ पिंडोत्पत्तिः ।

अस्ति ब्रह्म चिदानंदं स्वयं ज्योतिर्निरंजनम् ।
ईश्वरोऽलिंगमित्युक्तमद्वितीयमजं विभु ॥
निर्विकारं निराकारं सर्वेश्वरमनश्वरम् ।
सर्वशक्ति च सर्वज्ञं तदंशा जीवसंज्ञकाः ॥
अनाद्यविद्योपहिता यथाग्नेर्विस्फुलिंगकाः ।
दावाद्युपाधिसंभिन्नास्ते कर्मभिरनादिभिः ॥
सुखदुःखप्रदैः पुण्यपापरूपैर्नियंत्रिताः ।
तत्तज्जातियुतं देहमायुर्भोगं च कर्मजम् ॥



प्रतिजन्म प्रपद्यंते तेषामस्त्यपरं पुनः ।
सूक्ष्मं लिंगं शरीरं तदामोक्षादक्षयं मतम् ॥
सूक्ष्मभूतेंद्रियप्राणान्तस्थात्मकमिदं विदुः ।
जीवानामुपभोगाय जगदेतत्सृजत्यजः ॥
स आत्मा परमात्मा च विश्रांत्यै संहरत्यथ ।
तदेतत् सृष्टिसंहारं प्रवाहानादि संमतम् ॥
ते जीवा नाऽऽत्मनो भिन्ना भिन्नं वा नात्मनो जगत् ।
शक्त्या सृजन्नभिन्नोऽसौ सुवर्णं कुंडलादिवत् ॥
सृजत्यविद्ययेत्यन्ये यथा रज्जुर्भुजंगमम् ।
आत्मनः पूर्वमाकाशस्ततो वायुस्ततोऽनलः ॥
अनलाज्जलमेतस्मात् पृथिवी समजायत ।
महाभूतान्यमून्येषा विराजो ब्रह्मणस्तनुः ॥
ब्रह्म ब्रह्माणमसृजत्तस्मै वेदान् प्रदाय च ।
भौतिकं वेदशब्देभ्यः सर्जयामास तेन तत् ॥
तदाज्ञयाऽसृजद् ब्रह्मा मनसैव प्रजापतीन् ।
तेभ्यस्तु रेतसी सृष्टिः शरीराणां निरूप्यते ॥
स्वेदोद्भेदजराय्वंडहेतुभेदाच्चतुर्विधम् ।
देहं यूकादीनः स्वेदादुद्भेदात्तु लतादिनः ॥
जरायोगान्मनुष्या गार्भडात्तु विहगादयः ।
तत्र नादोपयोगित्वान्मानुषं देहमुच्यते ॥
क्षेत्रज्ञः स्थित आकाश आकाशाद्वायुमागतः ।
वायोर्धूमं ततश्चाभ्रमभ्रान्मेघेऽवतिष्ठत ॥
आहृत्याप्यायिनो ह्यन्तरसो ग्रीष्मे च भानुभिः ।
भानुर्मेघे घनरसं निधत्ते तं बलाहकः ॥
यदा वर्षति वर्षेण सह जीवस्तदा भुवि ।
वनस्पत्योषधीजाताः संक्रामत्यविलक्षितः ॥

ताभ्योऽन्नं जातमन्नं च पुरुषे शुक्रतां गतम् ।
शुद्धार्तवायां योषायां निषिक्तं स्मरमंदिरे ॥
सहार्तवेन शुद्धं चेत् गर्भाशयगतं भवेत् ।
जीवकर्मप्रेरितं सद्गर्भमारभते तदा ॥
द्रवत्वं प्रथमे मासे कललाख्यं प्रजायते ।
द्वितीये तु घनः पिंडः पेशी च घनमर्बुदम् ॥
स्त्रीपुंनपुंसकानां स्युः प्रागवस्थाः क्रमादिमाः ।
तृतीये त्वंकुराः पंच करांघ्रिशिरसां मताः ॥
अंगप्रत्यंगभागाश्च सूक्ष्माः स्युर्युगपत्तदा ।
विहाय श्मश्रुदंतादीन् जन्मानंतरसंभवान् ॥
एषा प्रकृतिरन्या तु विकृतिः संमता सताम् ।
चतुर्थे व्यक्तता तेषां भावानामुपजायते ॥
पुंसां शौर्योदयो भावा भीरुत्वाद्यास्तु योषिताम् ।
नपुंसकानां संकीर्णा भवंतीति प्रचक्षते ॥
मातृजं चास्य हृदयं विषयानभिकांक्षति ।
अतो मातुर्मनोऽभीष्टं कुर्याद्गर्भसमृद्धये ॥
तां च द्विहृदयां नारीमाहुर्दौहृदिनीं बुधाः ॥
अदानाद्दोहदानां स्युर्गर्भस्य व्यंगतादयः ॥
मातुर्यद्विषयालाभस्तदार्तो जायते सुतः ।
गर्भः स्यादर्थवान् भोगी दोहदाद्राजदर्शने ॥
अलंकारेषु ललितो धर्मिष्ठस्तापसाश्रमे ।
देवतादर्शने भक्तो हिंस्रो भुजगदर्शने ॥
गोधाशने तु निद्रालुर्बली गोमांसभक्षणे ।
माहिषे शूररक्ताक्षं प्रसूते लोमशं सुतम् ॥
प्रबुद्धं पंचमे चित्तं मांसशोणितपुष्टता ।
षष्ठेऽस्थिस्नायुनखरकेशरोमविविक्तता ॥



बलवर्णौ चोपचितौ सप्तमे त्वंगपूर्णता ।
पाल्यंतरितहस्ताभ्यां श्रोत्ररंध्रे पिधाय सः ॥
उद्विग्नो गर्भसंवासादास्ते गर्भाशये गतः ।
स्मरन् पूर्वानुभूतास्तु नानाजातीश्च यातनाः ॥
मोक्षोपायमभिध्यायन् वर्ततेऽभ्यासतत्परः ।
अष्टमे त्वक्श्रुती स्यातामोजश्चात्र तु हृद्भवम् ॥
शुद्धमापीतरक्तं च निमित्तं जीविते मतम् ।
पुनरंबां पुनर्गर्भं चंचलं तत्प्रधावति ॥
अतो जातोऽष्टमे मासे न जीवत्योजसोज्झितः ।
कंचित्कालमवस्थानं संस्कारात्खंडितांगवत् ॥
समयः प्रसवस्याथ मासेषु नवमादिषु ।
मातृ रसवहां नाडीमनुबद्धा पराभिधा ॥
नाभिस्था नाडी गर्भस्य मात्राहाररसावहा ।
कृतांजलिर्ललाटेऽसौ मातृपृष्ठमभिस्थितः ॥
अध्यास्ते संकुचद्गात्रो गर्भो दक्षिणपार्श्वगः ।
वामपार्श्वे स्थिता नारी क्लीबं मध्याश्रितं मतम् ॥
क्रियतेऽधः शिराः सूतिमारुतैः प्रबलैस्ततः ।
निःसार्यते रुजद्गात्रो यंत्रछिद्रेण बालकः ॥
जातमात्रस्य तस्याथ प्रवृत्तिस्तन्यगोचरा ।
प्राग्जन्मबोधसंस्कारादिति जीवस्य नित्यता ॥
भावाः स्युःषड्विधास्तस्य मातृजाः पितृजास्तथा ।
रसजा आत्मजाः सत्वसंभवाः स्वात्म्यजास्तथा ॥
मृदवः शोणितं मेदो मज्जा प्लीहा यकृद्गुदम् ॥
हृन्नाभीत्येवमाद्यास्तु भावा मातृभवा मताः ॥
श्मश्रुलोमकचाः स्नायुशिराधमनयो नखाः ।
दशनाः शुक्रमित्यादि स्थिराः पितृसमुद्भवाः ॥

शरीरोपचयो वर्णो वृद्धिस्तृप्तिर्बलं स्थितिः ।
आलोलुपत्वमुत्साह इत्यादीन् रसजान् विदुः ॥
इच्छा द्वेषः सुखं दुःखं धर्माधर्मौ च भावना ।
प्रयत्नो ज्ञानमायुश्चेंद्रियाणीत्यात्मजा मताः ॥
ज्ञानेंद्रियाणि श्रवणं स्पर्शनं दर्शनं तथा ।
रसनं घ्राणमित्याहुः पंच तेषां च गोचराः ॥
शब्दः स्पर्शस्तथा रूपं रसो गंध इतिक्रमात् ।
वाक्करांघ्रिगुदोपस्थानाहुः कर्मेंद्रियाणि च ॥
वचनादानगमनविसर्गरतयः क्रमात् ।
क्रियास्तेषां मनो बुद्धिरित्यंतःकरणद्वयम् ॥
सुखं दुःखं च विषयौ विज्ञेयौ मनसः क्रिया ।
स्मृतिभ्रांतिविकल्पाद्या धियोऽध्यवसितिर्मताः ॥
ब्रह्मयोनीनींद्रियाणि भौतिकान्यपरे जगुः ।
सत्वाख्यमंतःकरणं गुणभेदात्त्रिधा मतम् ॥
सत्वं रजस्तम इति गुणाः सत्वात्तु सात्त्विकाः
आस्तिक्यशुक्लधर्मैकरुचिप्रभृतयो मताः ॥
रजसो राजसा भावाः कामक्रोधमदादयः ।
निद्रालस्यप्रमादादिवंचनाद्यास्तु तामसाः ॥
प्रसन्नेंद्रियतारोग्यानालस्याद्यास्तु सत्वजाः ।
देहो भूतात्मकस्तस्मादादत्ते तद्गुणानिमान् ॥
शब्दं श्रोत्रं सुषिरतां वैविक्त्यं सूक्ष्मबोधनाम् ।
बलं च गगनाद्वायोः स्पर्शं च स्पर्शनेंद्रियम् ॥
उत्क्षेपणमवक्षेपाकुंचने गमनं तथा ।
प्रसारणमितीमानि पंचकर्माणि रूक्षता ॥
प्राणापानौ तथा व्यानसमानोदानसंज्ञकान् ।
नागः कूर्मश्च कृकरं देवदत्तं धनंजयम् ॥



दशेतिवायुविकृतीस्तथा गृह्णाति लाघवम् ।
तेषां मुख्यतमः प्राणो नाभिकंदादधः स्थितः ॥
चरत्यास्ये नासिकयोर्नाभौ हृदयपंकजे ।
शब्दोच्चारणनिश्वासश्वासोच्छ्वासादिकारणम् ॥
अपानस्तु गुदे मेढ्रे कटीजंघोदरेषु च ।
नाभिकंदे वंक्षणयोरूरुजानुषु तिष्ठति ॥
अस्य मूत्रपुरीषादिविसर्गः कर्म कीर्तितम् ।
व्यानोऽक्षिश्रोत्रगुल्फेषु कट्यां घ्राणे च तिष्ठति ॥
समानो व्याप्य निखिलं शरीरं वह्निना सह ।
द्विसप्ततिसहस्रेषु नाडीरंध्रेषु संचरन् ।
भुक्तपीतरसान् सम्यगानयन् देहपुष्टिकृत् ॥
उदानः पादयोरास्ते हस्तयोरंगसंधिषु ।
कर्मास्य देहोन्नयनोत्क्रमणादि प्रकीर्तितम् ॥
त्वगादिधातूनाश्रित्य पंचनागादयः स्थिताः ।
उद्गारादि निमेषादि क्षुत्प्रभृति च क्रमात् ॥
तंद्राप्रभृति शोफादि तेषां कर्म प्रकीर्तितम् ।
अग्नेस्तु लोचनं रूपं पित्तं पाकं प्रकाशिता ॥
अमर्षं तैक्ष्ण्यमूष्माणमोजस्तेजश्च शूरताम् ।
मेधावितां तथा धत्ते जलात्तु रसनं रसम् ॥
शैत्यं स्नेहं द्रवं स्वेदं मूत्रादि मृदुतामपि ।
भूमेर्घ्राणेंद्रियं गंधं स्थैर्यं धैर्यादिगौरवम् ॥
श्मश्रुकेशनखान्दंतानस्थ्याद्यन्यच्च कर्कशम् ।
वातादिधातुप्रकृतिर्व्योमादिप्रकृतिस्तथा ॥
सप्तधा सात्विको यश्च ब्रह्मेन्द्रयमविग्रहः ।
वारुणश्चाथ कौबेर आर्षो गांधर्वविग्रहः ॥
तामसः षड्विधो यश्च पैशाचो राक्षसस्तथा ।
आसुरः शाकुनः सार्पः प्रेतदेहस्तथापरः ॥

तामसस्त्रिविधो यश्च पशुमत्स्यांघ्रिपाकृतिः ।
तेषां लक्ष्माणि न ब्रूमो ग्रंथविस्तरकातराः ॥
पिंडस्याहुः षडंगानि शिरः पादौ करौ तथा ।
मध्यं चेत्यथ वक्ष्यंते प्रत्यंगान्यखिलान्यपि ॥
त्वचः सप्त कलाः सप्त स्नायुश्लेष्मजरायुभिः ।
छन्नाः कोपाग्निभिः पक्वास्ता धातूनुत्तरोत्तरान् ॥
सीमभूताश्च धातूनां काष्ठसारोपमा मताः
आद्या मांसधरा मांसे शिराधमनयस्तथा ॥
स्नायुस्रोतांसि रोहंति पंके पंकजकंदवत् ।
असृङ्मेदः श्लेष्मशकृत्पित्तशुक्रधराः पराः ॥
त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः ।
सप्त स्युस्तत्र चोक्ता त्वग्रक्त जाठरवन्हिना ॥
पक्वान्नवेदन्नरसादेवं रक्तादिभिः परे ।
स्वस्वकोपाग्निना पक्वैर्जन्यंते धातवः क्रमात् ॥
रक्तश्लेष्मामपित्तानां पक्वस्य मरुतस्तथा ।
मूत्रस्य चाश्रयाः सप्त क्रमादाशयसंज्ञकाः ॥
गर्भाशयोऽष्टमः स्त्रीणां पित्तपक्वाशयांतरे ।
प्रसन्नाभ्यां कफासृग्भ्यां हृदयं पंकजाकृति ॥
सुषिरं स्यादधोवक्त्रं यकृत्प्लीहांतरे स्थितम् ।
एतच्च चेतनास्थानं तदस्मिन्स्तमसाऽऽवृते ॥
निमीलति स्वपित्यात्मा जागर्ति विकसत्यपि ।
द्विधा स्वप्नसुषुप्तिभ्यां स्वापो बाह्येंद्रियाणि चेत् ॥
लीयंते हृदि जागर्ति चित्तं स्वप्नस्तदोच्यते ।
मनश्चेल्लीयते प्राणे सुषुप्तिः स्यात्तदात्मनः ॥
स्वमपीतः पुरात्मानं स्वपित्यात्मेत्यतो मतः ।
श्रवणे नयने नासे वदने गुदशेफसी ॥



बहिर्मलवहानि स्युर्नव स्रोतांसि देहिनाम् ।
स्त्रीणां त्रीण्यधिकानि स्युः स्तनयोर्द्वे भगेऽसृजः ॥
अस्थिस्नायुशिरामांसस्थानि जालानि षोडश ।
षट्कूर्चाः करयोरंघ्र्योः कंधरायां च मेहने ॥
पार्श्वयोः पृष्ठवंशस्य चतस्रो मांसरज्जवः ।
सेवन्यः पंच शिरसि द्वे जिव्हालिंगयोर्मते ॥
चतुर्दशाष्टादश वा संमता अस्थिराशयः ।
अस्थ्नां शरीरे संख्या स्यात्षष्टियुक्तं शतत्रयम् ॥
वलयानि कपालानि रुचकास्तरुणानि च ।
नलकानीति तान्याहुः पंचधाऽस्थीनि सूरयः ॥
त्रीण्येवास्थिशतान्यत्र धन्वंतरिरभाषत ।
द्वे शते त्वस्थिसंधीनां स्यातामत्र दशोत्तरे ॥
कोरकाः प्रतरास्तुन्नाः सेवनाः स्युरुलूखलाः ।
सामुद्रा मंडलाः शंखावर्ता वायसतुंडकाः ॥
इत्यष्टधा समुद्दिष्टा मुनींद्रैरस्थिसंधयः ।
पेशीस्नायुशिरासंधिसहस्राद्विनवं मतम् ॥
नव स्नायुशतानि स्युश्चतुर्धा स्नायवो मताः ।
प्रतानवत्यः सुषिराः कंडराः पृथुलास्तथा ॥
बंधनैर्बहुभिर्बद्धा भूरिभारक्षमा भवेत् ।
नौरंभसि यथा स्नायुशतबद्धा तनुस्तथा ॥
पंच पेशीशतान्याहुः शरीरस्थानि सूरयः ।
अधिका विंशतिः स्त्रीणां तत्र स्युः स्तनयोर्दश ॥
यौवने ताः प्रवर्धन्ते दशयोनौ तु तत्र च ।
द्वे अन्तःप्रसृते चाद्ये द्वे निस्रो गर्भमार्गगाः ।
शंखनाभ्याकृतिर्योनिस्त्र्यावर्ताऽत्र तृतीयके ॥
आवर्ते गर्भशय्यास्ति पित्तपक्वाशयांतरे ।
रोहिताभिधमत्स्यस्य सदृशी तत्र पेशिका ॥

शुक्रार्तवप्रबोधिन्यास्तिस्रः प्रच्छादिका मताः ।
शिराधमनिकानां तु लक्षाणि नव विंशतिः ॥
सार्धानि स्युर्नवशती षट्पंचाशद्युता तथा ।
दश मूलशिरा ओजोवाहिन्यो हृदयाश्रिताः ॥
व्यंगुलं चांगुलदलं यवं यवदलं तथा ।
गत्वा द्रुमदलस्येव सेवन्यः प्रतता यदा ॥
भिद्यंते तास्तदा सप्त शतानि परिसंख्यया ।
तासु जिव्हास्थिते द्वे द्वे वाग्रसज्ञानकारणे ॥
घ्राणे गंधवहे द्वे द्वे मेषोन्मेषकृतौ दृशोः ।
श्रोत्रयोः शब्दग्राहिण्यौ तासु द्वे शार्ङ्गिणोदिते ॥
धमन्यो रसवाहिन्यश्चतुर्विंशतिरीरिताः ।
कुल्याभिरिव केदारः ताभिर्देहोऽभिवर्धते ॥
एताः प्रतिष्ठिता नाभ्यां चक्रनाभावरा इव ।
ऊर्ध्वं दश दशाधस्ताच्चतस्रस्तिर्यगायताः ॥
ऊर्ध्वगा हृदयप्राप्ताः प्रतीयंते पृथक् त्रिधा ।
वातं पित्तं कफं रक्तं रसं द्वे द्वे विमुंचतः ॥
शब्दं रूपं रसं गंधं द्वे द्वे तत्रावगच्छतः ।
द्वे द्वे च भाषणं घोषं स्वापं बोधं च रोदनम् ॥
कुर्वाते द्वे नरे शुक्रं स्तन्यं तु स्रवतः स्त्रियाम् ।
अधोगता अपि त्रेधा पृथक् पक्वाशयस्थिताः ॥
प्रवर्तयंति तत्राद्या दश वातादि पूर्ववत् ।
अन्नं भुक्तं धमन्यौ द्वे वहतोऽत्र समाश्रयात् ॥
तोयं मूत्रं वर्चं द्वे द्वे नारीणां आर्तवं त्विमे ।
विमुंचतो द्वे स्रोतांसि द्वे स्थूलान्त्रान्विते शकृत् ॥
स्वेदं समर्पयंत्यष्टौ तिरश्च्यो बहुधा मताः ।
रोमकूपेषु संत्यासां मुखानि स्वेदमुक्तये ॥



प्रवेशयंति चाभ्यंगलेपादिप्रभवान् रसान् ।
जीवस्थानानि मर्माणि शतं सप्तोत्तरं विदुः ॥
सार्धकोटित्रयं रोम्णां श्मश्रुकेशास्त्रिलक्षकाः ।
स्रोतः शिराश्मश्रुकेशैः सह रोम्णां तु कोटयः ॥
चतुष्पंचाशदाख्याताः सप्तषष्ट्या च सार्धया ।
लक्षाणां सहिता मानं जलादेरधुनोच्यते ॥
दशांजलि जलं ज्ञेयं रसस्यांजलयो नव ।
रक्तस्याष्टौ पुरीषस्य सप्त स्युः श्लेष्मणस्तु षट् ॥
पित्तस्य पंच चत्वारो मूत्रस्यांजलयस्त्रयः ।
वसाया मेदसो द्वौ तु मज्जा त्वंजलिसंमिता ॥
अर्धांजलिः शिरोमज्जा श्लेष्मसारो बलं तथा ।
इति प्रत्यंगसंक्षेपो विस्तरस्त्विह तत्वतः ॥
अनंतनामकं चक्रं सर्वाधः सर्वतोमुखम् ।
छायाचक्रं वामपादे वातचक्रं तु दक्षिणे ॥
गुदलिंगांतरे चक्रमाधाराख्यं चतुर्दलम् ।
परमः सहजस्तद्वदानंदो वीरपूर्वकः ॥
योगानंदश्च तत्र स्यादीशानादिदले फलम् ।
अस्ति कुंडलिनी ब्रह्मशक्तिराधारपंकजे ॥
आब्रह्मरंध्रमृजुतां नीतेयममृतप्रदा ।
स्वाधिष्ठानं लिंगमूले षड्दलं चक्रमस्य च ॥
पूर्वादिषु दलेष्वाहुः फलान्येतान्यनुक्रमात् ।
प्रश्रयः क्रूरता गर्वनाशो मूर्छा ततः परम् ॥
अवज्ञा स्यादविश्वासः कामशक्तेरिदं गृहम् ।
नाभौ दशदलं चक्रं मणिपूरकसंज्ञकम् ॥
सुषुप्तिरत्र तृष्णा स्यादीर्ष्या पिशुनता तथा ।
लज्जा भयं घृणा मोहः कषायोऽथ विषादिता ॥

क्रमात्पूर्वादिपत्रेषु स्याज्ज्ञानुभवनं तु तत् ।
हृदयेऽनाहतं चक्रं शिवस्य प्रणवाकृतेः ॥
पूजास्थानं तदिच्छंति युतं द्वादशभिर्दलैः ।
लौल्यं प्रणाशः कपटं वितर्कोऽप्यनुतापिता ॥
आशा प्रकाशश्चिंता च समीहा ममता ततः ।
क्रमेण दंभो वैकल्यं विवेकोऽहंकृतिस्तथा ॥
फलान्येतानि पूर्वादिदलस्थास्यात्मनो जगुः ।
सुदर्शनं दक्षिणे हस्ते कालचक्रं तु वामतः ॥
कंठेऽस्ति भारतीस्थानं विशुद्धिः षोडशच्छदम् ।
तत्रप्रणव उद्गीथो हुंफड्वषडथ स्वधा ॥
स्वाहा नमोऽमृतं सप्त स्वराः षड्जादयो विषम् ।
इति पूर्वादिपत्रस्थे फलान्यात्मनि षोडश ॥
ललनाख्यं घंटिकायां चक्रं द्वादशपत्रकम् ॥
मदोमानस्ततः स्नेहः शोकः खेदश्च लुब्धता ।
अरतिः संभ्रमश्चोर्मिः श्रद्धा तोषोपरोधिता ॥
फलानि ललनाचक्रे स्युः पूर्वादिदलेष्विति ।
मौन्यवक्त्रं तु वदने जिव्हायां जलचक्रकम् ॥
दलत्रयसमायुक्तमधःपत्रे तु ह्रस्वता ।
सूक्ष्मताचोर्ध्वपत्रे स्यात्सन्मुखे दीर्घता मता ॥
त्रिलक्षणं कलं स्वादुवारणं च प्रकीर्तितम् ।
ऋषिस्तु वरुणो जिव्हा शक्तिर्हंसस्तु दैवतम् ॥
वारुणं तालुमूले तु द्विदलं चक्रमीरितम् ।
अधोर्ध्वसन्मुखत्वेन मार्गाः स्युस्तत्र ते त्रयः ॥
आहरस्तूर्ध्वमार्गेणाधोमार्गे प्राणमेलनम् ।
सन्मुखे शब्दसंपात्तिः लं वं स्वं मातृकात्रयम् ॥
छंदस्त्रिष्टुप् ऋषिः क्रोधो ममता शक्तिरुच्यते ।
अहंकारोऽत्रदेवतास्यात्प्रकृतिः पुरुषः कले ॥



कर्मणो वासना भोगः कर्मणो गहना गतिः ।
दक्षनासापुटे चक्रं सुगंधं परिकीर्तितम् ॥
वामनासापुटे चक्रं दुर्गंधं कीर्तितं बुधैः ।
निःशब्दं वामकर्णे स्याद् दक्षिणे तु सशब्दकम् ॥
वामनेत्रे रूपचक्रं ज्योतिश्चक्रं तु दक्षिणे ।
भ्रूमध्ये त्रिदलं चक्रमाज्ञासंज्ञं फलानि तु ॥
आविर्भावाः सत्वरजस्तमसां क्रमतो मताः ।
ततोप्यस्ति मनश्चक्रं षड्दलं तत्फलानि तु ॥
स्वप्नो रसोपभोगश्च घ्राणं रूपोपलंभनम् ।
स्पर्शनं शब्दबोधश्च पूर्वादिषु दलेष्विति ॥
ततोऽपि षोडशदलं सोमचक्रमितीरितम् ।
दलेषु षोडशेष्वस्य कलाः षोडश संस्थिताः ॥
कृपा क्षमार्जवं धैर्यं वैराग्यधृतिसंमदाः ।
हास्यं रोमांचनिचयो ध्यानं सुस्थिरता ततः ॥
गांभिर्यमुद्यमोऽच्छत्वमौदार्यैकाग्रते क्रमात् ।
फलान्युशंति जीवस्य पूर्वादिदलगामिनः ॥
भ्रमराख्यगुहां तत्र ब्रह्मरंध्रे विचिंतयेत् ।
दीपवर्णं दीपचक्रं दलसप्तकमन्वितम् ॥
मातृकासु च संयुक्तं सोऽहं प्राणरसोद्भवम् ।
हंसस्तु देवता तत्र रसनाशक्तिरुच्यते ॥
चिंचिणीनादसंयुक्तं विसर्गस्वरमंडितम् ।
भारतं दर्शनं तत्र वानाविशाचिकीस्मृता ॥
महापीठोन्मनीमुद्रे तुर्यावस्था प्रकीर्तिता ।
रसस्तु करुणः शक्तिः क्रिया प्रसवलिंगकम् ॥
चित् ज्ञानदेहः शून्यं चात्रैव पाटनपाटनम् ।
विकारोर्ध्वः सूक्ष्मश्वेदस्राटकः पवनः स्मृतः ॥

प्रकनाडीप्रवाहश्च तत्रेच्छाकमलोद्भवा ।
गतिर्मध्या समानस्य जीवो भोगविलासवान् ॥
अहंकारस्तेजःपुंजः पंचभूताश्रयः स्मृतः ।
तीर्थं तत्र समुद्दिष्टं ब्रह्मावर्तकनामकम् ॥
विद्युद्वर्णं ब्रह्मचक्रमेकदलैकमातृकम् ।
मायाचक्रं कृष्णवर्णं सहस्रमातृकान्वितम् ॥
युक्तं सहस्रपत्रैस्तु ब्रह्मरंध्रे सुधाधरम् ।
तत्सुधासारधाराभिरभिवर्द्धयते तनुम् ॥
प्रकाशनामकं चक्रं नानावर्णदलं ततः ।
मातृकागणसंयुक्तमहंकारप्रभोज्वलम् ॥
अनाहतदले पूर्वेऽष्टमे चैकादशे तथा ।
द्वादशेऽवस्थितो जीवो गीतादेः सिद्धिमृच्छति ॥
चतुर्थषष्ठदशमैर्दलैर्गीतादि नश्यति ।
विशुद्धेरष्टमादीनि दलान्यष्टौ श्रितानि तु ॥
दद्युर्गीतादिसंसिद्धिं षोडशं तद्विघातकम् ।
दशमैकादशे पत्रे ललनायां सुसिद्धये ॥
नाशकं प्रथमं तुर्यं पंचमं च दलं विदुः ।
ब्रह्मरंध्रस्थितो जीवः सुधया संप्लुतो यथा ॥
तुष्टो गीतादिकार्याणि सप्रकर्षाणि साधयेत् ।
एषां शेषेषु पत्रेषु चक्रेष्वन्येषु च स्थितः ॥
जीवो गीतादि संसिद्धिं न कदाचिदवाप्नुयात् ।
आधाराद्व्यंगुलादूर्ध्वं मेहनाद्व्यंगुलादधः ॥
एकांगुलं देहमध्यं तप्तजांबूनदप्रभम् ।
तत्रास्तेऽग्निशिखा तन्वी चक्रात्सप्तमात्रांगुले ॥
देहस्य कंदोऽस्त्युत्सेधायामाभ्यांचतुरंगुलः ।
ब्रह्मग्रंथिरितिप्रोक्तं तस्य नाम पुरातनैः ॥



तन्मध्ये नाभिचक्रं तु द्वादशारमवस्थितम् ।
लूतेव तंतुजालस्था तत्र जीवो भ्रमत्ययम् ॥
सुषुम्नया ब्रह्मरंध्रमारोहत्यवरोहति ।
जीवः प्राणसमारूढो रज्ज्वां कोल्हाटिको यथा ॥
सुषुम्नां परितो नाड्यः कंदादाब्रह्मरंध्रतः ।
कंदीकृत्य स्थिताः कंदं शाखाभिस्तन्वते तनुम् ॥
ताश्च भूरितरास्तासु मुख्याः प्रोक्ताश्चतुर्दश ।
सुषुम्नेडा पिंगला च कुहूरथ सरस्वती ॥
गांधारी हस्तिजिव्हा च वारणा च यशस्विनी ।
विश्वोदरा शंखिनी च ततः पूषा पयस्विनी ॥
अलंबुषेति तत्राद्यास्तिस्रो मुख्यतमा मताः ।
सुषुम्ना तिसृषु श्रेष्ठा वैष्णवी मुक्तिमार्गगा ॥
कंदमध्ये स्थिता तस्या इडा सव्येऽथ दक्षिणे ।
पिंगलेडापिंगलयोश्चरतश्चंद्रभास्करौ ॥
क्रमात्कालगतेर्हेतुः सुषुम्ना कालशोषिणी ।
सरस्वती कुहूश्चास्ते सुषुम्नायाश्च पार्श्वयोः ॥
इडायाः पृष्ठतः पूर्वं गांधारीहस्तिजिव्हिके ।
क्रमात्पूषायशस्विन्यौ पिंगलापृष्ठपूर्वयोः ॥
विश्वोदरा मध्यदेशे स्यात्कुहूहस्तिजिव्हयोः ।
मध्ये कुहूयशस्विन्योर्वारणा संस्थिता मता ॥
पूषासरस्वतीमध्यमाश्रितेन पयस्विनी ।
गांधारिकासरस्वत्योर्मध्ये वसति शंखिनी ॥
अलंबुषा कंदमध्ये तत्रेडापिंगले क्रमात् ।
सव्यदक्षिणनासांतं कुहूर्मेहनं पुरः ॥
सरस्वत्युत्तमाजिव्हं गांधारी पृष्ठतः स्थिता ।
आवामनेत्रमासाद्य पादांगुष्ठं तु संस्थिता ॥

हस्तिजिव्हा सर्वगा तु वारणाथ यशस्विनी ।
अंगुष्ठाद्दक्षिणांघ्रिस्था देहे विश्वोदराखिल ॥
शंखिनी सव्यकर्णान्तं पूषाख्या वामनेत्रतः ।
पयस्विनी तु वितता दक्षिणश्रवणावधि ॥
अलंबुषा पायुमूलमवलंब्य व्यवस्थिता ।
एवंविधेतु देहेऽस्मिन्मलसंचयसंवृते ॥
प्रसाधयंते धीमंतो भुक्तिं मुक्तिमुपायतः ।
तत्र स्यात्सगुणध्यानाद्भुक्तिर्मुक्तिस्तु निर्गुणात् ॥
ध्यानमेकाग्रचित्तैकसाध्यं न सुकरं नृणाम् ।
तस्मादत्र सुखोपायं श्रीमन्नादमनाहतम् ॥
गुरूपदिष्टमार्गेण मुनयः समुपासते ।
तत् प्रक्रियां प्रवक्षामि पुरतस्तु सविस्तरर् ॥
सोऽपि रक्तिविहीनत्वान्न मनोरंजको नृणाम् ।
तस्मादाहतनादस्य श्रुत्यादिद्वारतोऽखिलम् ॥
गेयं वितन्वतो लोके रंजनं भवभंजनम् ।
उत्पत्तिमभिधास्यामस्तथा श्रुत्यादिहेतुताम् ॥

इति श्रीसंगीतानूपविलासे शरीरभावप्रकाशो नाम
अष्टमप्रकाशः ।

---

अथ नादः ।

चैतन्यं सर्वभूतानां विवृतं जगदात्मना ।
नादब्रह्म तदानंदमद्वितीयमुपास्महे ॥
नादोपासनया देवा ब्रह्मविष्णुमहेश्वराः ।
भवंत्युपासिता नूनं यस्मादेते तदात्मकाः ॥
आत्मा विवक्षमाणोऽयं मनः प्रेरयते मनः ।
देहस्थं वन्हिमाहंति स प्रेरयति मारुतम् ॥



ब्रह्मग्रंथिस्थितः सोऽथ क्रमादूर्ध्वपथे चरन् ।
नाभिहृत्कंठमूर्द्धास्येष्वाविर्भावयति ध्वनिम् ॥
नादोऽतिसूक्ष्मः सूक्ष्मश्च पुष्टोऽपुष्टश्च कृत्रिमः ।
इति पंचाभिधां धत्ते पंचस्थानस्थितः क्रमात् ॥
विवक्षुरात्मा प्राणाख्यो वायुः प्रेरयते मनः ।
वह्निमाहन्ति तत्तेन नादः समुपपद्यते ॥
कंठस्थाने समुत्पन्नः समीरः संचरन्नधः ।
ऊर्ध्वंवरकुरुते सर्वां नादपद्धतिमुद्धताम् ॥
स संचरन्नूर्ध्वपथे धत्ते यां चाभिधां क्रमात् ।
अतिसूक्ष्मश्च सूक्ष्मश्च व्यक्तोऽव्यक्तश्च कृत्रिमः ॥
अतिसूक्ष्मो भवेन्नाभौ हृदि सूक्ष्मः प्रकाशते ।
व्यक्तोऽभिव्यज्यते कंठे ह्यव्यक्तः शिरसि स्मृतः ॥
कृत्रिमो मुखदेशे स्यादिति पंचविधो मतः ।
नकारः प्राणनामा स्याद्दकारो वह्निरुच्यते ॥
जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते ।
या रागोत्पादिनी शक्तिः सैवात्र वदनं स्मृतम् ॥
वदव्यक्तायां वाचि स्याद्वदतीति वादिरीरितः ।
स्थानाष्टकसमायोगाद्ध्वनोऽसौ वर्णतां तथा ॥
आविर्भावः पंचधितोऽक्षराणां परिकीर्तितः ।
चतुस्त्रिंशद्वको युक्ता युक्तायुक्तत्रिशाक्तिभिः ॥
शिवाः प्रनवितुं शक्तास्ते शिवाः शिवतां गताः ॥ ( ? )

इति श्रीसंगीतानूपविलासे नादोत्पत्तिर्भावप्रकाशो
नाम नवमप्रकाशः ।

---

अथ स्थानानि ।

व्यवहारे त्वसौ त्रेधा हृदि मंद्रोऽभिधीयते ।
कंठे मध्यो मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तरम् ॥

शृंगारहारे:—

व्यवहारे त्वसौ त्रेधा स्थानभेदेन लक्ष्यते ।
नादोऽयं नदते वायुरिति तस्य निदर्शनम् ॥
स एव भण्यते नादो गीततत्वार्थदर्शिभिः ।
नादस्वरमयं गीतं स्वरास्ते श्रुतिसंभवाः ॥
श्रुतयः स्थानसंभूतास्तल्लक्षणमथोच्यते ।
त्रीणि स्थानानि तेष्वादौ हृदि मंद्रोऽभिधीयते ॥
कंठे मध्यो मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तरम् ।
प्रत्येकं तत्पुनःस्थानं द्वाविंशतिविधं भवेत् ॥
तस्य द्वाविंशतिर्भेदाः श्रवणात् श्रुतयो मताः ।
हृद्यूर्ध्वनाडिसंलग्ना नाड्यो द्वाविंशतिर्मताः ॥
तिरश्चयस्तासु तावत्यः श्रुतयो मारुताहताः ।
उच्चोच्चतरता युक्ताः प्रभवंत्युत्तरोत्तरम् ॥
एवं कंठे तथा शीर्षे श्रुतिर्द्वाविंशतिर्मता ।
व्यक्तये कूर्मदे तासां वीणाद्वंद्वे निदर्शनम् ॥
ध्रुववीणादियंत्रेषु तासां व्यक्तिः प्रतीयते ।
श्रुतेस्तु लक्षणं नास्ति शृंगारहारसंज्ञके ॥

---

### अथ श्रुतिलक्षणम् ।

दर्पणः-

स्वरूपमात्रश्रवणान्नादोऽनुरणनं विना ।
श्रुतिरित्युच्यते भेदास्तस्या द्वाविंशतिर्मताः ॥

---

अथ मतंगोक्तमतभेदान्दर्शयति ।

श्रवणार्थस्य धातोः क्तिप्रत्यये च सुसंश्रिते ।
श्रुतिशब्दः प्रसाध्योऽयं शब्दज्ञैः कर्मसाधनैः ॥
श्रूयते सा श्रुतिः प्रोक्ता तत्वज्ञैर्भरतादिभिः ।
श्रवणेंद्रियग्राह्यत्वाद्ध्वनिरेव श्रुतिर्भवेत् ॥



सात्र चैका त्वनेका वा स्वरान्तरविभागतः ।
स्वरश्रुत्योर्भेदेन षट् पक्षास्तैः प्रवर्तिताः ॥
अधराधरनीचत्वमुत्तरोत्तरतीव्रता ।
उच्यते भावभट्टेन शरीरेऽसौ विलक्षणा ॥
नन्वत्र बहवः पक्षास्तद्वत् मुनिभिरीरिताः ।
आकाशानलसंयोगात्प्रयत्नप्रेरितो ध्वनिः ॥
नाभेरूर्ध्वं वियद्देशमाक्रामद्वन्हिकेतुवत् ।
सोपानपदसंस्थानमारोहन्पवनेच्छया ॥
तुर्यश्रुत्यादिभेदैस्तु विभिन्न इव भासते ।
नियतः श्रुतिसंस्थानाद्गीयंते सप्तगीतिषु ॥
तस्मात्स्वरगताज्ञेयाः श्रुतयः श्रुतिवेदिभिः ।
ताः शुद्धस्वरूपेण विकृताः स्वररूपगाः ॥
अंतरस्वरवर्तिन्यो ह्यंतरश्रुतयो मताः ।
इति द्विश्रुतिपक्षस्तु भावभट्टेन कीर्तितः ॥
एतासामपि वैस्वर्यं क्रियाग्रामविभागतः ।
कैश्चित्स्थानकसंयोगान्मन्यते त्रिविधा श्रुतिः ॥
अन्ये त्विंद्रियवैगुण्याद्वदंति त्रिविधां श्रुतिम् ।
अत्रेंद्रियं मनः प्रोक्तं वैगुण्यं गुणयोगतः ॥
तत्र सत्वगुणोपेतं सहजं परिकीर्तितम् ।
रजस्तमोभ्यां युक्तं यत् दोषजं तत् समीरितम् ॥
अभ्याघपहतं यत्तु प्रोक्तं तदभिघातजम् ।
वातादिभेदैस्तामाह तुंबुरुस्तु चतुर्विधाम् ॥
उच्चैस्तरो ध्वनी रूक्षो विज्ञेयो वातजो बुधैः ।
गंभीरो घनलीनस्तु ज्ञेयोऽसौ पित्तजो ध्वनिः ॥
स्निग्धश्च सुकुमारश्च मधुरः कफजो ध्वनिः ।
त्रयाणां गुणसंयुक्तो विज्ञेयः सान्निपातकः ॥

एतत्तु शब्दभेदेन वेणुर्नवविधो तथा ।
द्विश्रुतिः त्रिश्रुतिश्चैव चतुश्श्रुतिक एव च ॥
स्वरप्रयोगः कर्तव्यो वंशच्छिद्रगतो बुधैः ।
द्विकत्रिकचतुष्कास्तु ज्ञेया वंशगताः स्वराः ॥
कंपमानार्धमुक्ताश्च व्यक्तमुक्तांगुलिस्वराः ।
भावभट्टेनेति तावत्समीच्यः श्रुतयो नव ॥
संत्येतेऽपि त्रयः पक्षाः श्रीकोहलसमीरिताः ।
द्वाविंशतिं केचिदुदाहरंति ।
श्रुतीः श्रुतिज्ञानविचारदक्षाः ॥
षट्षष्टिभिन्नाः खलुकेचिदासाम् ।
आनंत्यमेव प्रतिपादयंति ॥
तत्रानंत्यं श्रुतीनां हि सूचयंति विपश्चितः ।
यथा ध्वनिविशेषाणामानं गगनोदरे ॥
उत्तालपवनोद्वेलज्जलराशिसमुद्भवाः ।
इयत्यः प्रतिपद्यंते न तरंगपरंपराः ॥
एवं नवसु पक्षेपु सत्स्वेकः किं निरूपितः ।
अत्रोऽच्यते समाधानं वेण्वान्तेषु च षट्स्वपि ॥
स्वरश्रुत्योरभेदेन षट् पक्षास्तैः प्रवर्तिताः ।
भेदपक्षोऽयमस्माकं मतस्तैर्न विकथ्यते ॥
भेदाभेदौ विरुद्धौ चेद्भेदः प्रामाणिको मतः ।
रणनं चानुरणनं भिन्नत्वरणपेनयोः ॥
अभिव्यंजकता तासामभिव्यंग्याः स्वरा यतः ।
अभेदरूपस्तुर्यपक्षः समीचीनो न लक्ष्यते ॥
किंचित्संगुरूपक्षस्य शब्दभेदानुगामिता ।
सप्तमादिषु पक्षेषु भेदो यद्यपि लक्ष्यते ।
तथाप्यानंत्यपक्षोऽत्र सहते न विचारणाम् ।
ध्वनेः श्रवणायोग्यस्यावयवा ये प्रकीर्तिताः ॥



संतु ते नाम तेषां हि श्रुतित्वं केन कथ्यते ।
श्रवणेंद्रियगम्यत्वं श्रुतीनां लक्षणं स्मृतम् ॥
तेऽर्थापत्त्यानुमा[illegible] गम्यंते त्रसरेणुवत् ।
अत एव हि तेषां न स्वराभिव्यक्तिहेतुता ॥
षट्षष्टिश्रुतिपक्षे तु यंचोद्वारैर्विभाविता ।
न विरोधोऽस्ति तावत्यः श्रुतयः स्थानकत्रये ॥
नाहत्ताश्च विभिन्नार्थं परस्परमिति स्थिताः ।
समाधानं च षड्जादेरप्यात्र[illegible]था सति ॥
मध्यतारस्थषड्जादेः षट्षष्टिश्रुतियोगिता ।
पृथगृत्यादिति नैवं व्यवहारोऽस्ति कस्यचित् ॥
शारीरेण विरुद्धश्च गौरवग्रामदूषितः ।
तस्मात्सप्तमपक्षोऽयमस्माभिर्न उरीकृतः ॥
सर्वसारतमोद्युक्तः स हि निःशंकसंमतः ।
सारणाक्रमविज्ञानं लोके ज्ञेयं मनीषाभिः ॥
नोक्तं तद्भावभट्टेन ग्रंथविस्तरभीरुणा ।
अथ शृंगारहारोक्तं प्रोच्यते भानसूरिणा ॥
तत्रशीर्षहृत्कंठस्थास्ताश्च दर्शयितुमक्षमाः ।
ध्रुववीणादिवत्तेषु तासां व्यक्तिः प्रतीयते ॥
तत्सर्वत्र प्रसिद्धत्वात्तात्रास्माभिरुदीरिता ।
समं वीणाद्वयं कार्यं सामस्तावयवैर्मिथः ॥
तथा द्वाविंशतिस्तत्र इत्येके तासु वादितः ।
प्रतिः स्थानस्वराः सप्त निवसंति यथाक्रमम् ॥
चतुःश्रुतिस्त्रिश्रुतिश्च द्विश्रुतिश्च चतुःश्रुतिः ।
चतुःश्रुतिस्त्रिश्रुतिश्च द्विश्रुतिश्च यथाक्रमम् ॥
आदिः श्रुतौ चतुर्थ्यां तु स्वरः षड्जोऽभितिष्ठति ।
सप्तम्यां ऋषभस्तद्वत् गांधारस्य स्थितिः पुनः ॥

नवम्यां तु त्रयोदश्यां मध्यमः पंचमस्ततः ।
सप्तदश्यां धैवतस्तु विंशामथ निषादकः ॥
द्वाविंश्यामिति मंद्रस्थाः स्वराः सप्त प्रकीर्तिताः ।
ईदृश्येव स्थितिर्मध्ये तारे चैवेदृशी स्थितिः ॥
अक्षि निमिषकालो वै नादस्तु श्रुतिः कथ्यते ।
श्रुतीनां च स्वरस्थानां नामानि व्याहरामहे ॥
दीप्तायता च करुणा मृदुमध्येति जातयः ।
श्रुतीनां पंच तासां च स्वरेष्वेवं व्यवस्थितिः ॥
अंकाः पंच समाख्याता ज्ञेयास्ता जातयो बुधैः ।
तीव्रारौद्रीवज्रिकाग्रेत्युक्ता दीप्ता चतुर्विधा ॥
कुमुद्वत्यायता या स्यात्क्रोधाचाथ प्रसारिणी ।
संदीपिनी रोहिणी च भेदाः पंचेति कीर्तिताः ॥
दयावती तथालापिन्यथ प्रोक्ता मदंतिका ।
त्रयस्ते करुणा भेदा मृदोर्भेदचतुष्टयम् ॥
मंदा च रतिका प्रीतिः क्षितिमध्या तु षड्विधा ।
छंदोवती रंजनी च मार्जनी रतिका तथा ॥
रम्या च क्षोभिणीत्यासामथ ब्रूमः स्वरस्थितिम् ।

तीव्रा ( १ ) कुमुद्वती ( २ ) मंदा ( ३ ) छंदोवत्यस्तु ( ४ ) षड्जगाः । दयावती ( ५ ) रंजनी च ( ६ ) रतिका ( ७ ) ऋषभे स्थिताः ॥ रौद्री ( ८ ) क्रोधा (९) च गांधारे वज्रिका (१०) थप्रसारिणी (११) प्रीतिश्च (१२) मार्जिनी (१३) त्येताः श्रुतयो मध्यमाश्रिताः । क्षिती (१४) रक्ता (१५) च संदीपिन्या ( १६ ) लापिन्य ( १७ ) थ पंचमे । मदंती (१८) रोहिणी (१९) रम्येत्या धैवतसंस्थिताः । उग्रा (२१) च क्षोभिणीति (२२) द्वे निषादे वसतः श्रुती ॥

अथ लक्ष्यलक्ष्मानेनानेन परिकीर्तिताः ।
मंद्रमध्यताराख्यस्थानभेदास्त्रिधा मताः ॥
ता एव विकृतावस्थाः सर्वैव प्रतिपादिताः ॥



केचिदन्यानि नामानि श्रुतीनां कथितानि तु ।
तन्मते गात्रजा चोर्द्ध्व यंत्रजाश्चापरा मताः ॥

नंदना ( १ ) निष्कला ( २ ) गूढा ( ३ ) सकला ( ४ ) मधुर तथा ( ५ ) ललिते ( ६ ) काक्षरा ( ७ ) भ्रगजातिश्च ( ८ ) ह्रस्वगीतिका ( ९ ) ॥ [illegible]का ( १० ) चापरा ( ११ ) पूर्णा ( १२ ) तथालंकारिणी मता ( १३ ) वैणिका ( १४ ) वलिता ( १५ ) चैव त्रिस्थाना ( १६ ) सुस्वरा तथा ( १७ ) । सौम्या ( १८ ) आपांगिका चाथ ( १९ ) शांतिका ( २० ) व्यापका ततः प्रसन्ना ( २१ ) सुभगा ( २२ ) इति यंत्रजा श्रुतयो मताः ॥

विभागः क्रीयते नूनमेताभिर्ग्रामयोः स्फुटम् ।
संवाद्यादिपरिज्ञानं श्रुतीनां च फलं विदुः ॥
मंद्रादिध्वनिभेदास्ते श्रवणात् श्रुतिसंज्ञकाः ।
तेभ्यः केचिदुपादाय गीयंते सर्वगीतिषु ॥
आधीयते च ये तेषु स्वरत्वमुपलभ्यते ॥
परिणामे यथा क्षीरं दधिरूपेण सर्वदा ।
षड्जादयः स्वराः सप्त व्यज्यंते श्रुतिकोविदैः ॥

इतिश्री संगीतानुपविलासे श्रुतिभावप्रकाशो
नाम दशमप्रकाशः ।

---

### अथ स्वरलक्षणम् ।

श्रुतिस्वरयोर्जातीनां निष्पत्तिरधुनोच्यते ।

रत्नाकरे:—

श्रुत्यनंतरभावी यः स्निग्धोऽनुरणनात्मकः ।
स्वतो रंजयति श्रोतृचित्तं स स्वर उच्यते ॥

पारिजाते:—

श्रुत्यनंतरमुत्पन्नाः स्निग्धोऽनुरणनात्मकाः ।
रंजयंति स्वतः स्वांतं श्रोतॄणामिति ते स्वराः ॥

शृंगारहारे—

श्रुतिभ्यस्तु स्वरा जाताः स्वरेभ्यो ग्रामसंभवः ।
ग्रामाभ्यां जातयो जाता रागा जातिसमुद्भवाः ॥
यत्किंचिद् वाङ्मयं लोके गान्धं वा कृत्रिमं भवेत् ।
सर्वं सप्तस्वरव्याप्तं विष्णुनेव जगत्त्रयम् ।
तत्रादौ कथ्यते सम्यक् स्वरशब्दः किमुच्यते ।
षड्जादिष्वपि नामानि कथं प्राप्तानि च स्वरैः ॥
स्वयं यो राजते नादः स स्वरः परिकीर्तितः ।
सोऽपि सप्तविधस्तज्ज्ञैः प्रोक्तः षड्जादि भेदतः ॥

रागकुतूहले:—

केचिदाहुः स्वरश्रुत्योस्तादात्म्यमिति तद्विदः ।
वैविजने परेऽन्ये तु कार्यकारणरूपताम् ॥
इतरे परिणामं तु व्यंग्यव्यंजकतां परे ।
नाद्यपक्षः स्वरश्रुत्योर्भिन्नधीगोचरत्वतः ॥
आश्रयाश्रयिभेदाच्च द्वितीयोऽपि न युज्यते ।
विवर्तत्वे स्वराणां हि भ्रान्तत्वं भवति स्फुटम् ॥
कार्यकारणपक्षोऽपि न परीक्षाक्षमो यतः ।
यथा घटादिनिष्पत्तौ भेदे नानुपलंभनम् ॥
मृत्पिंडादेस्तथा नात्र श्रुतीनामुपलंभनात् ।
स्वरोपादानं नाम्ना तु तस्मान्नैवोपयुज्यते ॥
चतुर्थपंचमौ पक्षावदृष्टान्तेन संमतौ ।
मतंगादेरतो ग्राह्यौ शार्ङ्गिप्रमुखसूक्ष्मबुद्धिभिः ॥
द्वाविंशति श्रुतिभ्यः स्युः सप्त षड्जादयः स्वराः ।
कोणरामाब्धिवेदाब्धिरामाक्षिश्रुतिधारिणः ॥
यथावच्छ्रुतिकास्ते तु तावतीभ्यो भवंति हि ।
षड्जर्षभौ च गांधारमध्यमौ पंचमस्ततः ॥



धैवतश्च निषादश्च संज्ञया परिकीर्तिता ।
तेषां संज्ञा स रि ग म प ध नीत्यपरा मता ॥
सप्त धात्वाश्रयत्वाद्वा सप्तद्वीपाश्रयत्वतः ।
सप्त वक्त्राश्रय[illegible] सप्तेति मुनेर्मतम् ॥
अथ षड्जादिशब्दानां मतंगादिमतोदिता ।
अन्वर्थतोच्यतेऽस्माभिर्यथैतत्परिनिर्मितः ॥

---

### अथ षड्जस्वरलक्षणम् ।

षण्णां स्वराणां जनकः षड्भिर्वा जन्यते स्वरैः ।
षड्भ्यो वा जायतेऽङ्गेभ्यः षड्ज इत्यभिधीयते ॥
यस्मिन् षड्जादयो जातास्तस्मात् षड्ज इतीरितः ।
कंठोरस्तालुरसनानासाशीर्षाभिधेषु च ।
षट्सु स्थानेषु जातत्वात् षड्जः स्यात् प्रथमस्वरः ॥
कंठात्संजायते षड्ज ऋषभो हृदयोद्भवः ॥
गांधारस्त्वनुनासिक्यो मध्यमो नाभिसंभवः ।
उरसः शिरसः कंठात्संजातः पंचमस्वरः ॥
ललाटे धैवतं विद्यान्निषादः सर्वसंधिजः ।
सप्तस्वराणामुत्पत्तिः शरीरे परिकीर्तिता ॥
नादात्मकानामेतेषां रूपवर्णादि वर्ण्यते ।
षण्मुखः स्याच्चतुर्हस्तः पाणिभ्यामुभले दधत् ॥
वीणाशोभिकरद्वंद्वः स्फुरत्तामरसप्रभः ।
कुलं सुपर्वजं जंबुद्वीपं ब्रह्मा च दैवतम् ॥
शृंगारके रसे गेयो मुख्यगाता तु पावकः ।
मयूरो वाहनं स्वस्य स्वरानुकरणात्पुनः ॥
अस्य षड्जस्वरस्योक्त्वा द्वितीयस्याथ भण्यते ।

---

अथ ऋषभस्वरलक्षणम् ।

प्राप्नोति हृदयं शीघ्रमन्यस्मादृषभः स्मृतः ।
श्रीगवीषु यथा तिष्ठन्विभाति ऋषभो महान् ॥
स्वरग्रामे समुत्पन्नः स्वरोऽयमृषभस्तथा ।
एकवक्त्रश्चतुर्हस्तः पाणिभ्यां कमले दधत् ॥
वीणां बिभ्रत्कराभ्यां च ऋषभो नीलवर्णभृत् ।
अग्निस्तु दैवतं शाकं द्वीपं गाता तु पद्मभूः ।
रसो हास्योऽस्य यानं गौरिति श्रृंगारहारके ॥
नाभेः समुत्थितो वायुस्तालुजिव्हाग्रसंहतः ।
ऋषभवन्नदते यत्तस्मादृषभ उच्यते ॥

---

अथ गांधारलक्षणम् ।

वाचं गानात्मिकां धत्त इति गांधारसंज्ञकः ।
गंधर्वसुखहेतुत्वाद्गांधारो वाभिधीयते ॥
गांधारस्त्वेकवदनो गौरवर्णः चतुःकरः ।
वीणाफलाब्जघंटाभृत्करः स्यान्मेषवाहनः ॥
शंकरो दैवतं क्रौंचद्वीपं सुपर्वजं कुलम् ।
विष्णुर्गाता रसो वीरो मुख्यो ज्ञेयोऽथ मध्यमः ॥

---

अथ मध्यमलक्षणम् ।

स्वराणां मध्यमत्वाच्च मध्यमस्वर उच्यते ।
यद्वा मम प्रियो रोग इति मध्यमशब्दतः ॥
यद्वा समुत्थिताद्वायोर्वक्षसिचित्ते समाहतात् ।
मध्यस्थानभवत्यस्मान्मध्यमः परिकीर्तितः ॥
मध्यमस्त्वेकवक्त्रः स्याद्धेमवर्णश्चतुःकरः ।
सवीणाकलशौ हस्तौ सपद्मवरदौ तथा ॥



भारती दैवतं द्वीपं कुशं वंशः सुपर्वजः ।
गाता चंद्रो रसः शांतः क्रौंचो यानमस्य तु ॥
शृंगारहारे:—
वायुः समुत्थितो नाभेर्हृदयोरुसमाहितः ।
स्वरमध्यस्थितो यस्मात्तेनासौ मध्यमो मतः ॥

---

अथ पंचमलक्षणम् ।

स्वरांतगणां विस्तारं यो मिमीते स पंचमः ।
पाठक्रमेण गणने संख्यायां पंचमोऽथवा ॥
नाभिहृत्कंठमूर्द्धास्योष्ठ्याताग्मातरिश्वनः ।
पंचस्थानसमुद्भूतः कथ्यते पंचमस्तदा ॥
पंचमोप्येकवदनो भिन्नवर्णश्च षट्करः ।
वीणा करद्वये शंखावापि च वराभयौ ॥
स्वयंभूर्दैवतं द्वीपं शाल्मलिः पितृवंशजः ।
कोकिला वाहनं गाता नारदः प्रथमो रसः ॥
वायुः समुत्थितो नाभेरुरोहृत्कंठशिरोहतः ।
पंचकेन च संजातः पंचमस्तेन कथ्यते ॥

---

अथ धैवतलक्षणम् ।

धीर्यस्यास्ति स धीवांस्तत्संबंधी धैवतः स्मृतः ।
पृष्ठस्थाने धृतो यस्मात्तो वा धैवतः स्मृतः ॥
धैवतो गौरवर्णस्यादेकवक्त्रश्चतुर्भुजः ।
वीणामुकुलशंखदांगफलशोभितसत्करः ॥
शंभुस्तु दैवतं द्वीपं श्वेतं स्याद्दृषिजं कुलम् ।
रसो भयानकश्चाश्वो यानं गाता तु तुंबरुः ॥
वायुः समुत्थितो नाभेरुरोदंतः शिरस्तथा ।
कंठस्थानस्थितो यस्मात्तेनासौ धैवतो मतः ॥

---

अथ निषादलक्षणम् ।

निषीदंति स्वराः सर्वे निषादस्तेन कथ्यते ।
निषादो गजवक्त्रः स्याच्चित्रवर्णश्चतुर्भुजः ॥
त्रिशूलपद्मपरशुबीजपूरकसत्करः ।
गणेशो दैवतं क्रौंचद्वीपं वंशः सुपर्वजः ॥
गाता तु तुंबरुः शांतो रसः स्याद्वाहनं गजः ।
निषीदंति स्वराः सर्वे निषादस्तेन हेतुना ॥
वन्हिर्वेधाश्शशांकश्च लक्ष्मीकांतश्च नारदः ।
ऋषयो ददृशुः एंच षड्जादींस्तुंबरुर्ध्वनी ॥
क्रमादनुष्टुप् गायत्री त्रिष्टुप् च बृहती ततः ।
पंक्तिरुष्णिक् च जगतीत्याहुः छंदांसि सादिषु ॥
मयूरचातकच्छागक्रौंचकोकिलदर्दुराः ।
गजश्च सप्त षड्जादीन्क्रमादुच्चारयंत्यमी ॥
कंठे च वसेत् षड्जः शीर्षे तु ऋषभो वसेत् ।
नासिकायां तु गांधारो वसेदुरसि मध्यमः ॥
पंचमो नाभिदेशे तु ललाटे धैवतो वसेत् ।
निषादो ब्रह्मरंध्रे तु स्वरस्थानमितीरितम् ॥
सौकर्यार्थं प्रयोगस्य तेषामाद्याक्षरैर्भवेत् ।
समुदितैः स रि ग म प ध नीत्यभिधोत्तमम् ॥
मतंगादिमतादस्य वर्णोद्धारक्रमो बुधैः ।
आद्याक्षरव्यंजनस्य सरिगादेः कथं भवेत् ॥
स्वरत्वमितिचेदाम नारदादिमुनीश्वरैः ।
संकेतमात्रमेवैतद्व्यवहार्यपरिभाषया ॥
तस्मात्सरिगमादीनां स्वरत्वं न विरुध्यते ।
उच्चौनिषादगांधारौ नीचैरृषभधैवतौ ॥
शेषास्तु स्वरिता ज्ञेया षड्जमध्यमपंचमाः ।
वायुःघातात्समुत्पन्नः श्रुत्याख्यप्रथमध्वनिः ॥



समनंतरभावीयः स्निग्धोऽनुध्वानरूपवान् ।
मनोनुरंजको नृणां विनैवसहकारिणम् ॥
स स्वरः कथ्यते धीरैः स्वरशास्त्रविशारदैः ।
ते स्वरा द्विविधा प्रोक्ता ध्वनिवर्णात्मभेदतः ॥
स्युर्वर्णात्मकाः सप्त जिव्हकास्तु स्वरौ मतौ ।
जिव्हामूलीयोपध्मानीयानुस्वारविसर्गकाः ॥
स्वरवत्वकाचिद्यस्य गव्यूतिस्तदुदाहृतिः ।
एवं चतुर्दश प्रोक्ताः कैश्चिद्द्वादशसंस्मृताः ॥
स्तः परौ प्रागर्द्धविसर्गौ परिकीर्तितौ ।
अष्टादश त्रयाणां स्युः चतुर्णां द्वादशस्मृताः ॥
द्वयोः त्रिंशत् पृथक् प्रोक्ताः स्वरभेदा मनीषिभिः ।
अष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा ॥
जिव्हामूलं च दंताश्च नासिकौष्ठौ च तालु च ।
शिवशकुन्यालकौ वर्णौ शक्तिमात्र बुधैः स्मृता ॥
कलर्द्धमात्रिका प्रोक्ता तदुच्चारः पृथक् हितम् ।
प्रस्तारस्य क्रमं वक्ति भावभट्टः प्रसन्नधीः ॥
वक्ष्यामि वर्णविस्तारं प्रबंधानां प्रकीर्तये ।
ननु श्रुतिश्चतुर्थ्यादिरस्त्वेवं स्वरकारणम् ॥
ऽद्यादीनां तत्र पूर्वासां श्रुतीनां हेतुता कथम् ।
ब्रूमस्तुर्यातृतीयादिः श्रुतिः पूर्वाभिकांक्षया ॥
निर्धार्यतेऽतः श्रुतयः पूर्वा अप्यत्र हेतवः ।
यद्येवमस्तु तुर्यादिश्रुतिरेवास्य कारणम् ॥
न तन्निर्धारणं तत्र ऽद्यादीनामपि हेतुना ।
त्रय एव स्वराः संतु षड्जमध्यमपंचमाः ॥
अथवा ऋषभाद्यास्ते तदवस्थांतरोद्भवाः ।
मंद्रादि[illegible]भेदेन कथ्यंते त्रिविधा स्वराः ॥

त एव विकृताः संतो भवंति द्वादशस्वराः ।
ननु च्युतादयः संतु पृथगेव स्वरा न हि ॥
षड्जादेरेव भेदास्तु स्युरवस्थांतरोद्भवाः ।
धर्मिकल्पनतो धर्मः कल्पनालाघवं यतः ॥
इति चेदुच्यते सप्त स्वरा लोकप्रसिद्धितः ।
सप्तस्वरास्त्रयो ग्रामा इत्यादिस्मरणादपि ॥
तद्द्विधा तत्र शुद्धा ये कथिता विस्तरान्मया ।

इति श्रीसंगीतानूपविलासे शुद्धस्वरभावप्रकाशो नामैकादशप्रकाशः ।

---

अथ विकृतस्वराः ।

विकृतानां स्वराणां तु लक्षणं प्रोच्यतेऽधुना ।
येषां शुद्धत्वहानिः स्यात्ते स्वरा विकृता मताः ॥
हानिस्तु द्विविधा प्रोक्ता तत्रांतर्बाह्यगोचरा ।
बाह्यगोचरतां याति विकृतत्वं द्विधा ततः ॥
स्वभावात्तदभावात्तु भवन्त्येव न संशयः ।
इति रागप्रबोधोक्तदूषणस्य निराकृतिः ॥
रत्नाकरे द्वादशैव तिथिसंख्या परे ततः ।
द्वाविंशतिर्मतंगोक्तास्तेऽहोबलेन कीर्तिताः ॥

---

तत्र रत्नाकरोक्त द्वादशभेदानाह ।

चतुःश्रुतिर्यदा षड्जो द्विश्रुतिर्विकृतस्तदा ।
षड्जसाधारणे तत्र च्युतभेदो भवेदिह ॥
काकलीत्वे निषादस्य स स्यादच्युतसंज्ञकः ।
षड्जसाधारणः षाड्जीमृषभः साश्रितः श्रुतिम् ॥
चतुःश्रुतिः स्वांतरत्वे तद्भेदौ कीर्तितौ तदा ।
च्युताच्युतप्रभेदौ तु मध्यमस्यापि षड्जवत् ॥



ग्रामस्वरो मेरुसंस्थो ध्रुववत्स्यात्कथं च्युतः ।
च्युतस्यापि कथं तस्याच्युतत्वं परिकीर्तितम् ॥
उच्यते भावभट्टेन ग्रामस्वरे च्युतिर्न हि ।
षड्जग्रामे मध्यमस्य षड्जस्यापि च मध्यमे ॥
भिन्नग्रामे च्युतिरस्ति स्वग्रामे न कदाचन ।
यथाऽभावो द्वयस्यैव भवितुं तत्र नार्हति ॥
षण्णां स्वराणां षड्जस्याविर्भावस्तु मुनीरितः ।
भेदद्वयं मूर्छनायां तस्मान्द्भवितुमर्हति ॥
साधारणे तु तत्राद्यमंतरत्वेऽपरं स्मृतम् ।
पंचमस्तु यदोपांत्यतंत्रीमायाति सारणात् ॥
त्रिःश्रुतिः स्यात्तदैकस्तु द्वितीयः कैशिको भवेत् ।
चतुःश्रुतित्वं तस्यैव मध्यमश्रुतिलाभतः ॥
मध्यमाख्ये यदा ग्रामे धैवतस्याचतुःश्रुतिः ।
तदैको विकृतो भेदो निषादस्त्रिचतुःश्रुतिः ॥
कैशिके काकलित्वे च द्वौ भेदौ भवतस्तथा ।
शुद्धैः सह भवंत्येषां भेदा एकोनविंशतिः ॥

---

अथ पारिजातोक्तमतमाह ।

शुद्धाः सप्त विकाराख्या स्वरा द्वाविंशतिर्मताः ।
एकोनत्रिंशदुच्यंते ते सर्वे मिलिताः स्वराः ॥
स्वरः स्वोत्तरगामी चेत्तीव्रादिवचनोदितः ।
स्वरोऽग्रिमश्रुतिं याति तीव्रसंज्ञां प्रयात्यसौ ॥
स्वरोऽग्रिमश्रुतिं याति तदा तीव्रतरो भवेत् ।
स्वरोऽग्रिमश्रुतिं याति तर्हि तीव्रतमः स्मृतः ॥
चतस्रः श्रुतयो यस्मिन्नधिकाः स्युर्यदा स्वरः ।
अतितीव्रतमाख्यां स चाप्नोतीति बुधा जगुः ॥

स्वरः पश्चान्निवृत्तश्चेत्कोमलादिभिरीरितः ।
एकश्रुतिपरित्यागात्स्वरः कोमलसंज्ञकः ॥
श्रुतिद्वयपरित्यागात्पूर्वशब्देन भण्यते ।
स्वरः पश्चान्निवृत्तस्तु कोमलादित्वमेति चेत् ॥
तदुत्तरस्वरे गच्छंस्तीव्रत्वादिकमेति चेत् ।
तस्मात् शुद्धस्वरादेवं मासंख्याः श्रुतीर्जगुः ॥
साधारणं भवेत्तेषामन्यश्रुतिगतत्वतः ।
साधारणो रिस्तीव्रः स्यादिति सूरिविनिश्चयः ॥
साधारणांतरौ गौ स्तस्तीव्रतीव्रतराविति ।
तथा तीव्रतमो गोऽपि मृदुम इति कीर्तितः ॥
साधारणांतरौ मौ स्तः तीव्रतीव्रतराविति ।
मश्च तीव्रतमोऽप्युक्तो मृदुप इति पंडितैः ॥
साधारणो धस्तीव्रः स्यादिति प्रोक्तो मुनीश्वरैः ।
साधारणः काकलीति तथा कैशिक इत्यपि ॥
तीव्रतीव्रतरस्तीव्रतमोऽप्युक्तो मुनीश्वरैः ।
सकल्पत्वान्मृदुसो निरतितीव्रतमो भवेत् ॥
एवं शुद्धस्वराणां च विकृतानां च लक्षणम् ।
संगीतशास्त्रवेत्तारः प्रवदंति मुनीश्वराः ॥

सकलकलामतेः—

द्वादशविकृतान् पूर्वे वदंति तत्र तु पृथक् पृथक् ध्वनिकः ।
सप्तैव स्युर्भिन्ना न पंच यदिमे समध्वनयः ॥
चत्वारिंशत्तु ते प्रोक्ता द्व्यधिका भावसंमताः ।
अन्तर्भावस्तयोरत्र भावभट्टेन कीर्तितः ॥
पंचषड्भिस्तु रेखाभिर्ग्रामचक्रमुदीरितम् ।
मेलानां दुर्घटानां तु ग्रामत्रयोपजीविनाम् ॥
सुखबोधाय मेलानां प्रस्तारस्सूच्यतेऽधुना ।
हृदि मन्द्रो गले मध्यो मूर्ध्नि तार इति क्रमात् ॥



द्विगुणः द्विगुणः प्रोक्तः स्वशरीरे मुनीश्वरैः ।
अथ प्रकारभेदेन चातुर्विध्यं निरूप्यते ॥
वादी संवादिवादाख्योऽस्ति विवाद्यनुवादिनौ ।
कथितौ वदनाद्वादी प्रयोगव्यापनादपि ॥
वदनं नाम रागस्य रागत्वजननं स्मृतम् ।
एवं निर्वाहकत्वेन संवादी स्वर उच्यते ॥
वाद्यादिस्वररक्तेस्तु नाशकत्वं विवादिता ।
वादिसंवादिसंवाद्य रक्तिद्वयोर्महीयते ॥
एतदेवोक्तं वादित्वमथ लक्षणमुच्यते ।
ग्रहन्यासादिभेदेन जात्यादौ यः पुनः पुनः ॥
आवर्त्यते स वादी स्यात्संवाद्यथ निरूप्यते ।
तल्लक्षणार्थमादौ तु प्रस्तारद्वयमुच्यते ॥

---

### अथ ग्रामचक्रलक्षणम् ।

षडूर्ध्वरेखा प्रविलिख्य धीमान् ।
अग्रावशेषेण च पंचमध्ये ॥
रेखालिखेत्तिर्यगथाग्रभागे ।
द्वाविंशतिर्मंडलकादि[illegible]ताः ॥
वीणाप्रस्तारके तिर्यग्रेखा द्वाविंशतिर्लिखेत् ।
द्वाविंशतिर्भवेत्यत्र रेखाग्राण्यपि पार्श्वयोः ॥
श्रुतिमंडल एकस्मिन् रेखाग्रेषु समालिखेत् ।
शुद्धान्वा विकृतान् षड्जादिकान् स्वश्रुतिसंख्यया ॥
श्रुतयो द्वादशाष्टौ वा ययोर्मध्ये भवंति हि ।
श्रुतिं विहाय स्वाधारां तौ तु संवादिनौ मिथः ॥
यथा निषादगांधारौ तावेवान्यविवादिनौ ।
नन्वुक्तं यद्विवादित्वं निगयो रिधयोः प्रति ॥

तत्र युज्येत संवादो दृश्यते मनिषादयोः ।
समश्रुतिकयोरेव संवादित्वं तु सन्मते ॥
तन्मते नैतदुक्तं यन्निगावन्यविवादिनौ ।
स्वमते रिधयोरेव तौ तयोर्वा रिधावपि ॥
एकश्रुत्यंतरित्वं हि विवादीस्वरलक्षणम् ।
द्व्यंतरत्वविवादित्वं मतंगेन तदीरितम् ॥
द्वयोरेकस्वराधारश्रुत्या सह विवक्षितम् ।
यदन्यदपि तेनोक्तं त्रयोदशनवांतरम् ॥
संवादिलक्षणं तत्तु पूर्वोक्तमतभेदतः ।
येषु स्वरेषु वाद्यादिलक्षणं नोपलक्ष्यते ॥
विवादिनस्तु ते प्रोक्ताः स्वराः स्वरविचक्षणैः ।

इति नादस्थानप्रकरणम् ।

---

## अथ ग्रामाः ।

रत्नाकरेः—

ग्रामः स्वरसमूहः स्यान्मूर्छनादेः समाश्रयः ।
तौ द्वौ धरातले तत्र स्यात्षड्जग्राम आदिमः ॥
द्वितीयो मध्यमग्रामस्तयोर्लक्षणमुच्यते ।
षड्जग्रामः पंचमे स्वचतुर्थश्रुतिसंस्थिते ॥
स्वोपान्त्यश्रुतिसंस्थेऽस्मिन्मध्यमग्राम इष्यते ।
यद्वा धस्त्रिश्रुतिः षड्जे मध्यमे तु चतुःश्रुतिः ॥
रिधयोः श्रुतिमेकैकां गांधारश्चेत्समाश्रयेत् ।
पश्रुतिं धो निषादस्तु धश्रुतिं सश्रुतिं स्थितः ॥
गांधारग्राममाचष्टे तदा तं नारदो मुनिः ।
प्रवर्तते स्वर्गलोके ग्रामोऽसौ न महीतले ॥

संगीतसारे—

एकत्र वसतिस्थानं यथा लोके कुटुंबिनाम् ।
सर्वौ श्रुत्यधिकौ यस्मादेवताकुलसंभवौ ॥



संमतौ द्वौ मतौ ग्रामौ षड्जपंचमसंज्ञकौ ।
गांधारस्तु तृतीयः स्यान्नारदो मुनिरब्रवीत् ॥
प्रवर्तते स्वर्गलोके ग्रामोऽसौ न महीतले ।
क्रमाद्ग्रामत्रये देवा ब्रह्माविष्णुमहेश्वराः ॥
त्रिचतुःश्रुतिकौ यत्र स्वरौ संवादिनौ पमौ ।
त्रिचतुर्थौ च षड्जस्य षड्जग्रामसविस्तरः ॥
त्रिचतुः श्रुतिकौ यत्र पधौ संवादिनौ स्वरौ ।
ऋषभस्य तु विद्वद्भिः सग्रामो मध्यमः स्मृतः ॥
समूलं वाचिनौ ग्रामौ श्रुत्यादिस्वरसंभवौ ।
यथा कुटुंबिनः सर्वे एकीभूता वसंति हि ॥

यथा श्रुतिस्वरमूर्छनानानाजातिरागाणां व्यवस्थैकत्वं नाम स एव ग्रामः ।

तथा च श्रीनिवासस्य पारिजातमते पुनः ।
मध्यमे मेरुसंस्थेऽस्मिन् मध्यमग्रामसंभवः ॥
यदा तदैव तास्मिन्नः श्रुतीर्गाति स पंचमः ।
निषादस्त्रिश्रुतिस्तत्र ब्रूयुर्लक्षणकोविदाः ॥
अन्ये त्रिश्रुतिभिर्युक्ताः स्वग्रामस्थस्वरा इव ।
श्रुतित्रयसमायुक्तो यदा गो मेरुगो भवेत् ॥
गांधारग्राम आख्यातः तिसृभिः श्रुतिभिः परे ।
मपधास्तत्रयुक्ताः स्युः षड्जोऽपि तिसृभिर्युतः ॥
चतुःश्रुतिर्निषादः स्यादृषभस्त्रिश्रुतिः पुनः ।
पंचमः स्वितिशिष्टेषु ग्रामत्वं नाभिगच्छति ॥
स्वरसंवादिसिद्ध्यर्थं गमग्रामौ सतां मतौ ।
ग्रामभेदेन [illegible]रागभेदो न विद्यते ॥
यथा जनसमूह[illegible] लोके ग्रामो निगद्यते ।
एवं स्वरसमूहो [illegible] मूर्छनादेः समाश्रयः ॥

ग्राम इत्युच्यते स्यादौ द्वौ ग्रामौ षड्जमध्यमौ ।
नन्वेवं तर्हि किमस्यात्सप्तानां ग्रामसन्धिता ॥
उच्यते शुद्धविकृतस्वरूपेण द्विधा मतः ।
स्वरप्रयोगस्तस्माद्वौ ग्रामौ शुद्धेतराश्रयौ ॥
द्वौ ग्रामौ विश्रुतौ लोके षड्जमध्यमसंज्ञकौ ।
एवं निगदिता श्रीमन्मुनेरप्यत्र संमतिः ॥

शुद्धाश्रयत्वात्तत्राद्यः षड्जग्रामः प्रकीर्तितः ।
द्वितीयो मध्यमग्रामो विकृतस्वरसंश्रयः ॥
आदिमः सप्तदश्यां चेत् श्रुतौ पंचमसंस्थितिः ।
षड्जग्रामस्तदा प्रोक्तः षोडश्यां पंचमस्थितौ ॥
कथितो मध्यमग्रामो यद्वा मध्यमपंचमौ ।
स्वरौ शुद्धस्य षड्जस्य संवादमुपगच्छतः ॥
धैवतस्त्रिश्रुतिर्यत्र स ग्रामः षड्जसंज्ञकः ।
त्रिचतुःश्रुतिकौ यत्र पधौ संवादिनौ स्वरौ ॥
ऋषभस्य भवेतां स ग्रामो मध्यमसंज्ञकः ।
अत्राह श्रुतयः षड्जे यास्ता एव तु मध्यमे ॥
कारणं च समं तस्मिन् भेदस्य ग्रामयोः कथम् ।
उच्यते श्रुतयो नात्र भेदकाः किंतु पंचमः ॥
भेदको ग्रामभेदस्तु तदा यतो यतः स्मृतः ।
स्यादेतद्धैवतस्यापि भेदकत्वं कथिच्छ्रुतम् ॥

सत्यप्येतस्य तानैस्तत्स्वविकारान् विकारतः ।
त्रिचतुःश्रुतिकत्वं च पंचमस्यावबोधयत् ॥
उपलक्षणमेव स्यात् ग्रामयोर्ननु भेदकः ।
चतुःश्रुतिश्चेद् गांधारो रिमयोः श्रुतिसंश्रयात् ॥
पश्रुतिं धैवतो गच्छेन्निषादो सधयोः श्रुतिम् ।
समाश्रयेत्तदा ग्रामो गांधाराख्यो मुनीरितः ॥



दिवि प्रवर्तते ग्रामो दुर्घटत्वान्न भूतले ।
संवादिस्वरबाहुल्यादाद्यत्वाद्धि निसर्गतः ॥
ग्रामः षड्जः प्रधानः स्यान्मध्यमोप्यविलोपनात् ।
मध्यमव्यतिरिक्तानां षाडवौडुवकारिता ॥
न लोपो मध्यमस्यातो भरताद्यैरुदीरितः ।
गीर्वाणैककुलत्वाच्च गांधारेऽपि प्रधानता ॥
विश्लेषणं च ग्रामाणामतएव त्रिभिः स्वरैः ।

## अथ मूर्छनाः ।

स्वरारोहावरोहाभ्यां रागोऽभिव्यज्यते यया ।
श्रोता दा मुह्यते सा तु मूर्छना परिकीर्तिता ॥

रत्नाकरे:-

यद्वा स्वराणां सप्तानामारोहश्चावरोहणम् ।
मूर्छनेत्युच्यते ग्रामद्वये ताः सप्त सप्त च ॥

पारिजाते:-

आरोहश्चावरोहश्च स्वराणां जायते यदा ।
तां मूर्छनां तदा लोक आहुर्ग्रामाश्रयां बुधाः ॥

शृंगारहारे:-

अथातः प्रोच्यते सम्यक् मूर्छनानां च लक्षणम् ।
तत्र मूर्छनेति किमुच्यते ।
क्रमात्सप्तस्वरारोहो मूर्छनोक्ता यथातुना ॥
अवरोहश्च ता ग्रामद्वयेषु सप्त सप्त च ।
सप्तस्वरा मूर्छनात्र चतुर्धा परिकीर्तिता ॥
संपूर्णा च षाडवौडुवा साधारणेति च ।
पूर्णात्र सप्तभिर्ज्ञेया षड्भिः षाडवसंज्ञिका ॥
पंचभिश्चौडुवा तु या काकल्यंतरसंभवा ।
स्यात्क्रमसमायोगे मूर्छनारंभसंभवः ॥

तत्र मध्यस्थषड्जेन षड्जग्रामस्य मूर्छना ।
प्रथमारभ्यतेऽन्यास्तु निषादाद्यैरधस्तनैः ॥
मध्यमध्यममारभ्य मध्यमग्राममूर्छना ।
षडन्यास्तदधोधस्थस्वरानारभ्य षट्क्रमात् ॥

---

## अथ मूर्छनानां नामानि ।

षड्जे तूत्तरमंद्राद्या रजनी चोत्तरायता ।
शुद्धषड्जा मत्सरीकृताश्वक्रांताभिरुद्गता ॥
सौवीरी मध्यमग्रामे हारिणाश्वा ततः परा ।
स्यात्कलोपनता शुद्धमध्या मार्गी च पौरवी ॥
हृष्यका सप्तमी प्रोक्ता मध्यमग्राममूर्छना ।
नंदा विशाला सुमुखी चित्रा चित्रावती सुखा ॥
आलापा चेति गांधारग्रामे स्युः सप्त मूर्छनाः ।
ताश्च स्वर्गे प्रयोक्तव्या विशेषात्तेन नोदिताः ॥
पृथक् चतुर्विधाः शुद्धा काकलीकलितास्तथा ।
सांतरास्तद्द्वयोपेताः षट्पंचाशत्तु मूर्छनाः ॥

---

## अथ शुद्धतानाः ।

शृंगारहारे:—

तन्यंत इति तानाः स्युस्तनुविस्तारधातुना ।
इदानीं चैव तानानां सम्यक्लक्षणमुच्यते ॥
तानाः स्युर्मूर्छनाः शुद्धाः षाडवौडुविनीकृताः ।
मूर्छनाः शुद्धतानाः स्युर्हीना सरिपसप्तमैः ॥
तेषां भेदा ह्यनंताः स्युः क्रियमाणाः प्रयोगतः ।
तथाप्येकोनपंचाशत्षाडवा औडुवास्ततः ॥
पंचत्रिंशच्चदुभयमशीतिश्चतुरुत्तराः ।



रत्नाकरे:—

तानाः स्युर्मूर्छनाः शुद्धाः षाडवौडुविताकृताः ॥
षड्जगाः सप्तहीनाःस्वेरक्रमात्सरिपसप्तमैः ।
तदाऽष्टाविंशतिस्ताना मध्यमे सरिगोज्झिताः ॥
सप्त क्रमाद्यदा तानाः स्युस्तदा त्वेकविंशतिः ।
एते चैकोनपंचाशदुभये षाडवाभुताः ।
सपाभ्यां द्विश्रुतिभ्यां च रिपाभ्यां सप्त वर्जिताः ॥
षड्जग्रामे पृथक् ताना एकविंशतिरौडुवाः ॥
रिधाभ्यां द्विश्रुतिभ्यां च मध्यमग्रामगास्तु ते ।
हीनाश्चतुर्दशैव स्युः पंचत्रिंशत्तु ते युताः ॥
सर्वे चतुरशीतिः स्युर्मिलिताः षाडवौडुवाः ।

---

## अथात्र शुद्धतानानां नामानि व्याहरामहे ।

अग्निष्टोमोऽत्यग्निष्टोमो वाजपेयश्च षोडशी ।
पुंडरीकोऽश्वमेधश्च राजसूयस्ततः परः ॥
इति स्युः षड्जहीनानां तानानामभिधा इमाः ।
अश्वक्रांतो रथक्रांतो विष्णुक्रांतस्ततः परः ॥
सूर्यक्रांतो गजक्रांतो बलिभिन्नामपक्षकः ।
इतिपंचमहीनानां संज्ञाः सप्त क्रमान्मताः ॥
चातुर्मास्योऽथ संस्थाख्यः शस्त्र उक्थश्चतुर्थकः ।
सौत्रामणी तथा चित्रा सप्तमस्तूद्भिदाह्वयः ॥
संज्ञा निषादहीनानां षाडवानामिमाः क्रमात् ।
इति षड्जग्रामिकैकविंशतितानानामानि ।
सावित्री चार्धसावित्री सर्वतोभद्रसंज्ञकः ।
आदित्यायननामश्च स्याद्गवायननामकः ॥
सर्पाणामयनः षष्ठः सप्तमः कौंडपायनः ।
नामानि षड्जहीनानां तानानामिति मेनिरे ॥

अग्निनिष्टो दशाहश्चोपांशुः सोमाभिधस्ततः ।
अश्वप्रतिग्रहो बर्हिरथाभ्युदयसंज्ञकः ॥
ऋषभेण विहीनानामिति नामानि मन्वते ।
सर्वस्वदक्षिणो दक्षः सोमाख्यः समिदाह्वयः ॥
स्वाहाकारस्तनूनपात्ततो गोदोहनो मतः ।
इति गांधारहीनानां क्रमात्संज्ञाः प्रचक्षते ॥

इति षड्जग्रामिकैकविंशतिषाडवताननामानि ।

इडा पुरुषमेधश्च श्येनो वज्र इषुस्ततः ।
अंगिराः कंक इत्येताः सपहीनाभिधाः क्रमात् ॥
ज्योतिष्टोमस्ततो दर्शो नन्दाख्यः पौर्णमासकः ।
अश्वप्रतिग्रहो रात्रिः सौरभः सप्तमः स्मृतः ॥
एता निषादगांधारहीनानामभिधाः क्रमात् ।
सौभाग्यकृच्चक्रधारी शांतिकृत्पुष्टिकृत्तथा ॥
वैनतेयोच्चाटनौ च वशीकरणसंज्ञकः ।
पंचमर्षभहीनानां तानानामभिधा इमाः ॥

इति षड्जग्रामिकैकविंशत्यौडुवताननामानि ।

त्रैलोक्यमोहनो वीरः कंदर्पजनशातनः ।
शंखचूडो गजच्छायो रौद्राख्यो विष्णुविक्रमः ॥
तानानां रिधहीनानां नामान्येतान्यनुक्रमात् ।
भैरवः कामदाख्यश्चावभृतोऽष्टकपालकः ॥
स्विष्टकृच्च वषट्कारो मोक्षदः सप्तमो मतः ।
संज्ञा निषादगांधारहीनानामिति संमताः ॥

इति मध्यमग्रामिकचतुर्दशौडुवताननामानि ।

यद्यज्ञनाम्ना यस्तानस्तस्य तत्फलमिष्यते ।
गांधर्वे मूर्छनास्तानाः श्रेयसे श्रुतिबोधिताः ॥
गाने स्थानस्य लाभेन ते कूटाश्चोपयोगिनः ।

---



अथ कूटतानाः ।

असंपूर्णाश्च संपूर्णा व्युत्क्रमोच्चारितस्वराः ।
मूर्छनाः कूटतानाः स्युस्तत्संख्यामभिदध्महे ॥
पूर्णाः पञ्च सहस्राणि चत्वारिंशच्छतानि तु ।
एकैकस्या मूर्छनायाः कूटतानाः स्युः क्रमैः ॥
षट्पञ्चाशन्मूर्छनास्थाः पूर्णाः कूटास्तु योजिताः ।
लक्षद्वयं सहस्राणि द्व्यशीतिर्द्वे शते तथा ॥
चत्वारिंशत्तु संख्याता अथापूर्णान्प्रचक्ष्महे ।
एकैकान्त्यान्त्यविरहाद्भेदाः षट्-षट्स्वरादयः ॥
एकस्वरोऽत्र निर्भेदोऽप्युक्तो नष्टादिसिद्धये ।
क्रमाश्चाकूटतानत्वेऽप्युक्तास्तेषूपयोगिनः ॥
स्युः षाडवानां विंशत्या सह सप्त शतानि तु ।
औडुवानां तु विंशत्या सहितं शतमिष्यते ॥
चतुःस्वराणां कूटानां चतुर्विंशतिरीरिताः ।
त्रिस्वराः षट् द्विस्वरौ द्वावेकस्त्वेकस्वरो मतः ॥
आर्चिको गाथिकश्चाथ सामिकोऽथ स्वरान्तरः ।
एकस्वरादितानानां चतुर्णामभिधा इमाः ॥
उक्तशुद्धादिभेदेन निगयुक्ताश्चतुर्विधाः ।
तयोरेकैकहीनाश्च द्वेधा मूलक्रमा मताः ॥
षड्जाद्यौ मध्यमाद्यौ च चत्वारः स्युर्द्विधा द्विधा ।
चतुर्धाऽन्ये दशेत्यष्टाचत्वारिंशदमी क्रमाः ॥
सविंशतिः सप्तशती प्रागुक्ता गुणिता क्रमैः ।
चतुस्त्रिंशत्सहस्राणि षष्ट्या पञ्च शतानि च ॥
इति षाडवसंख्या स्यादथ पञ्चस्वरान्ब्रुवे ।
गाद्यौ धाद्यौ निषादाद्यौ चतुर्भेदाः षडौडुवाः ॥
अष्टावन्ये द्विधेत्येवं चत्वारिंशदिमे क्रमाः ।
सविंशति शतं तैश्च गुणितेऽष्टौ शतानि तु ॥

चत्वारि च सहस्राणि संख्या पञ्चस्वरेष्विति ।
चतुःस्वरेषु न्यादिद्वौ चतुर्धा द्वादशापरे ॥
क्रमा द्विधेति द्वात्रिंशच्चतुर्विंशतिताडिताः ।
शतानि सप्ताष्टषष्ट्या स्याच्चतुःस्वरसंमितिः ॥
त्रिस्वरेषु तु माद्यौ द्वावभेदौ द्वादशापरे ।
द्विधा षड्विंशतिरिति क्रमास्ते षड्भिराहताः ॥
षट्पञ्चाशच्छतं च स्युर्द्विस्वरेषु पुनर्द्विधा ।
रिगधन्यादयोऽष्टौ स्युः शुद्धाः षडितरे क्रमाः ॥
द्वाविंशतिस्ते तु चतुश्चत्वारिंशद्द्विताडिताः ।
एकस्वरास्त्वभेदत्वान्मौला एव चतुर्दश ॥
षड्जादेः शुद्धमध्याया भेदकं पञ्चमं विना ।
चतुःस्वरे क्रमाद्द्वंद्वेऽष्टाचत्वारिंशदीरिताः ॥
तानास्त्रिस्वरयोस्त्वेते द्वादश द्विस्वरे द्वयम् ।
एक एव स्वरस्ते त्रिषष्टिरौत्तरमन्द्रकैः ॥
पुनरुक्ता मतास्तानैर्न्यादिमार्गीक्रमाः पुनः ।
पञ्चस्वरा ये चत्वारस्तत्तानानां चतुःशती ॥
अशीत्यभ्यधिका चातुःस्वरी षण्णवतिर्भवेत् ।
द्वादश त्रिस्वरद्वंद्वे चत्वारो द्विस्वरद्वये ॥
एक एकस्वरस्तानस्तेषां पञ्चशती त्वियम् ।
त्रिनवत्या युता तानैरभिन्ना रजनीगतैः ॥
धैवतादेस्तु पौरव्याश्चत्वारः षट्स्वराः क्रमात् ।
तत्तानानां तु साशीतिः शताष्टाविंशतिर्मता ॥
औडुवानां चतुर्णां प्रागुक्ता संख्या चतुःस्वरौ ।
त्रिस्वरौ द्विस्वरावेकस्वरः प्रागुक्तसंख्यकाः ॥
पञ्चविंशतिसंयुक्ता चतुस्त्रिंशच्छती त्वियम् ।
तानानां सदृशाकारा स्यात्तानैरौत्तरायतैः ॥



इत्येकाशीतिसंयुक्तं सहस्राणां चतुष्टयम् ।
तानानां पुनरुक्तानां पूर्णापूर्णैः सह क्रमैः ॥
अपनीयेत चेदेषा कूटतानमितिर्भवेत् ।
लक्षत्रयं सप्तदश सहस्राणि शतानि च ॥
नवत्रिंशद्युतानीति ज्ञानोपायोऽत्र कथ्यते ।
सहस्रैः सप्तदशभिर्युतं लक्षत्रयं तथा ॥
शतानि नव षष्टिश्च सैका कूटाः समासते ।
अङ्कानेकादिसप्तान्तानूर्ध्वमूर्ध्वं लिखेत्क्रमात् ॥
हते पूर्वेण पूर्वेण तेषु चाङ्के परे परे ।
एकस्वरादिसंख्या स्यात्क्रमेण प्रतिमूर्छनम् ॥

---

### अथ प्रस्तारः ।

क्रमं न्यस्य स्वरः स्थाप्यः पूर्वः पूर्वः परादधः ।
स चेदुपरि तत्पूर्वः पुरस्तूपरिवर्तिनः ॥
मूलक्रमक्रमात्पृष्ठे शेषाः प्रस्तार ईदृशः ।

---

### अथ खण्डमेरुः ।

सप्ताद्येकान्तकोष्ठानामधोऽधः सप्त पङ्क्तयः ।
तास्वाद्यायामाद्यकोष्ठे लिखेदेकं परेषु खम् ॥
वेद्यतानस्वरमितान्न्यस्येत्तेष्वेव लोष्ठकान् ।
प्राक्पङ्क्त्यन्त्याङ्कसंयोगमूर्ध्वाधः स्थितपङ्क्तिषु ॥
शून्यादधो लिखेदेकं तं चाधोऽधः स्वकोष्ठकात् ।
कोष्ठसंख्यागुणं न्यस्येत्खण्डमेरुरयं मतः ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| १ | ० | ० | ० | ० | ० | ० |
| | १ | २ | ६ | २४ | १२० | ७२० |
| | | ४ | १२ | ४८ | २४० | १४४० |
| | | | १८ | ७२ | ३६० | २१६० |
| | | | | ९६ | ४८० | २८८० |
| | | | | | ६०० | ३६०० |
| | | | | | | ४३२० |

---

## अथ उद्दिष्टम् ।

स्वरान्मूलक्रमस्यान्त्यात्पूर्वं यावतिथः स्वरः ।
उद्दिष्टान्त्यस्तावतिथे कोष्ठेऽधो लोष्टकं क्षिपेत् ॥
लोष्टचालनमन्त्यात्स्यात्त्यक्त्वा लब्धं क्रमो भवेत् ।
लोष्टाक्रान्ताङ्कसंयोगादुद्दिष्टस्य मितिर्भवेत् ॥

---

## अथ नष्टम् ।

यैरङ्कैर्नष्टसंख्या स्यान्मौलिकाङ्कसमन्वितैः ।
तेषु लोष्टं क्षिपेन्मूले लोष्टस्थानमितं भवेत् ॥
नष्टतानस्वरस्थानं ततो यावतिथे पदे ।
अधः क्रमादस्ति लोष्टः स्वरस्तावतिथो भवेत् ॥



क्रमान्तिमस्वरात्पूर्वो लब्धत्यागादि पूर्ववत् ।
तानस्वरमितोर्ध्वाधः पङ्क्तिगान्त्याङ्कमिश्रणात् ॥
एकस्वरादितानानां संख्या संजायते क्रमात् ।

---

## अथ पारिजातोक्तमूर्छनाः ।

आरोहश्चावरोहश्च स्वराणां जायते यदा ।
तां मूर्छनां तदा लोक आहुर्ग्रामाश्रयां बुधाः ॥
सप्तसंख्यायुतास्ताः स्युस्तासां नामानि वच्म्यहम् ।
तत्र तूत्तरमन्द्रा स्यात्षड्जपूर्वकसंभवा ॥
द्वितीया रजनी प्रोक्ता निषादस्वरपूर्विका ।
धैवतादिस्वरोद्भूता तृतीया चोत्तरायता ॥
चतुर्थी शुद्धषड्जा स्यात्पञ्चमादिस्वरोद्भवा ।
मत्सरीकृताख्या सा मध्यमादिस्वरोद्भवा ॥
अश्वक्रान्ता तु षष्ठी स्याद्गान्धारस्वरपूर्विका ।
ऋषभादिस्वरोद्भूता सप्तम्याख्याभिरुद्गता ॥
आरोहश्चावरोहश्च तथैव विकृतेष्वपि ।
षाडवौडुवरीत्याऽत्र कुर्यादारोहणादिकम् ॥
मध्यषड्जं समारभ्य तदूर्ध्वस्वरमात्रजेत् ।
पूर्वैकैकस्वरं त्यक्त्वा त्वारोहादिकमूह्यताम् ॥
शुद्धासु यानि नामानि तान्येव विकृतेष्वपि ।
पूर्वकोमलतीव्राणामृषभाणां क्रमेण तु ॥
योगे शुद्धस्वरैर्भेदा एकविंशतिरीरिताः ।
रिं तीव्रतरमादाय मूर्छना क्वापि नोदिता ॥
शुद्धगान्धाररहित्याच्छुद्धषड्कावियोगतः ।
कोमलादिकगान्धारैश्चतुर्भिर्विकृतैः स्वरैः ॥
अष्टाविंशतिभेदाः स्युः शेषैः शुद्धस्वरैरिह ।
गस्य पूर्वस्य संयोगे त्वतितीव्रतमस्य च ॥

गस्य योगे रिमौ शुद्धौ न स्तो भेदान्कथं जगः ।
तीव्रादि म-त्रयेणापि भेदास्तत्रैकविंशतिः ॥
पूर्वकोमलतीव्राणां धैवतानां क्रमेण तु ।
योगे शुद्धस्वरैर्भेदा एकविंशतिरीरिताः ॥
धं तीव्रतरमादाय मूर्छना क्वापि नोदिता ।
शुद्धनिषादराहित्याच्छुद्धषट्कवियोगतः ॥
अष्टाविंशतिभेदाः स्युः कोमलादिकनिस्वरैः ।
निषादं पूर्वमादाय मूर्छना क्वापि नोदिता ॥
शुद्धधैवतराहित्याच्छुद्धषट्कवियोगतः ।
शुद्धैर्विकृतभेदाभ्यां ग-रिभ्यां योजितैः स्वरैः ॥
द्वादशभिः शतं भेदा भवंतीति बुधा जगुः ।
यदा स्यातां रिधौ तीव्रौ पूर्वकोमलसंज्ञितौ ॥
गन्योस्तत्पूर्ववृत्तित्वात्तौ तदादाय नो भिदा ।
रिभिस्त्रिभिस्तथा मैश्च विकृतैर्मिलितैः स्वरैः ॥
शुद्धैर्भेदास्त्रिषष्टिः स्युः पञ्चभिश्चापि सोऽब्रवीत् ।
त्रिभी रिभिर्विकाराद्यैस्तादृशैर्धस्वरैरपि ॥
शेषशुद्धस्वरैर्भेदा जायन्तेऽत्र त्रिषष्टिधा ।
पूर्वकोमलतीव्रैश्च कोमलादिकसंज्ञितैः ॥
रिभिस्त्रिभिः स्वरैः शुद्धैरशीतिश्चतुरुत्तराः ।
कोमलादित्वभावैर्गैर्मध्यमैर्विकृतैस्त्रिभिः ॥
पञ्चोत्तरशतं भेदान्स्वरैः शुद्धैर्बुधा जगुः ।
कोमलादिकगान्धारैश्चतुर्भिर्विकृतैस्त्रिभिः ॥
विकृतैर्धैवतैर्भेदा अशीतिश्चतुरुत्तराः ।
चतुर्भिर्विकृतैर्गैश्च निषादैस्तादृशैरपि ॥
भेदाः शुद्धैः समायोगे स्युः शतं द्वादशोत्तरम् ।
त्रिभिर्मैर्विकृतैर्धैश्च पूर्वादिककृतैस्त्रिभिः ॥



पञ्चशुद्धस्वरैर्भेदास्त्रिषष्टिमिति मेनिरे ।
त्रिधा मैश्च निषादैश्च चतुर्भिर्विकृतैः स्वरैः ॥
पञ्चशुद्धस्वरैर्भेदा अशीतिश्चतुरुत्तराः ।
धैवतैर्विकृतैः सर्वैः सर्वैश्च विकृतैर्निभिः ॥
शेषैः शुद्धैः कृता भेदाः स्युः शतं द्वादशोत्तरम् ।
रिभिः सर्वैस्तथा गैश्च विकृतैर्मध्यमैः स्वरैः ॥
शेषशुद्धैश्च भेदाः स्युः सषट्त्रिंशच्छतत्रयम् ।
रिभिः सर्वैस्तथा गैश्च पञ्चभिर्धैवतैस्त्रिभिः ॥
शेषैः शुद्धैश्च भेदाः स्युः सविंशतिचतुःशतम् ।
ऋषभैर्विकृतैः सर्वैर्गान्धारैर्वेदसंमितैः ॥
निस्वरैर्वेदसंख्याकैः शेषैः शुद्धैः स्वरैरपि ।
भेदा भवन्ति साष्टा च चत्वारिंशच्चतुःशती ॥
त्रिभी रिभिस्त्रिभिर्मैश्च त्रिभिर्धैर्विकृतैः स्वरैः ।
वेदशुद्धैश्च भेदाः स्युर्नवाशीत्ययुतं शतम् ॥
रिभिस्त्रिभिस्तथा मैश्च निभिरप्यब्धिसंमितैः ।
अन्यैः शुद्धैश्च भेदाः स्युर्द्वय पञ्च पुनर्द्वयम् ॥
त्रिभी रिभिर्वेदधैश्च निषादैर्बाणसंमितैः ।
वेदशुद्धैश्च भेदाः स्युर्विंशत्या च चतुःशती ॥
बाणगैर्विकृतैः सर्वैर्मैश्च धैरग्निसंमितैः ।
अब्धिशुद्धैश्च भेदाः स्युस्त्रिशती दश पञ्च च ॥
विकृतैः पञ्चभिर्गैर्मैस्त्रिभिरब्धिनिभिस्तथा ।
अन्यैः शुद्धैश्च भेदाः स्युः सविंशतिचतुःशती ॥
अब्धिगैरब्धिधैरब्धिनिभिः शुद्धैः स्वरैरपि ।
भेदा भवन्ति साष्टा तु चत्वारिंशच्चतुःशती ॥
त्रिभिर्मैर्वेदधैश्चापि निषादैरब्धिसंमितैः ।
अब्धिशुद्धैश्च भेदाः स्युः सषट्त्रिंशच्छतत्रयम् ॥

रीणां गानां तथा मानां वह्निधानां च मेलने ।
सहस्रं द्विशती षष्टिर्भेदा उक्ता मनीषिभिः ॥
शून्यं वसू रसश्चन्द्र इति भेदाः प्रकीर्तिताः ।
रीणां गानामब्धिधानां तथा नीनां च मेलने ॥
नेत्रं रन्ध्रं मुनिश्चन्द्रो भेदाश्चात्रेति मेनिरे ।
रिभिस्त्रिभिस्तथा मैश्च वेदधैर्निस्वरैरपि ॥
अष्टोत्तरसहस्रं च भेदा उक्ता मनीषिभिः ।
गानां मानां तथा धानां निषादानां च मेलने ॥
शून्यं वसू रसश्चन्द्र इति भेदाः प्रकीर्तिताः ।
रीणां गानां तथा मानां धानां नीनां च मेलन ॥
षट्सहस्रं च विंशत्या शतं सप्त च संयुताः ।
इति भेदान्मुनीन्द्रास्तु प्राहुः शास्त्रेण बोधितान् ॥
मूर्छनानां प्रभेदानां संपूर्णानां च सर्वशः ।
वसुरब्धी रसाष्टौ च चन्द्रश्चेति मितिर्भवेत् ॥
भवन्ति मूर्छना एता ग्रामेऽस्मिन्षड्जसंज्ञके ।
ग्रामयोर्गमयोरेवं संपूर्णा मूर्छना मताः ॥
मध्यमे मध्यमस्यापि गान्धारे ग स्वरस्य च ।
विकृतत्वं न वक्तव्यं तयोर्यस्मात्प्रधानता ॥
ग-म-ग्रामे ग-मौ त्यक्त्वा मूर्छना नाभिसंमता ।
आद्याद्यमूर्छनाताने संपूर्णे कथिते बुधैः ॥
तानाः पञ्चसहस्राणि चत्वारिंशद्युतानि च ।
तावत्संख्याविशिष्टानां तानानां गणना कृता ॥
खरसेषुरसा नेत्रमब्धिर्वह्निः शशीति च ।
नि-ध-प-म-ग-रीणां तु लोपादथ च षाडवाः ।
क्रमादेकैकसंत्यागात्षड्विंशन्मूर्छना मताः ॥



एवं षाडवशुद्धाः स्युर्विकृता अपि चक्ष्महे ।
त्रयोदश रिभेदाः स्युर्भेदास्तत्सप्तमा मताः ॥
इति भेदा निहीनानामष्टसप्ततिरीरिताः ॥
एवं भेदा ध-हीनानामशीतिश्चतुरुत्तराः ।
तथा भेदाः प-हीनानां स्युः शतं लोचनोत्तरम् ॥
महीनानां तु भेदाः स्युरशीतिश्चतुरुत्तराः ।
तथा गान्धारहीनानामष्टसप्ततिरीरिताः ॥
रि-हीनानामपि ज्ञेया अशीतिश्चतुरुत्तराः ।
चतुर्भिश्च रिभिस्तत्र गान्धारैः पञ्चभिः स्वरैः ॥
षण्णवतिर्निहीनाः स्युर्भेदा उक्ता मनीषिभिः ।
रिभिस्त्रिभिस्तथा मैश्च भेदाः स्युरब्धिराशुगाः ॥
एवं रिभिस्तथा धैश्च भेदास्तावन्त एव हि ।
पञ्चभिर्गैस्त्रिभिर्मैश्च भेदा नवतिरीरिताः ॥
गान्धारधैवतानां तु द्विसप्ततिभिदा मताः ।
मध्यमानां तथा धानां भेदाः स्युरब्धिराशुगाः ॥
इति भेदा नि-हीनानां सविंशतिचतुःशती ।
एवं भेदा धहीनानामशीत्या स्युश्चतुःशती ॥
भेदा ज्ञेयाःपहीनानां रसो बाणो मुनिःक्रमात् ।
म-हीनानामपि ज्ञेयाः षडशीत्या चतुःशती ॥
तथा गान्धारहीनानां लोचनेन चतुःशती ।
ऋषभेणापि हीनानामशीत्या स्युश्चतुःशती ॥
रिभि-गै-मैः स्वभेदैश्च ज्ञेया भेदा विचक्षणैः ।
मूर्छनासु नि-हीनासु षष्ट्या युक्तं शतत्रयम् ॥
रि-ग-धैश्च भिदा ज्ञेयाः साष्टाशीतिशतद्वयम् ।
रि-म-धैश्चापि भेदाः स्युर्द्विषष्ट्या च युतं शतम् ॥
ग-म धैश्च भिदा ज्ञेया सप्तत्या च शतद्वयम् ।
इति भेदा नि-हीनानामशीत्या च सहस्रकम् ॥

तथा भेदा ध-हीनानां खलोचनाग्नयः शशी ।
एवं भेदाः प-हीनानां सहस्रत्रयसंख्यकाः ॥
म-हीनानामपि ज्ञेया वेदौ वह्निः शशी क्रमात् ।
तथा भेदा ग-हीनानामब्धिः शरोऽथ रन्ध्रकम् ॥
इति भेदा रि-हीनानां नेत्राकाशाग्नयः शशी ।
रि-ग-मानां तथा धानां नि-हीनासु विभेदतः ॥
इति योगे भिदा ज्ञेयाः शून्यं वसुर्नभः शशी ।
रि-ग-मानां तथा नीनां ध-हीनासु विभेदतः ॥
इति योगे भिदा ज्ञेयाः शून्यं वेदौ च चन्द्रमाः ।
रि-गाणां च मधानां च मूर्छनासु विभेदतः ॥
योगे भेदाः प-हीनासु स्युरशीत्या सहस्रकम् ।
रि-गाणां च मनीनां च प-हीनासु विभेदतः ॥
मूर्छनासु भिदा योगे खं च वेदौ शशी पुनः ।
रि-ग-धानां तथा नीनां प-हीनासु विभेदतः ॥
योगे तत्र भिदा ज्ञेया रसो वह्निः शरः शशी ।
रि-म-धानां तथा नीनां प-हीनासु विभेदतः ॥
योगे भेदास्तथा ज्ञेयाः सागरश्च रसो वसुः ।
ग-म-धानां तथा नीनां प-हीनासु विभेदतः ॥
योगे तत्र भिदा ज्ञेयाः शून्यं वेदौ शशी पुनः ।
इति भेदाः प-हीनानां स्यू रसौ पावको रसः ॥
रि-गानां च ध-नीनां च म-हीनासु विभेदतः ।
इति योगे भिदा ज्ञेया रसो वह्निः शरः शशी ॥
रि-म-धानां तथा नीनां ग-हीनासु विभेदतः ।
इति योगे भिदा ज्ञेयाः सागरश्च रसो वसुः ॥
ग-म-धानां तथा नीनां रि-हीनासु विभेदतः ।
इति योगे भिदा ज्ञेयाः खं च वेदौ शशी पुनः ॥



रि-ग-म-ध-निषादानां योगे भेदा उदीरिताः ।
खरसमुनिबाणैश्च प-हीनासु मुनीश्वरैः ॥
मूर्छनानां प्रभेदानां षाडवानां च सर्वशः ।
खबाणशून्यचन्द्रैश्च पावकेन मितिर्भवेत् ॥
यत्स्वरेण विहीनायां मूर्छनायां पृथक्पृथक् ।
तत्स्वरेणैव हीनाः स्युः प्रस्ताराः षाडवाः क्रमात् ॥
सप्तशत्या सविंशत्या गुणितानां मितिर्भवेत् ।
शून्यत्रयं रसो नेत्रं सप्त वह्निरिति क्रमात् ॥
औडुवा अथ कथ्यन्ते शुद्धेषु विकृतेष्वपि ।
द्वयोर्द्वयोः परित्यागात्क्रमाद्भेदा मनीषिणः ॥
औडुवानां विशुद्धानामवदन्पञ्चसप्ततिम् ।
रि-भेदास्तत्र संगृह्य द्वाभ्यां द्वाभ्यां विवर्जनात् ॥
भेदानपि विजानीयात्पञ्चाशदुत्तरं शतम् ।
ग-भेदा द्विशती ज्ञेया म-भेदा रि-समा मताः ॥
ध-भेदास्तत्समा ज्ञेया नि-भेदा ग-समा मताः ।
रीणां गानां प्रभेदाः स्युरशीत्या च चतुःशती ॥
रीणां मानां च भेदाः स्युः सप्तत्या च शतद्वयम् ।
रीणां धानां तथा भेदास्तावन्तोऽत्रापि संमताः ॥
रीणां नीनां प्रभेदाः स्युः षष्ट्या युक्तं शतत्रयम् ।
ग-मानां च भिदा ज्ञेयाः सपञ्चाशच्चतुःशती ॥
तथा भेदा ग-धानां च षष्ट्या युक्तं शतत्रयम् ।
ग-नीनां च भिदा ज्ञेया अशीत्या च चतुःशती ॥
म-धानां च प्रभेदाः स्युः सप्तत्या च शतद्वयम् ।
म-नीनां च भिदा ज्ञेयाः षष्ट्या युक्तं शतत्रयम् ॥
ध-नीनां च प्रभेदाः स्युरशीत्या च चतुःशती ।
रि-ग-मानां भिदास्तत्र शून्यद्वन्द्वं च रन्ध्रकम् ॥

150522
VERSITY LIB

रि-ग-धानां प्रभेदाः स्युः शून्यं नेत्रं मुनिस्तथा ।
रि-ग-नीनां भिदा ज्ञेयाः खरसावथ रन्ध्रकम् ॥
रि-म-धानां तथा भेदाः पञ्चोत्तरचतुःशती ।
रि-म-नी-नां प्रभेदाः स्युः खं च वेदः शरस्तथा ॥
रि-ध-नीनां भिदा ज्ञेया शून्यं नेत्रं तथा मुनिः ।
ग-म-धानां तथा भेदाः शरो मुनिस्तथा रसः ॥
ग-म-नीनां प्रभेदाः स्युः शून्यद्वन्द्वं च रन्ध्रकम् ।
ग-ध-नीनां भिदा ज्ञेयाः खरसाङ्कैर्विचक्षणैः ॥
म-ध-नीनां तथा भेदाः शून्यं नेत्रं तथा मुनिः ।
रि- गानां च म-धानां च भेदा नवशतानि च ॥
रि-ग-मानां भिदा नीनां खद्वयं लोचनं शशी ।
रि-ग-धानां च नीनां स्युः खं वसुलोचनं शशी ॥
रि-म-धानां भिदा नीनां शून्यं नेत्रं तथा मुनिः ।
ग-मानां च ध-नीनां स्युः खद्वयं लोचनं शशी ॥
औडुवानां च सर्वेषां मूर्छनानां मितिर्भवेत् ।
सप्तदश सहस्राणि पञ्च पञ्चशतानि च ॥
द्वाभ्यां द्वाभ्यां विहीनायां मूर्छनायां पृथक्पृथक् ।
ताभ्यामेव विहीनाः स्युः प्रस्तारा औडुवाः क्रमात् ॥
सविंशत्या शतेनात्र गुणितानां मिति-र्भवेत् ।
शून्यं नेत्रं शशी शून्यं नेत्रोदधीति संख्यया ॥

अथ मूर्छनाप्रस्तारनष्टोद्दिष्टम् ।

प्रथमस्य द्वितीयस्यावृत्तिरेका स्वरस्य च ।
तृतीयस्य द्विरावृत्तिः स्वरस्यात्र सुनिश्चितः ॥
चतुर्थस्य षडावृत्तिः पञ्चमस्तच्चतुर्गुणः ।
तस्मात्पञ्चगुणः षष्ठः सप्तमः षड्गुणस्ततः ॥
चलितानां स्वराणां तु यथोचितक्रमो भवेत् ।
इति पञ्चसहस्राणि चत्वारिंशद्युतानि च ॥



पूर्णानां षाडवानां तु सप्तशतानि विंशतिः ।
औडुवानां तु विंशत्या शतं भेदान्बुधा जगुः ॥
चतुर्विंशतिभेदाः स्युश्चतुर्णां तत्र निश्चिताः ।
षड्भेदाः स्युस्त्रयाणां तु द्वयोर्द्वावेव निश्चितौ ॥
एकस्यैको भवेद्भेदः प्रस्तारा ईदृशा मताः ।
नष्टोद्दिष्टप्रबोधार्थं खण्डमेरुरथोच्यते ॥
सप्ताद्येकान्त्यकोष्ठः स्याद्वामे हीनास्ततो भवेत् ।
आद्यपंक्त्याद्यकोष्ठेषु लिखेदेकं परेषु खम् ॥
आद्यकोष्ठे द्वितीयस्य पङ्क्तावेकं लिखेदपि ।
पङ्क्तिपूर्व्वासु तिर्यक्षु कोष्ठस्याङ्कगुणं न्यसेत् ॥
शून्येषु लोष्टकान्दत्वा मूलक्रमं ततो लिखेत् ।
उद्दिष्टं तदधः कृत्वा ततो लोष्टस्य चालनम् ॥
उद्दिष्टान्तस्वरो मूलक्रमस्यान्त्यात्कियत्तमः ।
तावत्संख्याविशिष्टे च कोष्ठे लोष्टकमाक्षिपेत् ॥
लोष्टचालनमन्त्यात्स्याल्लब्धं त्यक्त्वा क्रमो भवेत् ।
अन्त्ययोरुभयोरेको लोष्टस्य चलनं न हि ॥
मूलैकाङ्कं गृहीत्वैव लोष्टाक्रान्ताङ्कमेलने ।
उद्दिष्टस्य मितिर्ज्ञेया तस्यामुद्दिष्टता स्मृता ॥
रूपाभावेन नष्टं स्यात्संख्यामात्रपुरःसरम् ।
यैरङ्कैर्नष्टसंख्या स्यात्मूलैकाङ्कसमन्वितः ॥
तेष्वेवात्र क्षिपेल्लोष्टं लोष्टस्थानमितिस्वरः ।
अवरोहक्रमेणैव मूलं त्यक्त्वा क्रमो भवेत् ॥
अथवा लोष्टसंख्यान्त्यो लोष्टस्थानं स्वरस्य च ।

---

अथ साधारणम् ।

साधारणं भवेद्द्वेधा स्वरजातिविशेषणात् ।
स्वरसाधारणं तत्र चतुर्धा परिकीर्तितम् ॥

काकल्यंतरषड्जैश्च मध्यमेन विशेषणात् ।
साधारणः काकली हि भवेत्षड्जनिषादयोः ॥
साधारण्यमतस्तस्य यत्तत्साधारणं विदुः ।
अंतरस्यापि गमयोरेवं साधारणं मतम् ॥
प्रयोज्यौ षड्जमुच्चार्य काकलीधैवतौ क्रमात् ।
एवं मध्यममुच्चार्य प्रयुंजीतांतरर्षभौ ॥
षड्जकाकलिनौ यद्वोच्चार्य षड्जं पुनर्व्रजेत् ।
तत्परान्यतमं चैवं मध्यमं चांतरस्वरम् ॥
प्रयुज्य मध्यमो ग्राह्यस्तत्परोऽन्यतमोऽथवा ।
अल्पः प्रयोगः सर्वत्र काकली चांतरः स्वरः ॥
निषादो यदि षड्जस्य श्रुतिमाद्यां समाश्रयेत् ।
रिषभस्त्वन्तिमां प्रोक्तं षड्जसाधारणं तदा ॥
मध्यमस्यापि गमयोरेवं साधारणं मतम् ।
साधारणं मध्यमस्य मध्यमग्रामगं ध्रुवम् ॥
साधारणे कैशिके ते केशाग्रवदणुत्वतः ।
ते एव कैश्चिदुच्येते ग्रामसाधारणे बुधैः ॥
एकग्रामोद्भवास्वेकांशासु जातिषु यद्भवेत् ।
समानं गानमार्यास्तज्जातिसाधारणं जगुः ॥
जातिसाधारणं केचिद्रागानेव प्रचक्षते ॥

---

## अथ वर्णाः ।

गानक्रियोच्यते वर्णः स चतुर्धा निरूपितः ।
स्थाय्यारोह्यवरोही च संचारीत्यथ लक्षणम् ॥
स्थित्वा स्थित्वा प्रयोगः स्यादेकस्यैव स्वरस्य यः ।
स्थायी वर्णः स विज्ञेयः परावन्वर्थनामकौ ॥
एतत्संमिश्रणाद्वर्णः संचारी परिकीर्तितः ।

---

## अथ अलंकाराः ।

क्रमेण स्वरसंदर्भमलंकारं प्रचक्षते ।
पारिजातमते प्रोक्तं लक्षणं तद्विचार्यताम् ॥
अतिव्याप्तं लक्षणं तन्मूर्छनासु क्रमेषु च ॥

अत एव रत्नाकरेः—

विशिष्टवर्णसंदर्भमलंकारं प्रचक्षते ।
तस्य भेदा बहुविधास्तत्र स्थायिगतान्ब्रुवे ॥
येषामाद्यन्तयोरेकः स्वरस्ते स्थायिवर्णगाः ।
प्रसन्नादिः प्रसन्नान्तः प्रसन्नाद्यन्तसंज्ञकः ॥
ततः प्रसन्नमध्यः स्यात्पंचमः क्रमरेचितः ।
प्रस्तारोऽथ प्रसादः स्यात्सप्तैते स्थायिनि स्थिताः ॥
मन्द्रःप्रकरणेऽत्र स्यान्मूर्छनाप्रथमस्वरः ।
स एव द्विगुणस्तारः पूर्वः पूर्वोऽथवा भवेत् ॥
मन्द्रः परस्ततस्तारः प्रसन्नो मृदुरित्यपि ।
मन्द्रस्तारस्तु दीप्तः स्यान्मन्द्रो बिन्दुशिरा भवेत् ॥
ऊर्ध्वरेखाशिरास्तारो लिपौ त्रिर्वचनात्प्लुतः ॥
मन्द्रद्वयात्पर तारे प्रसन्नादिरुदीरितः ।
सां सां सां । ( १ )
तद्वैलोम्ये प्रसन्नान्तः ।
सां सां सां । ( २ )
प्रसन्नद्वयमध्यगे ॥
दीप्ते प्रसन्नाद्यन्तः स्यात् ।
सां सां सां । ( ३ )
तारयोर्मध्यगे पुनः ॥
मन्द्रे प्रसन्नमध्याख्यमलंकारविदो विदुः ॥
सां सां सां । ( ४ )

आद्यन्तो मूर्छनादिश्चेत्स्वरो मध्यो द्वितीयकः ।
सैका कलाऽथ चेन्मध्येऽथ तृतीयचतुर्थकौ ॥
सा द्वितीया पंचमाद्यास्त्रयोन्तश्चेत्कला परा ।
एवं कलात्रयेणोक्तोऽलंकारः क्रमरेचितः ॥
सां रि सां । सां गम सां । सांपधानि सां । ( ५ )
दीप्तोऽन्तश्चेत्प्रतिकलं प्रस्तारः सोऽभिधीयते ।
सांरिसां । सां गमसां । सां पधानि सां । ( ६ )
तारमन्द्रविपर्यासात्तं प्रसादं प्रचक्षते ॥
सांरिसां । सांगमसां । सांपधानिसां । ( ७ )
स्यातां विस्तीर्णनिष्कर्षौ विंदुरभ्युच्चयोऽपरः ।
हसितप्रेङ्खिताक्षिप्तसंधिप्रच्छादनास्तथा ॥
उद्गीतोद्वाहितौ तद्वत्त्रिवर्णो वेणिरत्यमी ।
द्वादशाऽऽरोहिवर्णस्थालंकाराः परिकीर्तिताः ॥
मूर्छनादेः स्वराद्यत्र क्रमेणाऽऽरोहणं भवेत् ।
स्थित्वा स्थित्वा स्वरैर्दीर्घैः स विस्तीर्णोऽभिधीयते ॥
सा री गा मा पा धा नी । ( ८ )
ह्रस्वैः स्वरैः स निष्कर्षो द्विर्द्विरुक्तैर्निरन्तरैः ।
सस रिरि गग मम पप धध निनि । ( ९ )
त्रिश्चतुर्वा स्वरोच्चारे गात्रवर्णमिमं विदुः ॥
ससस रिरिरि गगग ममम पपप धधध निनिनि । ( ९ )
सससस रिरिरिरि गगगग मममम पपपप धधधध निनिनिनि(९)
निष्कर्षस्यैव भेदौ द्वौ केचिदेतौ बभाषिरे ॥
प्लुतं ह्रस्वं प्लुतं ह्रस्वं प्लुतं ह्रस्वं प्लुतं स्वरम् ।
कुर्वन्क्रमाद्यदाऽऽरोहेत्ततो विंदुरयं मतः ॥
सासासा रि गागागा म पापापा ध निनिनि । ( १० )
एकान्तरस्वरारोहमाहुरभ्युच्चयं बुधाः ॥
स ग प नि । ( ११ )



यत्रैकोच्चारस्थानुसिरावृत्तिभिरुद्गीरिताः ।
आरुह्यन्ते स्वराः प्राह हसितं तं शिवप्रियः ॥
सा रीरी गागागा मामामामा पापापापापा
धाधाधाधाधाधा नीनीनीनीनीनीनी । ( १२ )
स्वरद्वयं समुच्चार्य पूर्वपूर्वयुतं परम् ।
यदाऽऽन्दोलितमारोहेत्प्रेङ्खितोऽसौ क्रमोऽथवा ॥
सरी रीगा गमा मपा पधा धनी । ( १३ )
एकान्तरं स्वरयुगं तादृक्पूर्वयुतं परम् ।
क्रमादारोहति यदा तदाऽऽक्षिप्तं प्रचक्षते ॥
सगा गपा पनी । ( १४ )
त्रिस्वराद्या कलाऽन्ये च पूर्वा पूर्वाऽन्तिमाऽऽदिमे ।
कलेस्तत्रिस्वरे यत्र संधिप्रच्छादनस्तु सः ॥
सरिगा गमपा पधनी । ( १५ )
यद्याद्यस्त्रिस्त्रिरावृत्तः कलयोस्त्रिस्वरात्मनोः ।
तदोद्गीतः ।
स स स रि गा म म म प धा । ( १६ )
मध्यमेन तादृशोद्वाहितो मतः ॥
सा रि रि रि गा म प प प धा । ( १७ )
अन्त्यस्य तु त्रिरावृत्तौ त्रिवर्णं वर्णयन्त्यमुम् ।
स रि ग ग गा म प ध ध धा । ( १८ )
त्रयाणां तु त्रिरावृत्तौ पृथग्वेणिरुदीरिता ॥
स स स रि रि रि ग ग ग म म म प प प ध ध ध नि नि नि ( १९ )

---

अवरोहक्रमादेते द्वादशाप्यवरोहिणि ॥
मन्द्रादिर्मन्द्रमध्यश्च मन्द्रान्तः स्यादतः परम् ।
प्रस्तारश्च प्रसादोऽथ व्यावृत्तस्खलितावपि ॥

परिवर्ताक्षेपबिन्दूद्वाहितोर्मिसमास्तथा ।
प्रेंखनिष्कूजितश्येनक्रमोद्घटितरंजिताः ॥
संनिवृत्तप्रवृत्तोऽथ वेणुश्च ललितस्वरः ।
हुंकारो ह्रादमानश्च ततः स्यादवलोकितः ॥
स्युः संचारिण्यलंकाराः पंचविंशातिरित्यमी ।
त्रिस्वराऽऽद्या कलैकैकमन्द्रत्यागेन नापराः ॥
त्रिस्वराश्चेत्कला मन्द्राद्या मन्द्रादिस्तदा भवेत् ।
सगरी रिमगा गपमा मधपा पनिधा । ( २० )
ताः कला मन्द्रमध्यान्त्याः क्रमाच्चेदपरौ तदा ॥

**मन्द्रमध्यो यथाः-**

गसरि मरिगा पगमा धमपा निपधा । ( २१ )

**मन्द्रान्तो यथाः-**

रिगसा गमरी मपगा पधमा धनिगा । ( २२ )
त्यक्तान्तरं स्वरयुगं त्यक्तादारभ्य चेत्पुनः ।
युगं तादृक्समारोहेत्तदा प्रस्तार उच्यते ॥
सगा रिमा गपा मधा पनी । ( २३ )
पूर्वः पूर्वः परस्योर्ध्वाधोवर्ती क्रियते स्वरः ।
यदा तदा प्रसादं तमाह श्रीकरणेश्वरः ॥
सरिसा रिगरी गमगा मपमा पधपा धनिधा । ( २४ )
चतुःस्वरा कला तत्राद्या तृतीयं द्वितीयकात् ।
तुर्यं गत्वादिमं गच्छेदेवमेकैकहानतः ॥
चतुःस्वराः परा यत्र स व्यावृत्तः स्मृतो बुधैः ॥
सागरिमासा रीमगपारी गापमधागा माधपनीमा । ( २५ )
कलां प्रयुज्य मन्द्रादेर्द्विरुक्तोर्ध्वस्वरान्विताम् ।
अवरुह्येत चेदेष स्खलिताख्यस्तदा भवेत् ॥
सगरिमा मरिगासा रीगगाप पगमारी ।
गापमधा धमपागा माधपनी निपधामा । ( २६



स्वरं द्वितीयमुज्झित्वा त्रिस्वराद्या कला यदि ।
त्यक्तादारभ्य न्यादृश्योऽन्यास्तदा परिवर्तकः ॥
सगमा रिमपा गपधा मधनी । ( २७ )
त्रिस्वराश्चेत्कला पूर्वपूर्वत्यागोर्ध्वसंक्रमैः ।

तदाऽऽक्षेपः-

सरिगा रिगमा गमपा मपधा पधनी । ( २८ )
अथ बिन्दुः स यत्र प्लुतमधःस्वरम् ॥
कृत्वाऽग्रिमस्वरं स्पृष्ट्वाऽधः स्पर्शेनाखिलाः कलाः ।
सा सा सा रि सा री री री ग री गा गा गा म गा
मा मा मा प मा पा पा पा ध पा धा धा धा नि धा । ( २९ )
कलायां त्रीन्स्वरान्गीत्वाऽवरोहैकं पराः कलाः ॥
यत्रैकैकोज्झिता गीतास्तदुद्वाहितस्तु सः ।
सरिगरी रिगमगा गमापमा मपधपा पधनिधा । ( ३० )
मूर्छनादेः स्वरात्तुर्यं प्लुतीकृत्याद्यमेत्य च ॥
तुर्यगाने कलैकैकहानाद्यत्रापरास्तथा ।

स ऊर्मिः स्यात्ः-

मा मा मा स मा पा पा पा रि सा धा धा धा ग धा नी नी नी स नि । ( ३१ )
स तु समः कला यत्र चतुःस्वराः ॥
तुल्यारोहावरोहैकैकहानादपरास्तथा ।
सरिगमा मगरिसा रिगमपा पमगरि
गमपधा धपमगा मपधनी निधपमा । ( ३२ )
कला गतागतवती द्विस्वरैकैकहानतः ।
यत्रान्यास्तादृशः स स्यात्प्रेंखः ॥
सरिरिसा रिगागरी गमामगा
मपापमा पधाधपा धनीनिधा । ( ३३ )
निष्कूजितः पुनः ॥

प्रसादस्य कलां गीत्वा तत्कलादेस्तृतीयकम् ।
गत्वाद्यगानाद्भवति ।
स रि सा ग सा रि ग री म री ग म गा प गा म प मा ध मा
प ध पा नि धा । ( ३४ )
श्येनः संवादियुग्मकैः ॥
क्रमात्सरिगमाद्यैः स्यात् ।
स प री ध ग नि स सा । ( ३५ )
कलाद्वित्रिचतुःस्वराः ।
आद्यस्वराद्यास्तिस्रः स्युर्द्वितीयाद्यादयस्तथा ॥
यत्रासौ क्रम इत्युक्तः ।
स रि स रि ग स रि ग म रि ग रि ग मा रि ग मा पा
ग म ग म पा ग म प धा म प म प ध म प ध नी । ( ३६ )
स तूद्घट्टित उच्यते ।
यत्र स्वरद्वयं गीत्वा पंचमाच्चतुरः स्वरान् ॥
अवरोहकलां गायेत्तथैकैकोज्झनात्परः ।
स रि प म ग री रि ग ध प म गा ग म नी ध प मा । ( ३७ )
द्विरुक्ता यदि मन्द्रान्ता मन्द्रादेः स्युः कलास्तदा ॥
रंजितः
स ग रि स ग रि सा रि म ग रि म ग रि ग प म ग प प गा
म ध प म ध प मा प नि ध प नि ध पा । ( ३८ )
अथ भवेदेष संनिवृत्तप्रवृत्तकः ।
अत्राद्यपंचमौ गीत्वा तुर्यस्त्रीनवरोहति ॥
क्रमात्कला सा यत्रान्यास्तद्वदेकैकहानतः ।
स पा म ग री रि धा प म गा ग नी ध प मा । ( ३९ )
यत्राद्यः स्याद्द्विर्द्वितीयचतुर्थकतृतीयकाः ॥



सकृत्कलाऽन्याश्चैकैकहानाद्वेणुरसौ मतः ।
सा स रि मा गा री री ग धा मा पा ग म धा पा मा म प नी धा । ( ४० )
गीत्वाद्यौ द्वौ चतुर्थं च य न्तावरोहति ॥
सा कलाऽन्याश्च तादृश्यो यत्रासौ ललितस्वरः ।
सा री म री सा री ग प गा री ग मा ध मा गा म प नि प मा ( ४१ )
आदिमेन कला यत्र द्विस्वराद्या गतागतैः ॥
स्वरैरेकोत्तरं वृद्धैः स हुंकारो निगद्यते ।
सा रि सा सा रि ग रि सा सा रि ग म ग रि सा सा रि ग म प म ग रि सा
सा रि ग म प ध प म ग रि सा सा रि ग म प ध नि ध प म ग रि सा ॥ ( ४२ )
ह्लादमाने प्रसन्नान्ता मन्द्रादेस्तु कला मताः ॥
स ग रि सा रि म ग री ग प म गा म ध प मा प नि ध पा । ( ४३ )
यदारोहेऽवरोहे च स्वद्वितीयं परित्यजेत् ।
चतुः स्वरा समकला तदा स्यादवलोकितः ॥
स ग मा म रि सा रि म पा प ग री ग प धा ध म गा
म ध नी नि प मा । ( ४४ )
एते संचार्यलंकारा आरोहेण प्रदर्शिताः ।
एतानेवावरोहेण प्राह श्रीकरणाग्रणीः ॥

---

अन्येऽपि सप्तालंकारा गीतज्ञैरुपदर्शिताः ॥
तारमन्द्रप्रसन्नश्च मन्द्रतारप्रसन्नकः ॥
आवर्तकः संप्रदानो विधुतोऽप्युपलोलकः ।
उल्लासितश्चेति तेषामधुना लक्ष्म कथ्यते ॥
कलास्तेषां द्वितीयाद्याः पूर्वैकैकप्रधानतः ।
अष्टमस्वरपर्यंतमारुह्याद्यं व्रजेद्यदि ॥
तारमन्द्रप्रसन्नोऽयमलंकारस्तदोच्यते ।
स रि ग म पा ध नि सां सां । ( ४५ )

मन्द्रादष्टमुत्पत्य सप्तकस्यावरोहणे ॥
मन्द्रतारप्रसन्नाख्यमाह माहेश्वरोत्तमः ।
सां सां नि ध प म ग रि सां । ( ४७ )
आद्यं द्वितीयमाद्यं च द्विर्द्विर्गीत्वा द्वितीयकम् ॥
सकृदाद्यं यत्कलायां गायेदावर्तकस्तु सः ।
स स रि रि स स रि सा रि रि ग ग रि रि ग रि ग ग म म ग ग म म गा
म म प प म म प मा प प ध ध प प ध पा ध ध नि नि ध ध नि धा । (४८)
एतस्यैव कलान्त्यौ द्वौ स्वरौ संत्यज्य गीयते ॥
यदा तदा संप्रदानमलंकारं विदुर्बुधाः ।
स स रि रि स स रि रि ग ग रि रि ग ग म म ग ग
म म प प म म प प ध ध प प ध ध नि नि ध ध । (४९)
युग्ममेकान्तरितयोस्त्यक्तादप्येवमेव चेत् ॥
द्विर्द्विः प्रयुज्येत तदा विधुतो बुधसंमतः ।
स ग स गा रि म रि मा ग प ग पा म ध म धा प नि प नी । (५०)
कलायामाद्ययोर्युग्मं चेत्तृतीयद्वितीययोः ॥
द्विर्द्विः प्रयुज्यते तज्ज्ञैरुपलोलस्तदोच्यते ।
स रि स रि ग रि ग रि रि ग रि ग म ग म ग म ग म प म प मा
म प म प ध प ध पा प ध प ध नि ध नि धा । ( ५१ )
द्विर्गीत्वाद्यं तृतीयं च प्रथमं च तृतीयकम् ॥
सकृद्गायेद्यत्कलायां तदुल्लासितमूचिरे ।
स स ग स गा री रि म रि मा ग ग प ग पा म म ध म धा
प प नि प नी । ( ५२ )
इति प्रसिद्धालंकारास्त्रिषष्टिरुदिता मया ।
अनंतत्वात्तु ते शास्त्रे न सामस्त्येन कीर्तिताः ॥

---



अथ पारिजातोक्तवर्णालंकाराः ।

अथ वर्णाः ।

गानक्रियोच्यते वर्णः स चतुर्धा निरूपितः ।
स्थाय्यारोह्यवरोही च संचारीत्यथ लक्षणम् ॥
स्थित्वा स्थित्वा प्रयोगः स्यादेकैकस्मिन्स्वरे पुनः ।
स्थायी वर्णः स विज्ञेयः परावन्वर्थनामकौ ॥
एतत्संमिश्रणाद्वर्णः संचारी परिकीर्तितः ।

---

अथ अलंकाराः ।

क्रमेण स्वरसंदर्भमलंकारं प्रचक्षते ।
तस्य भेदास्तु भूयासस्तत्र स्थायिगतान्ब्रुवे ॥
येषामाद्यन्तयोरेकस्वरास्ते स्थायिवर्णगाः ।
प्रसन्नादिः प्रसन्नान्तः प्रसन्नाद्यन्तसंज्ञकः ॥
ततः प्रसन्नमध्यः स्यात्पञ्चमः क्रमरेचितः ।
प्रस्तारोऽथ प्रसादः स्यात्सप्तैते स्थायिवर्णगाः ॥
प्रसन्नो मन्द्रपर्यायः प्रसन्नादिस्तदाद्यकः ।
प्रसन्नान्तस्तदन्तः स्यान्मन्द्राद्यन्तस्तृतीयकः ॥
चतुर्थो मन्द्रमध्यः स्यात्क्रमाच्च क्रमरेचितः ।
प्रस्तारोऽन्वर्थनामा स्यात्प्रसादस्तु प्रसन्नता ॥
ऊर्ध्वरेखाशिरास्तारो मन्द्रो बिन्दुशिरा भवेत् ।
भद्रो नन्दो जितः सोभो ग्रीवो भालः प्रकाशकः ॥
इत्यन्यान्यपि नामानि मुनयः संगिरन्ति हि ।
यमारभ्याग्रिमं गत्वा पुनः पूर्वस्वरं वदेत् ॥

---

अथ स्थायीवर्णालंकाराः ।

अथ भद्रः ।

भद्रसंज्ञमलंकारमाञ्जनेयोऽवदत्सुधीः ।
एकैकस्य स्वरस्यात्र हननाच्च क्रमो भवेत् ॥

अथ नन्दः ।

नन्दः स्याद्रूपकेणात्र स्वरद्वन्द्वेन पूर्ववत् ॥

---

अथ जितः ।

जितः स्याल्लघुकालेन स-ग-रिसेत्ययं क्रमः ॥

---

अथ सोमः ।

गुरुकालेन सोमः स्यात्स्वरद्वन्द्वेन पूर्ववत् ॥

---

अथ ग्रीवः ।

स-गौ रि-गौ समुच्चार्य म-गौ रि-सौ तथैव च ।
ग्रीवं लघुद्वयेनात्र हनूमानवदत्सुधीः ॥

---

अथ भालः ।

स-गौ रि-गौ समुच्चार्य म-गौ रि-सौ तथैव च ;
द्रुताभ्यां लघुकालेन भालं वदति मारुतिः ॥

---

अथ प्रकाशः ।

सौ-री-गौ मो-ग-री-गश्च रि-साविति स्वरैश्च तैः ।
हनूमानडतालेन प्रकाशाख्यं तमब्रवीत् ॥

---

अथ आरोहीवर्णालंकाराः ।

अथ विस्तीर्णः ।

यत्र च नोच्यते कालः स्वरैस्तत्र तु वोच्यते ।
स्यातां विस्तीर्णनिष्कर्षौ बिन्दुरभ्युच्छ्रयः परः ॥



हसितं प्रेङ्खिताक्षिप्तौ संक्षिप्रच्छादनस्तथा ।
उद्गीतोद्वाहितौ तद्वत्त्रिवर्णवेणिरित्यपि ॥
मूर्छनादेः स्वरा यत्र क्रमेणाऽऽरोहणं भवेत् ।

---

अथ विस्तीर्णः ।

स्थित्वा स्थित्वा स्वरैर्दीर्घैः स विस्तीर्णोऽभिधीयते ॥

---

अथ निष्कर्षः ।

ह्रस्वैः स्वरैः स निष्कर्षो द्विद्विरुक्तैर्निरन्तरैः ॥

---

अथ गात्रवर्णः ।

त्रिश्चतुर्वा स्वरोच्चारो गात्रवर्णमिमं विदुः ।
निष्कर्षस्यैव द्वौ भेदौ केचिदेतौ बभाषिरे ॥

---

अथ बिन्दुः ।

आद्यं दीर्घत्रयं प्राह द्वितीयं ह्रस्वमेव च ।
बिन्दुर्बिन्दुत्रयेणापि हनूमान्सार्धबिन्दुना ॥

---

अथ अभ्युच्छ्रयः ।

एकान्तरस्वरारोहमाहुरभ्युच्छ्रयं बुधाः ॥

अथ हसितः ।

यत्रैकोत्तरवृद्धाभिरावृत्तिभिरुदीरिताः ।
आरुह्यन्ते स्वराः प्राह हसितं तं शिवप्रियः ॥

---

अथ प्रेङ्खितः ।

स्वरद्वयं समुच्चार्य पूर्वपूर्वयुतं परम् ।
यदाऽऽन्दोलितमारोहेत्प्रेङ्खितस्य क्रमं जगुः ॥

---

अथ आक्षिप्तः ।

एकान्तरस्वरद्वन्द्वं त्यक्तपूर्वयुतं परम् ।
क्रमादारोहणं यत्र तदाऽऽक्षिप्तं प्रचक्षते ॥

---

अथ संधिप्रच्छादनः ।

ह्रस्वमाद्यद्वयं कृत्वा दीर्घं कृत्वा तृतीयकम् ।
हनूमानाह सर्वज्ञः संधिप्रच्छादनं परम् ॥

---

अथ उद्गीतः ।

आद्यं द्विवारमुच्चार्य स्वरं द्वितीयमेकदा ।
तथा दीर्घं तृतीयं च तदोद्गीतः प्रकीर्तितः ॥

---

अथ उद्वाहितः ।

आद्यं स्वरं चतुर्वारं द्विवारं च द्वितीयकम् ।
सकृदुक्तं तृतीयं तु तथा सकृच्चतुर्थकम् ॥
उद्वाहितस्त्वलंकारो हनूमता प्रकीर्तितः ॥

---

अथ त्रिवर्णः ।

तृतीयस्य त्रिरावृत्तौ त्रिवर्णं वर्णयन्त्यमुम् ॥

---

अथ पृथग्वेणिः ।

त्रयाणां तु त्रिरावृत्तौ पृथग्वेणिरुदीरितः ॥

---

अथ अवरोहालंकाराः ।

अवरोहक्रमादेते द्वादशाप्यवरोहिणः ।
गौरवादवरोहस्य लेखनं न कृतं मया ॥

---



अथ संचार्यलंकाराः ।

मन्द्रादिर्मन्द्रमध्यश्च मन्द्रान्तः स्यादतः परम् ।
प्रस्तारश्च प्रसादोऽथ व्यावृत्तश्चालितस्तथा ॥
परिवर्ताख्य आक्षेपो बिन्दुसंज्ञस्ततः परम् ।
अथोद्वाहित ऊर्मिः स्यात्समः प्रेङ्खस्ततः परम् ॥
ततो निष्कूजितः श्येनः क्रम उद्घाटितः परम् ।
रंजितः संनिवृत्तश्च प्रवृत्तो वेणुसंज्ञकः ॥
ललितस्वर-हुंकारौ ह्लादमानावलोकितौ ।
संचारिणोऽप्यलंकाराः पञ्चविंशतिरीरिताः ॥
संचारिताश्च सर्वत्र संचारिणो यतस्ततः ।
मन्द्रो बिन्दुशिरा ज्ञेयस्तारो मस्तकरेखकः ॥

---

अथ मन्द्रादिः ।

सरी गमौ मगौ यत्र रिसौ सरी गरी सरी ।
ग-मौ गुरुद्वयेनैव स मन्द्रादिस्तदा भवेत् ।
स्थानत्रयविशिष्टोऽयमारम्भे मन्द्रपूर्वकः ॥
एवं ज्ञेयोऽवरोहस्तु गीतशास्त्रविचक्षणैः ।

---

अथ मन्द्रमध्यः ।

स-गौ रि-गौ म-गौ यत्र रि-गौ रि-गौ रिसौ स-री ।
ग-मौ ज-गणयुक्तोऽसौ मन्द्रमध्यः सुशोभितः ॥

---

अथ मन्द्रान्तः ।

मन्द्रान्तश्च स विज्ञेयो न-गणेन सुशोभितः ।
स-द्वयं रिद्वयं गौ च यस्मिन्मगौ रि-गौ रि-सौ ॥
मन्द्रस्थानं च यस्यान्ते मन्द्रान्तं तं प्रचक्षते ।

---

अथ प्रस्तारः ।

त्यक्तान्तरं स्वरद्वंद्वं त्यक्तादारभ्यते पुनः ।
युगं तादृक्समारोहे तदा प्रस्तार उच्यते ॥

---

अथ प्रसादः ।

आद्यं द्वयं त्रिरावृत्त्या तृतीयं च द्वितीयकम् ।
उक्त्वा तत्र प्रसादं तमलंकारं जगुर्बुधाः ॥

---

अथ व्यावृत्तः ।

स-गौ रि-मौ स-री गो मो यस्मिन्निति क्रमो भवेत् ।
व्यावृत्तं तं विजानीयाद्गीतशास्त्रविशारदः ॥

---

अथ चलितः ।

स-गौ रि-मौ म-री गः सः स-री गो म इति क्रमः ।
यदा भवेत्तदा ज्ञेयोऽलंकारश्चलितो बुधैः ॥

---

अथ परिवर्तः ।

आद्यं तृतीयमुच्चार्य तुर्यं द्वितीयमेव च ।
परिवर्तस्तदा ज्ञेयो यतितालेन शोभितः ॥

---

अथ आक्षेपः ।

क्रमात्स्वरत्रयं यत्र जगुराक्षेपकं बुधाः ॥

---

अथ बिन्दुः ।

आद्यो दीर्घस्त्रिरावृत्तः स्वरो ह्रस्वस्ततस्तरः ।
पुनराद्यस्तु दीर्घोऽपि तथा दीर्घस्तृतीयकः ॥
बिन्दुसंज्ञस्त्वलंकारे प्रोक्तो गीतविचक्षणैः ।

---



अथ उद्वाहितः ।

स-रि-गरीत्यलंकार उद्वाहिते स्वरा इमे ॥

---

अथ ऊर्मिः ।

आद्यात्तुर्यस्त्रिरावृत्तः पुनराद्यश्चतुर्थकः ।
इत्येते स्युरलंकारे ऊर्मिसंज्ञे सुखप्रदे ॥

---

अथ समः ।

स-रि-गानां तथा मस्याऽऽरोहणं चावरोहणम् ।
पुनरारोहणं यत्र समं वदति तं सुधीः ॥

---

अथ प्रेङ्खः ।

द्विद्व्यन्तरे स्वरद्वन्द्वे त्यक्तादारंभ ईदृशः ।
क्रमादेकैकहानाच्च प्रेङ्ख उक्तो मनीषिभिः ॥

---

अथ निष्कूजितः ।

आद्यतुर्यौ द्विरावृत्त्या पुनस्तावत्क्रमो भवेत् ।
क्रमादेकैकहानाच्च निष्कूजितः प्रकीर्तितः ॥

---

अथ श्येनः ।

आद्यस्वरः क्रमात्सर्वान्स्पृशन्नेकैकमात्रजेत् ।
अलंकारस्तु श्येनः स्यादानिबद्धः सुखप्रदः ॥

---

अथ क्रमः ।

स-री रि-गौ ग-मौ चेति क्रमाख्यालंकृतिक्रमः ॥

---

अथ उद्घाटितः ।

स-गौ स-गौ स-री गो म इति क्रमो यदा भवेत् ।
उद्घाटितस्तदा ज्ञेय आन्दोलनेन शोभितः ॥

---

अथ रञ्जितः ।

स-गौ रि-गौ स-री गो म इति क्रमो यदा भवेत् ।
राञ्जितः स्यादलंकारः करुणातालशोभितः ॥

---

अथ संनिवृत्तः ।

स-रि-गा रि-ग-मा यत्र गरि-सा रि-ग-मास्ततः ।
संनिवृत्तः स विज्ञेयः सर्वदा सुखदायकः ॥

---

अथ प्रवृत्तकः ।

संनिवृत्तस्वरैरेव द्विगुणः सन्प्रवृत्तकः ॥

---

अथ वेणुः ।

वेणुः स-म-गमैर्ज्ञेयः स-रि-गमैस्तथैव च ॥

---

अथ ललितस्वरः ।

आद्यं तुर्यं तृतीयं च द्विरावृत्त्या रि-सौ स-री ।
ग-री स-री ग-मौ यत्र सुखदो ललितस्वरः ॥

---

अथ हुंकारः ।

द्वाभ्यां द्वाभ्यां स्वराभ्यां यः संवादिभ्यां स हुंकृतिः ॥

---

अथ ह्लादमानः ।

स-म-ग-रीत्यलंकारे ल्हादमाने स्वरा इमे ॥

---

अथ अवलोकितः ।

आद्यं तुर्यं त्रिरावृत्त्याऽवलोकितः प्रकीर्तितः ।
एवं संचार्यलंकारा आरोहे चावरोहणे ॥

---



पुनः सप्त च गीतज्ञैरलंकाराः प्रकीर्तिताः ।
इन्द्रनीलो महावज्रो निर्दोषः सीरकोकिलौ ।
आवर्तकः सदानन्द इत्येषां लक्ष्म कथ्यते ॥

---

अथ इन्द्रनीलः ।

स-री ग-मौ ग-री यत्र स-री ग-री स-री ग-मौ ।
इन्द्रनीलः स विज्ञेयो ध्रुवतालेन शोभितः ॥

---

अथ महावज्रः ।

स-री ग-री स-री यत्र स-री गमौ तथैव च ।
अलंकारो महावज्रो मण्ठतालेन शोभितः ॥

---

अथ निर्दोषः ।

स-री स-री ग-मावेति क्रम एव यदा भवेत् ।
निर्दोषः स्यादलंकारो रूपकेण सुशोभितः ॥

---

अथ सीरः ।

स-री ततः स-री गश्चेत्ततः स-री ग-मौ तदा ।
सीराख्योऽयमलंकारो झंपातालेन शोभितः ॥

---

अथ कोकिलः ।

स-री गश्च स-री गो म इत्येतैः कलिका भवेत् ।
त्रिपुटाख्येन तालेन कलितः कोकिलो भवेत् ॥

---

अथ आवर्तः ।

स-री ग-री स-री सश्च रिस्गस्तु स-री ग-मौ ।
यत्र स्युरड्डतालेन तमावर्तं बुधा जगुः ॥

---

अथ सदानन्दः ।

स-रि-ग-मैः सदानन्दो एकतालेन शोभितः ।
गीतोपयोगिनः सप्त तालयुक्ताः प्रदर्शिताः ॥

---

अलंकाराः पुनः पञ्च रागोपयोगिनः स्मृताः ॥
चक्राकारो जवश्चैव शङ्खः पद्मनिभः स्मृतः ।
वारिदश्चेति तेषां हि लक्षणं चापि कथ्यते ॥

---

अथ चक्राकारः ।

स्वरैरिभिश्चतुर्भिश्च षड्जेनापि त्रिभी रिभिः ।
चक्राकारः स विज्ञेयश्चक्रसादृश्यरूपवान् ॥

---

अथ जवः ।

क्रमात्सर्वान्स्वरानुक्त्वाऽथान्त्यादेकैकहानतः ।
अलंकारो जवो नाम प्रकाशितो हनूमता ॥

---

अथ शङ्खः ।

दीर्घान्त्यस्य द्विरावृत्तिरुपान्त्यौ तदधः स्वरौ ।
यत्रेति स्वरसंबन्धः शङ्खो ज्ञेयो मनीषिभिः ॥

---

अथ पद्माकारः ।

स-री षड्जत्रयं रिश्च पद्माकारेऽत्र ग-द्वयम् ॥

---

अथ वारिदः ।

आद्यं स्वरं सकृत्प्रोच्य त्रिरावृत्त्या च सप्तमम् ।
वारिदः स्यादलंकारः क्रमादेकैकहानतः ॥
इति सर्वेऽप्यलंकारा अष्टषष्टिः प्रकीर्तिताः ॥

---



अलंकारान्विनेना रागा विस्तारं नाप्नुवन्ति हि ।
एवंः कृत्वा प्रगात्तृणां स्वरतालप्रवीणता ॥
अलंकाराश्च रागेपु त्रिविधेषु त्रिधा मताः ।
त एते मेलभेदेन ह्यनंताः शास्त्रसंमताः ॥

---

अथ मेललक्षणम् ।

मेलः स्वरसमूहः स्याद्रागव्यंजनशक्तिमान् ।
श्लिष्टोच्चारणमेवात्र समुदायः प्रकीर्तितः ॥
शुद्धस्वरैः समस्तैर्यो युक्तः संपूर्णशब्दभाक् ।
षड्भिः षाडव इत्युक्तः स्वरैः पंचभिरौडुवः ॥
एवं मेलास्त्रिधा प्रोक्ता विकृतैश्च स्वरैरिह ।
शुद्धसंपूर्णमेलस्य भेद एक उदाहृतः ॥
तत्रैकैकस्वरत्यागात्षाडवः षड्विधो मतः ।
पंचाधिकदशत्वं हि स्वरद्वयवियोगतः ॥
संयात्यौडुवितो राग इति सूरिविनिश्चयः ॥
मेलो रिकोमलः पूर्ण एक एव प्रकीर्तितः ॥
तत्र षाडवितस्यापि भेदाः पंच प्रकीर्तिताः ।
तस्मिन्नौडुवभेदस्तु दशधा कथितो बुधैः ॥
तीव्रगांधारयुक् मेलः संपूर्णस्त्वेक एव सः ।
तादृक् मेले षाडवाः स्युश्चत्वारः शास्त्रसंमताः ॥
औडुवः षड्विधो ज्ञेयस्तस्मिन्नेव न संशयः ।
मतीव्रतरयुक्तोऽप्यसावेकः पूर्ण इति स्मृतः ॥
पंच भेदाः षाडवस्यौडुवो दशभेदवान ।
मतीव्रतरभेदा ये भेदाः स्युस्ते धकोमले ॥
यथा धकोमले भेदा नितीव्रेऽपि तथा भवेत् ॥
ऋषभः कोमलो यत्र गांधारः पूर्वसंज्ञकः ।

संपूर्णस्त्वेक एव स्यात्षाडवश्च चतुर्विधः ॥
षडौडुवाश्च कथ्यंत इति सूरिविनिश्चयः ॥
तीव्रगः कोमलो रिश्चेदेकः संपूर्ण उच्यते ।
चत्वारः षाडवा ज्ञेया औडुवापि च षड्विधाः ॥
रितीव्रतरयुक्तोऽसौ तीव्रगांधारसंयुतः ।
संपूर्णस्त्वेक एवोक्तो मेलो रागविचक्षणैः ॥
तादृशोभयसंयुक्तः षाडवः षड्विधो मतः ।
औडुवश्चापि तादृग्भ्यां रिगाभ्यां संयुतो यदि ॥
भेदाश्चतुर्दशैश्चायं प्राप्तोऽसौऽत्र न संशयः ॥
मस्तु तीव्रतरः प्रोक्तो यस्मिन्गस्तीव्रसंयुतः ।
पूर्णस्त्वेकस्त्वथो पंच षाडवाः स्युः षडौडुवाः ॥
अतितीव्रतमोगस्यान्मस्तु तीव्रतरो यदा ।
पूर्णस्तदेक एव स्यात्षाडवाश्च चतुर्विधाः ॥
षडौडुवाश्च तत्रोक्ता लक्ष्यलक्षणकोविदैः ॥
मस्तु तीव्रतरो यस्मिन्कोमलो यत्र धैवतः ।
तत्र संपूर्ण एकः स्यात्षाडवाः स्युश्चतुर्विधाः ॥
तत्र स्युरौडुवाः षट् च इति सूरिविनिश्चयः ॥
कोमलो धैवतो यत्र निषादस्तीव्रसंज्ञकः ।
एकः पूर्णो भवेत्तत्र षाडवाश्च चतुर्विधाः ॥
षडौडुवाश्च कथ्यंत इति सूरिविनिश्चयः ॥
धनिकोमलतीव्रो चेदेकः पूर्णोऽत्र षाडवाः ।
चत्वार औडुवा भेदाः षट् प्रोक्ता मनीषिभिः ॥
मस्तु तीव्रतरः प्रोक्तो निषादस्तीव्रसंज्ञकः ।
पूर्णस्तदेकस्तु चत्वारः षाडवाः पंच औडुवाः ॥
ऋषभः कोमलो यत्र गस्तु तीव्रो यदा भवेत् ।
मस्तु तीव्रतरः प्रोक्तः पूर्णस्त[illegible] हि ॥



चत्वारः षाडवाः प्रोक्ता औडुवाः सप्त स्मृताः ।
तीव्रगांधारतीव्रतरमकोमलधयुक्तमेले ।
एकः पूर्णः षाडवाश्च चत्वारश्चौडुवा हि षट् ।
पूर्ण एकस्तत्र त्रयः षाडवा औडुवास्त्रयः ॥
तीव्रतरमकोमलधपूर्वनिषादयुक्तमेले ।
एकः पूर्णस्त्रयः षाडवा औडुवाश्च त्रयः ॥
तीव्रतरमतीव्रतरधतीव्रनियुक्तमेले ।
एकः पूर्णश्चत्वारः षाडवाः षडौडुवाः ॥
रिकोमलपूर्वगमतीव्रतरधकोमलयुक्तमेले ।
एकः पूर्णश्चत्वारः षाडवाः औडुवाः पंच ॥
रितीव्रतरगतीव्रतमधकोमलयुक्तमेले ।
एक पूर्णः चत्वारः षाडवा औडुवाश्चत्वारः ॥
गतीव्रमतीव्रतरधनितीव्रतरयुक्तमेले ।
एकः पूर्णश्चत्वारः षाडवाः षडौडुवाः ॥
अतितीव्रतमगतीव्रतरमकोमलधपूर्वनिषादयुक्तमेले ।
एकः पूर्णः षाडवौ द्वौ औडुवौ द्वौ ॥
रिकोमलपूर्वगतीव्रतरमकोमलधपूर्वनिषादयुक्तमेले ।
एकः पूर्णः षाडव एकः ॥
कोमलरितीव्रगतीव्रतरमकोमलधतीव्रनिषादयुक्तमेले ।
एकः पूर्ण एकः षाडवः ॥
रिकोमलतीव्रगतीव्रतरमतीव्रतरधतीव्रनियुक्तमेले ।
एकः पूर्ण एकः षाडवः ॥
कोमलरिअतितीव्रतमगतीव्रतरमधतीव्रनियुक्तमेल ।
एकः पूर्ण एकः षाडवः ॥
रितीव्रतरअतितीव्रतमगतीव्रतरमतीव्रनियुक्तमेले ।
एकः पूर्ण एकः षाडवः ॥
इति चलद्बहुस्वरकमेलाः ।

---

अथ व्यवधानविकृतमेलाः ।

कोमलरितीव्रतरमयुक्तमेले ।

एकः पूर्णश्चत्वारः षाडवाः षडौडुवाः ॥

रिकोमलयुक्तमेले ।

एकः पूर्णश्चत्वारः षाडवाः षडौडुवाः ॥

रिकोमलधकोमलयुक्तमेले ।

पूर्णश्चत्वारः षाडवाः षडौडुवाः ॥

रिकोमलतीव्रनियुक्तमेले ।

एकः पूर्णश्चत्वारः षाडवाः षडौडुवाः ॥

गतीव्रधकोमलयुक्तमेले ।

एकः पूर्णश्चत्वारः षाडवाः षडौडुवाः ॥

तीव्रगतीव्रनियुक्तमेले ।

एकः पूर्णश्चत्वारः षाडवाः षडौडुवाः ॥

तीव्रतरमधकोमलयुक्तमेले ।

एकः पूर्णश्चत्वारः षाडवाः षडौडुवाः ॥

कोमलरितीव्रतरमकोमलधयुक्तमेले ।

एकः पूर्णस्त्रयः षाडवास्त्रय औडुवाः ॥

कोमलरितीव्रतरमधकोमलपूर्वनिषादयुक्तमेले ।

एकः पूर्णस्त्रयः षाडवास्त्रय औडुवाः ॥

रिकोमलमतीव्रतरधकोमलनितीव्रयुक्तमेले ।

एकः पूर्णो द्वौ षाडवौ औडुव एकः ॥

रिकोमलमतीव्रतरधकोमलनितीव्रयुक्तमेले ।

एकः पूर्णो द्वौ षाडवौ औडुव एकः ।

गतीव्रमतीव्रतरधकोमलयुक्तमेले ।

एकः पूर्णस्त्रयः षाडवा औडुवास्त्रयः ॥

तीव्रगतीव्रतरमतीव्रनियुक्तमेले ।



एकः पूर्णस्त्रयः षाडवा औडुवास्त्रयः ॥

तीव्रतरमतीव्रनियुक्तमेले ।

एकः पूर्णस्त्रयः षाडवा औडुवास्त्रयः ॥

रिकोमलयुक्तमेले ।

एकः पूर्णश्च ( ? ) ।

---

## अथ जातयः ।

शृंगारहारे:-

ब्रह्मणा स्वयमालोक्य गांधर्वामृतसागरम् ।
जातयोऽष्टादश प्रोक्तास्तासां लक्षणमुच्यते ॥
शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः ।
षाड्ज्यार्षभी च गांधारी मध्यमा पंचमी तथा ।
धैवती चाथ नैषादी सप्त ताः शुद्धजातयः ॥
ता एव विकृताः शेषा जाता विकृतसंकरात् ॥
यासां नाम स्वरो न्यासोऽपन्यासोंऽशो ग्रहस्तथा ।
तारन्यासविहीनास्ताः पूर्णाः शुद्धाभिधा मताः ॥
एताः सप्त च भरतमतंगाद्यैर्महर्षिभिः ।
न्यासवर्जग्रहादीनां विकाराद्विकृता मताः ॥
विकृतानां तु संसर्गाज्जाता एकादशापराः ।
स्यात्षड्जकैशिकी षड्जोदीच्यवा षड्जमध्यमा ॥
गांधारोदीच्यवा रक्तगांधारी कैशिकी तथा ।
मध्यमोदीच्यवा कार्मारवी गांधारपंचमी ॥
तथाऽऽन्ध्री नंदयतीति तद्धेतूनधुना ब्रुवे ।
षाड्जी गांधारिकायोगाज्जायते षड्जकैशिकी ॥
षाड्जिकामध्यमाभ्यां तु जायते षड्जमध्यमा ।
गांधारीपंचमीभ्यां तु जाता गांधारपंचमी ॥

गांधार्यार्षभिकाभ्यां तु जातिरांध्री प्रजायते ।
षाड्जी गांधारिका तद्वद्धैवतीमिलितास्त्विमाः ॥
षड्जोदीच्यवतीं जातिं कुर्युः कार्मारवीं पुनः ।
उत्पादयति नैषादी पंचम्यार्षभिकायुता ॥
नंदयंतीं तु गांधारी पंचम्यार्षभिकान्विता ।
गांधारी धैवती षाड्जी मध्यमेति युतास्त्विमाः ॥
गांधारोदीच्यवां कुर्युर्मध्यमोदीच्यवां पुनः ।
एता एव विना षाड्ज्या पंचम्या सह कुर्वते ॥
कुर्युस्ता रक्तगांधारीं नैषादीं न च धैवतीं ।
आर्षभीं धैवतीं त्यक्त्वा पंचम्यः कैशिकी भवेत् ॥
षाड्ज्यार्षभी धैवती च नैषादी षड्जकैशिकी ।
षड्जोदीच्यवती चैव षड्जमध्या तथापरा ॥
षड्जग्रामोद्भवाः सप्त जातयः कीर्तिता बुधैः ।
गांधारी रक्तगांधारी गांधारोदीच्यवा तथा ॥
मध्यमा च तथा जातिर्मध्यमोदीच्यवा पुनः ।
पंचमी चैव गांधारपंचम्यांध्री तथैव च ॥
नंदयंती च कार्मारव्यपरा कैशिकी स्मृता ।
इत्येकादश विज्ञेया जातयो मध्यमोद्भवाः ॥
इति शुद्धविकृततत्संकरोद्भवजातीनां संभवः ।

---

अथ ग्रहांशलक्षणम् ।

ग्रहांशौ तारमंद्रौ च षाडवौडुविते तथा ।
अल्पत्वं च बहुत्वं च न्यासापन्यासकाविति ॥
तद्यथा जातिवज्ज्ञेयं दशकं जातिलक्षणम् ।
निर्णयो दशकस्यास्य पृथगत्र निरूप्यते ॥
स ग्रहो येन जात्यादिप्रयोगो गृह्यते सदा ।
स च सप्तविधः प्रोक्तो विद्वद्भिः सप्तभिः स्वरैः ॥



योऽत्यंतबहुलो यत्र वादी वांशस्तुतत्र सः ।
रागश्च यस्मिन्वसति यस्माच्चैव प्रवर्तते ॥
नेता च तारमंद्राणां योऽत्यर्थं संप्रयुज्यते ।
ग्रहसंन्यासविन्यासन्यासापन्यासगोचरः ॥
राजवद्राजते यस्मात्सोंऽशः स्यादंशलक्षणः ॥

---

अथ तारमन्द्रलक्षणम् ।

मध्यमे सप्तकेंऽशः स्यात्तस्मात्तारस्थितात्परान् ।
स्वरांश्चतुर आरोहेदेष ताराबधिः परः ॥
मृदुरित्युच्यते मंद्रः कोमलत्वात्पुरातनैः ।
हमीरनृप इत्याह लक्षणं तारमंद्रयोः ॥

---

अथ षाडवौडुवलक्षणम् ।

षड्भिः स्वरैर्निबद्धं यद्गीतं तत् षाडवं स्मृतम् ।
रचितं पंचभिर्यस्मात्स्वरैर्गीतं तदौडुवम् ॥

---

अथ अल्पत्वबहुत्वलक्षणम् ।

अथाल्पत्वमनभ्यासाल्लंघनाच्चापि कीर्तितम् ।
बहुत्वं तु द्विधा प्रोक्तमभ्यासादप्यलंघनात् ॥

---

अथ न्यासापन्यासलक्षणम् ।

गीत समाप्तिकृत् न्यासः कथितो गीतवेदिभिः ।
अपन्यासः स्वरः स स्याद् यो विदारीसमापकः ॥

---

अथ संन्यासविन्यासलक्षणम्

न्यासौ संन्यासविन्यासावपन्यासप्रभेदकौ ।

---

## अथ जातिलक्षणम् ।

### अथ षाड्जीलक्षणम् ।

षाड्ज्यामंशाः स्वराः पंच निषादर्षभवर्जिताः ।
अपन्यासस्तु गांधारः पंचमश्चाथ संगतिः ॥
षड्जगांधारयोस्तु स्यात्षड्जधैवतयोस्तथा ।
षाडवत्वं निषादे स्यान्नास्या औडुवितं भवेत् ॥

---

### अथ फलश्रुतिः ।

नागाः पंचसहस्राणि अश्वमेधशतानि च ।
कन्याकोटिप्रदानं च षाड्जीगानं शिवार्चने ॥
तुल्यमेतत्समुद्दिष्टं मुनिभिस्तत्त्वदर्शिभिः ॥
अस्यां षाड्ज्यां षड्जो न्यासः । गांधारपंचमावपन्यासौ ॥
तालश्चंचत्पुटः । कला ॥१२॥मात्रा॥९६॥ शृंगारवीररौद्ररसाः॥

---

### अथ आर्षभीलक्षणम् ।

आर्षभ्यां तु त्रयोंऽशाः स्युर्निषादर्षभधैवताः ।
षड्जपंचमहीनं तु षाडवौडुवितं क्रमात् ॥

---

### अथ फलश्रुतिः ।

प्रयागस्य प्रभासस्य पुष्करस्य च सेवनात् ।
पृथूदके सामहत्यां चक्रतीर्थे च यत्फलम् ॥
जायते तत्फलं पुंसामार्षभ्यास्तु शिवार्चने ॥
अस्यामार्षभ्यामृषभो न्यासः । अंशा एवापन्यासाः ॥
तालश्चंचत्पुटः । कला ॥८॥ मात्रा ॥६४॥ वीररौद्राद्भुतरसाः ॥

---



### अथ गांधारीलक्षणम् ।

गांधार्यां द्वावनंशौ तु ज्ञेया ऋषभधैवतौ ।
रिगौ नित्यमपन्यासौ विज्ञेयौ षड्जपंचमौ ॥
धैवतादृषभं गच्छेदेवं स्यात्सर्वमेव तु ॥

---

### अथ फलश्रुतिः ।

गंगायां च कुशावर्ते बिल्वके नीलपर्वते ।
दशाश्वमेधफलदा गांधारी शिवपूजने ॥
अस्यां गांधार्यां गांधारो न्यासः । षड्जपंचमावपन्यासौ ॥
तालश्चंचत्पुटः । कला ॥ १६ ॥ मात्रा ॥ १२८ ॥ करुणरसः ॥

---

### अथ मध्यमालक्षणम् ।

पंचांशा मध्यमा ज्ञेया निगांधारविवर्जिता ।
क्रमात्ताभ्यां विहीनत्वं बहुलौ षड्जमध्यमौ ॥

---

### अथ फलश्रुतिः ।

श्रवणात्सर्वशास्त्राणां वेदवेदांगपारगैः ।
यत्प्राप्यते तदत्रोक्तं मध्यमायां शिवार्चने ॥
तालश्चचत्पुटः । कला ॥८॥ मात्रा ॥६४॥ अस्यां मध्यमो न्यासः ।
अंशा एवापन्यासाः । षाडवेऽप्यन्याल्पयोः दृश्यते ॥

---

### अथ पंचमीलक्षणम् ।

रिपावंशौ तु पंचम्यां सगमाः स्वल्पका मताः ।
लोपो निषादगाभ्यां च षाडवौडुविता मता ॥

---

अथ फलश्रुतिः ।

अश्वमेधाद्राजसूयात् गोमेधादपि यत्फलम् ।
तत्फलं लभते मर्त्यः पंचम्यां च शिवार्चने ॥

अस्यां पंचम्यां पंचमो न्यासः ॥ ऋषभपंचमनिषादाअपन्यासाः ॥
तालश्चंचत्पुटः। कला ॥८॥ मात्रा ॥६४॥ शृंगारवीराद्भुतरसाः ॥

---

अथ धैवतीलक्षणम् ।

स्तो धैवत्यां रिधावंशौ लंघ्यावारोहिणौ सपौ ।
पलोपात्षाडवं प्रोक्तमौडुवं सपलोपतः ॥
समध्यमावपन्यासौ षड्जपंचमसंगतिः ॥

---

अथ फलश्रुतिः ।

अग्निष्टोमे गोसवे च पौंडरीके महाक्रतौ ।
तथा च बहुसुवर्णे चाश्वमेधे च यत्फलम् ॥
तत्फलं लभते मर्त्यो धैवत्यां च शिवार्चने ॥

अस्यां धैवतो न्यासः । षड्जमध्यमावपन्यासौ ॥
तालश्चंचत्पुटः। कला ॥१२॥ मात्रा ॥९६॥ वीभत्सभयानकवीररसाः॥

---

अथ नैषादीलक्षणम् ।

नैषाद्यां निरिगा अंशा अनंशा बहुलाः स्मृताः ॥

---

अथ फलश्रुतिः ।

गुरुदेवादिभक्तानामार्जवानां मनस्विनाम् ।
यत्फलं स तदाप्नोति नैषाद्यां शिवपूजने ॥

अस्यां नैषाद्यां निषादो न्यासः । अंशा एवापन्यासाः ।
करुणभयानकौ रसौ। तालश्चंचत्पुटः। कला ॥१६॥ मात्रा ॥१२८॥



अथ षड्जकैशिकीलक्षणम् ।

अंशाः स्युः षड्जकैशिक्यां षड्जगांधारपंचमाः ।
ऋषभमध्यमाल्पत्वं धनिषादौ मनाग्बहू ॥

अस्यां षड्जकैशिक्यां न्यासो गांधारः । षड्जनिषादपंचमा अपन्यासाः । कला १६॥ मात्रा १२८॥ तालश्चंचत्पुटः ॥ शृंगारहास्यकरुणरसाः ॥

---

अथ षड्जोदीच्यवालक्षणम् ।

अंशाः समनिधाः षड्जोदीच्यवायां प्रकीर्तिताः ।
मिथश्च संगतास्ते स्युर्मन्द्रगांधारभूरिता ॥
षड्जरिर्षभौ भूरितारौ रिलोपात्षाडवं मतम् ।
औडुवं रिपलोपेन धैवतेंऽशे न षाडवम् ॥

अस्यां मध्यमो न्यासः । षड्जधैवतावपन्यासौ ॥
तालश्चंचत्पुटः॥ कला ॥१२॥ मात्रा॥९६॥ शृंगारहास्यौ रसौ। ध्रुवायां विनियोगः ॥

---

अथ षड्जमध्यमालक्षणम् ।

अंशाः सप्तस्वराः षड्जमध्यमायां मिथश्च ते ।
संगच्छन्ते निरल्पोंऽशाङ्गादृते वादितां विना ॥
निलोपे निगलोपे च षाडवौडुविते मते ॥

अस्यां षड्जमध्यमौ न्यासौ । सप्तस्वराश्चापन्यासाः ॥
तालश्चंचत्पुटः । कला ॥१२॥ मात्रा ॥९६॥ शृंगारवीराद्भुतहास्यरसाः ।

---

अथ गांधारोदीच्यवालक्षणम् ।

गांधारोदीच्यवायां तु द्वावंशौ षड्जमध्यमौ ।
रिलोपात्षाडवं ज्ञेयं पूर्णत्वेंऽशेतरस्वल्पता ॥

अल्पा निषपगांधाराः षाडवत्वे प्रकीर्तिताः ।
रिधयोः संगतिर्ज्ञेया धैवतादिश्च मूर्छना ॥
अस्यां मध्यमो न्यासः । षड्जधैवतावपन्यासौ ।
तालश्चंचत्पुटः । कला॥१६॥ मात्रा ॥१२८॥ शृंगारहास्याद्भुतरसाः ॥

---

अथ रक्तगांधारीलक्षणम् ।

अंशाः स्यू रक्तगांधार्यां पंच धर्षभवर्जिताः ।
रिमतिक्रम्य सगयोः कार्ये संनिधिमेलने ॥
अस्यां गांधारो न्यासः । मध्यमोऽपन्यासः ।
तालश्चंचत्पुटः। कला ॥१२॥ मात्रा ॥९६॥ शृंगारहास्यौ रसौ ।

---

अथ कैशिकीलक्षणम् ।

कैशिक्यामृषभान्येंऽशा निधावंशौ यदा तदा ।
न्यासः पंचम एव स्यादन्यदा द्विश्रुती मतौ ॥
अस्यां गांधारपंचमनिषादा न्यासाः । रिवर्ज्याः षट् सप्त वा स्वरा अपन्यासाः ।

---

अथ मध्यमोदीच्यवालक्षणम् ।

पंचमांशा सदापूर्णा मध्यमोदीच्यवा मता ।
अस्यां मध्यमो न्यासः । तालश्चंचत्पुटः ।

---

अथ कार्मारवीलक्षणम् ।

कार्मारव्यां भवन्त्यंशा निषादरिपधैवताः ।
बहवोंऽतरमार्गत्वादनंशाः परिकीर्तिताः ॥
अस्यां पंचमो न्यासः । अंशाः एवापन्यासाः ।
तालश्चंचत्पुटः । कला ॥१६॥ मात्रा ॥१२८॥

---



अथ गांधारपंचमीलक्षणम् ।

अंशो गांधारपंचम्यां पंचमः संगतिः पुनः ।
अस्यां गांधारो न्यासः । रिषभपंचमावपन्यासौ ॥
तालश्चंचत्पुटः । कला ॥१६॥ मात्रा ॥ १२८ ॥

---

अथ आंध्रीलक्षणम् ।

आंध्रयामंशा निरिगपा रिगयोर्निधयोस्तथा ।
संगतिर्न्यासपर्यंतमंशानुक्रमतो व्रजेत् ॥
अस्यां गांधारो न्यासः । अंशा एवापन्यासाः ।
तालश्चंचत्पुटः । कला ॥१६॥ मात्रा ॥ १२८॥

---

अथ नंदयंतीलक्षणम् ।

नंदयंत्यां पंचमोंऽशो गांधारस्तु ग्रहः स्मृतः ।
अस्यां गांधारो न्यासः । मध्यमपंचमावपन्यासौ ॥
तालश्चंचत्पुटः । कला ॥३२॥ मात्रा ॥ २५६ ॥
अनुक्ताविह तालः स्यात्त्रिधैवैककलादिकः ॥
योक्ताऽस्माभिः कलासंख्या सा दक्षिणपथस्थिता ।
वार्तिके द्विगुणा ज्ञेया सैव चित्रे चतुर्गुणा ॥
सर्वजातिषु जानीयादंशस्वरगतं रसम् ।
इत्येता जातयः प्रोक्ताः प्रयोक्तव्या हरस्तुतौ ॥
सम्यक् स्वरपदैर्युक्ताः पुनन्ति ब्रह्मपातकम् ।
ऋचो यजूंपि सामानि क्रियन्ते नान्यथा यथा ॥
तथा सामसमुद्भूता जातयो वेदसंमताः ।

---

अथ कपालानि ।

शुद्धजातिसमुद्भूतकपालान्यधुना ब्रुवे ।
रागा जनकजातीनां तत्कपालेषु संमताः ॥
कपालानां क्रमाद् ब्रूमो ब्रह्मोक्तां पदावलीम् ॥

झण्डुं झण्डुम् ॥१॥खट्वांगधरम् ॥२॥ दंष्ट्राकरालम् ॥३॥ तडित्सदृशजिव्हम् ॥४॥ हौ हौ हौ हौ हौ हौ हौ हौ ॥५॥ बहुरूपवदनम् घनघोरनादम् ॥६॥ हौ हौ हौ हौ हौ हौ हौ हौ ॥७॥ ॐ ॐ ह्रां रौं हौं हौं हौं हौं ॥ ८ ॥ नृमुण्डमण्डितम् ॥ ९ ॥ हूं हूं कह कह हूं हूं ॥ १० ॥ कृतविकटमुखम् ॥ ११ ॥ नमामि देवं भैरवम् ॥ १२ ॥

---

इति श्रीसंगीतरायभावभट्टविरचिते अनूपसंगीतविलासे
स्वराध्यायः समाप्तः ॥
श्रीरस्तु । शुभं भवतु । कल्याणमस्तु ।

# अथ रागाध्यायः ।

श्रीगणेशायनमः । श्री गुरवे नतिः ।

योऽयं ध्वनिविशेषस्तु स्वरवर्णविभूषितः ।
रञ्जको जनचित्तानां स रागः कथितो बुधैः ॥ १ ॥
स्वरवर्णविशिष्टेन ध्वनिभेदेन वा जनः ।
रज्यते येन कथितः स रागः संमतः सताम् ॥ २ ॥
अश्वकर्णादिवद्रूढो यौगिको वाऽपि मन्थवत् ।
योगरूढश्च वा रागो ज्ञेयः पङ्कजशब्दवत् ॥ ३ ॥

रागदिबोधे-
स्वरवर्णभूपितो यो ध्वनिभेदो रंजकः स राग इह ॥

---

प्रगीयन्ते यया रागाः सा गीतिः पंचधा स्मृता ।
मते दुर्गस्य पंचैव मतंगस्य च सप्तधा ॥ ४ ॥
भरतस्य चतस्रःस्युर्याष्टिकस्य मते त्रयः ।
शार्दूलस्य मते चैकेत्युक्तो गीतिविनिर्णयः ॥ ५ ॥
पञ्चधा ग्रामरागाः स्युः पञ्चगीतिसमाश्रयात् ।
गीतयः पञ्च शुद्धाद्या भिन्ना गौडी च वेसरा ॥ ६ ॥
साधारणीति शुद्धा स्यादवक्रैर्ललितैः स्वरैः ।
भिन्ना सूक्ष्मैः स्वरैर्वक्रैर्मधुरैर्गमकैर्युता ॥ ७ ॥
गाढैस्त्रिस्थानगमकैरोहाटी ललितैः स्वरैः ।
अखण्डितस्थितिः स्थानत्रये गौडी मता सताम् ॥ ८ ॥
ओहाटीकम्पितैर्मन्द्रैर्द्रुतद्रुततरैः स्वरैः ।
हकारोकारयोगेन हन्यस्ते चिबुके भवेत् ॥ ९ ॥
वेगवद्भिः स्वरैर्वर्णचतुष्केऽप्यातिरक्तिभाक् ।
वेगस्वरा रागगीतिर्वेसरा चोच्यते बुधैः ॥ १० ॥

चतुर्गीतिगतं लक्ष्म श्रिता साधारणी मता ।
शुद्धादिगीतियोगेन रागाः शुद्धादयो मताः ॥ ११ ॥

---

## अथ रागभेदाः ।

रागस्तु नवधा प्रोक्तो ग्रामजश्चोपरागजः ।
भाषाख्यश्च विभाषाख्योऽन्तरभाषाख्य एव च ॥ १२ ॥
रागो रागांगभाषांगौ क्रियांगोपांगकौ नव ।
शुद्धच्छायालगौ चैव संकीर्णश्च त्रिधा मतः ॥ १३ ॥
षाडवौडुवपूर्णाख्यास्त्रिधा रागाः परे जगुः ॥
रागस्तु नवधा प्रोक्तः पूर्णः स्यात्सप्तभिः स्वरैः ।
षड्भिः षाडवसंज्ञः स्यादौडुवः पंचभिर्भवेत् ॥ १४ ॥
यथार्थनामकाः षट् स्युर्भेदा भावप्रभाषिताः ।
पूर्णौडुवकसंज्ञस्तु पूर्णषाडवसंज्ञकः ।
तथौडुवकपूर्णः स्यात्षाडवाद्यस्तु पूर्णकः ॥ १५ ॥
षाडवौडुवकश्चापि तथौडुवकषाडवः ।
प्रोक्तो नवविधो रागः श्रीजनार्दनसूनुना ॥ १६ ॥

---

## अथ रागभेदसंख्या ।

त्रिंशत्तु ग्रामरागाः स्युर्नवोपरागकाः स्मृताः ।
रागाणां विंशतिः प्रोक्ता भाषाः षण्णवतिर्मता ॥ १७ ॥
विभाषा विंशतिर्ज्ञेयाः शार्ङ्गदेवेन भाषिताः ।
चतस्रोऽन्तरभाषाः स्यू रागांगाष्टकमुच्यते ॥ १८ ॥
भाषांगाणां रुद्रसंख्या क्रियांगाणि च द्वादश ।
उपांगत्रितयं प्रोक्तं देशीनां तु मितिर्नहि ॥ १९ ॥

---

## अथ ग्रामरागादि भेदलक्षणम् ।

ग्रामरागत्वं नाम ग्रामयोर्जातिव्यवधानेन भाषारागाद्यपेक्षण व्यवधानेनोत्पन्नत्वम् ।



तथाह भरतः-

जातिसंभूतत्वं ग्रामरागादीनामिति ।
यत्किंचिद्गीयते लोके तत्सर्वं जातिषु स्थितम् ।
( १ ) अथोपरागत्वं नाम ग्रामरागसमीपत्वम् ।
( २ ) रागत्वं नामोपरागानंतरं जातिजनितत्वम् ।
( ३ ) अथ भाषारागत्वं नाम रागोपरागानंतरं ग्रामरागालापप्रकारत्वम् ।

तथाह भरतः-

ग्रामरागाणामेवालापनप्रकारो भाषा । भाषाशब्दोत्रप्रकारवाची ।
( ४ ) अथ विभाषारागत्वं नाम भाषारागालापप्रकारत्वम् ।
रंजनाद्रागता भाषांगादेरपीष्यते ।

---

## अथ रागांगलक्षणम् ।

तथाह मतंगः-

ग्रामोक्तानां च रागाणां छायामात्रं भजंति हि ।
गीतज्ञैः कथिताः सर्वे रागांगास्तेन हेतुना ॥ २० ॥

---

## अथ भाषांगलक्षणम् ।

भाषाच्छायाश्रिता ये च जायंते तादृशाः किल ।
भाषांगास्तेन कथ्यंते गायकैः सौतिकादिभिः ॥ २१ ॥

---

## अथ क्रियांगलक्षणम् ।

शोकोत्साहादिकरुणाप्रबला ये ततः परम् ।
जायंते च ततो नाम क्रियांगास्तेन हेतुना ॥ २२ ॥

---

## अथ उपांगलक्षणम् ।

रागच्छायानुकारित्वादुपांगमिति कथ्यते ।
उपांगानि मतंगेनांतर्भावितानि तेषु च ॥ २३ ॥

मतांतरानुसारेण पृथगुद्देशतो मया ।
रागच्छायानुकारित्वादुपांगत्वं प्रतीयते ॥ २४ ॥

---

### अथ देशीरागलक्षणम् ।

देशीरागतया प्रोक्तं रागांगादिचतुष्टयम् ।
देशीत्वं नाम तत्प्रोक्तं कामचारप्रवर्तनम् ॥ २५ ॥
चतुस्त्रिद्विश्रुतिरिति नियमो यः पुरोदितः ।
स देशीरागभाषादिष्वन्यथापि क्वचित्कृतः ॥ २६ ॥
देशजानां तु रागाणामनिबद्धत्वमुच्यते ।
तस्मात्तेषां किलानंत्यात्संख्या नास्तीति कथ्यते ॥ २७ ॥
अथ शुद्धरागत्वं नाम शास्त्रोक्तनियामाद्रंजकत्वम् ॥
स्वजात्युद्योतका ये स्यु स्ते शुद्धाः परिकीर्तिताः ।
शुद्धादिगीतियोगेन रागाः शुद्धादयो मताः ॥
अथ छायालगरागत्वं नामान्यच्छायालगत्वेन रक्तिहेतुत्वम् ।
अथ संकीर्णरागत्वं नाम शुद्धच्छायालगहेतुत्वेन रक्तिहेतुत्वम् ॥
अथ देशीरागत्वं नाम कामप्रचारप्रवर्तितत्वम् ।
तदत्रग्रामोक्तेषु श्रुतिस्वरादिनियमेषु केषांचित्परित्यागादि-
ति भावः । एतत्प्रकृतसंकीर्णत्वादन्यदेव यथोक्तमुमापतिना ।
मयैवपंचभिर्वक्त्रैः सृष्टाः पूर्वं कुतूहलात् ।
अतः संभूय शुद्धास्ते षट्त्रिंशत्संख्ययोदिताः ॥ २८ ॥
एतेषां छायया जाताश्छायालगसमाह्वयाः ।
असंख्यातास्तु ते तेषु शतमेकोत्तरं क्रमात् ॥ २९ ॥
शुद्धं तु शिवरूपेण शक्तिरूपेण सालगम् ।
द्वयोर्मिश्रं तु संकीर्णमतस्ते त्रिविधा मताः ॥ ३० ॥

---



### अथ कांडारणालक्षणम् ।

कांडारणा तु कथिता तारस्थाने तु शीघ्रता ।
गमकैर्बहुभिर्युक्ता कौशल्यसहिता मता ॥ ३१ ॥

---

### अथ खुल्लफुल्ललक्षणम् ।

खुल्लं मंद्रस्थितं तानं फुल्लं तारस्थितं मतम् ॥

---

### अथ ग्रामरागाः ।

षड्जग्रामे समुत्पन्नाः षड्जकौशिकमध्यमाः ।
शुद्धसाधारितः षड्जग्रामो ग्रामे तु मध्यमः ॥ ३२ ॥
पञ्चमो मध्यमग्रामः षाडवः शुद्धकौशिकः ।
शुद्धाः सप्तेति भिन्नाः स्युः पञ्च कौशिकमध्यमः ॥ ३३ ॥
भिन्नषड्जश्च षड्जाख्ये मध्यमे तानकौशिकौ ।
भिन्नपञ्चम इत्येते गौडकौशिकमध्यमः ॥ ३४ ॥
गौडपञ्चमकः षड्जे मध्यमे गौडकैशिकः ।
इति गौडास्त्रयः षड्जे टक्कवेसरषाडवौ ॥ ३५ ॥
ससौवीरीमध्यमे तु बोट्टमालवकैशिकौ ।
मालवः पञ्चमान्तोऽथ द्विग्रामष्टक्ककैशिकः ॥ ३६ ॥
हिन्दोलोऽष्टौ वेसरास्ते सप्त साधारणास्ततः ।
षड्जे स्याद्रूपसाधारः शको भम्माणपञ्चमः ॥ ३७ ॥
मध्यमे नर्तगान्धारपञ्चमौ षाड्जकैशिकः ।
द्विग्रामः ककुभस्त्रिंशद्ग्रामरागा अमी मताः ॥ ३८ ॥

---

### अथ उपरागाः ।

अष्टोपरागास्तिलकः शकादिष्टक्कसैन्धवः ।
कोकिलापञ्चमो रेवगुप्तः पञ्चमषाडवः ॥ ३९ ॥
भावनापञ्चमो नागगान्धारो नागपञ्चमः ॥

---

अथ रागाः ।

श्रीरागनट्टौ बङ्गालौ भासमध्यमषाडवौ ।
रक्तहंसः कोल्हहासः प्रसवो भैरवध्वनिः ॥ ४० ॥
मेघरागः सोमरागः कामोदो चाभ्रपञ्चमः ।
स्यातां कन्दर्पदेशाख्यौ ककुभान्तश्च कैशिकः ॥ ४१ ॥
नट्टनारायणश्चेति रागा विंशतिरीरिताः ॥

---

अथ भाषाविभाषांतरभाषाजनकाः ।

सौवीरः ककुभष्टकः पञ्चमो भिन्नपञ्चमः ।
टक्ककैशिकहिन्दोलबोट्टमालवकैशिकाः ॥ ४२ ॥
गान्धारपञ्चमो भिन्नषड्जो वेसरषाडवः ।
मालवः पञ्चमान्तश्च ततः पञ्चमषाडवः ॥ ४३ ॥
भाषाणां जनकाः पञ्चदशैतेयाष्टिकोदिताः ॥
मतंगः षडेवग्रामरागान् भाषाजनकत्वेनाभाषत । कश्यपस्तु द्वादशैवावोचत् । शार्दूलः पुनश्चत्वार एवाभ्यधात् ॥
भाषाश्चतस्रः सौवीरे सौवीरी वेगमध्यमा ।
साधारिता च गान्धारी ककुभे भिन्नपञ्चमी ॥ ४४ ॥
काम्बोजी मध्यमग्रामा रगन्ती मधुरी तथा ।
शकमिश्रेति षट् तिस्रो विभाषा भोगवर्धनी ॥ ४५ ॥
आभीरिका मधुकरी तथैकान्तरभाषिका ।
शालवाहनिका टक्के त्रवणा त्रवणोद्भवा ॥ ४६ ॥
वैरञ्जी मध्यमग्रामदेहा मालववेसरी ।
छेवाटी सैन्धवी कोलाहला पञ्चमलक्षिता ॥ ४७ ॥
सौराष्ट्री पञ्चमी वेगरञ्जी गान्धारपञ्चमी ।
मालवी तानवलिता ललिता रविचन्द्रिका ॥ ४८ ॥
ताना वाहेरिका दोह्या वेसरीत्येकविंशतिः ।
भाषाः स्युरथ देवारवर्धन्यान्ध्री च गुर्जरी ॥ ४९ ॥



DEPARTMENT OF ... LIBRARIES UNIVERSITY OF MADRAS.

भावनीति विभाषाः स्युश्चतस्रः पञ्चमे पुनः ।
कौशिकी त्रावणी तानोद्भवाऽऽभीरी च गुर्जरी ॥ ५० ॥
सैन्धवी दाक्षिणात्याऽऽन्ध्री माङ्गली भावनी दश ।
इति भाषाविभाषे द्वे भम्माण्यन्धालिके ततः ॥ ५१ ॥
चतस्रः पञ्चमे भिन्ने भाषाधैवतभूषिता ।
शुद्धा भिन्ना च वैराटी विशालेत्यथ कौशली ॥ ५२ ॥
विभाषा मालवाभिन्नवलिते टक्ककैशिके ।
भाषे द्वे द्राविडीत्येका विभाषा पेङ्क्के नव ॥ ५३ ॥
भाषाः स्युर्वेसरी चूतमञ्जरी षड्जमध्यमा ।
मधुरी भिन्नपौराली गौडी मालववेसरी ॥ ५४ ॥
छेवाटी पिञ्जरीत्येका बोट्टे भाषा तु माङ्गली ।
बाङ्गाली माङ्गली हर्षपुरी मालववेसरी ॥ ५५ ॥
खञ्जिनी गुर्जरी गौडी पौराली चार्धवेसरी ।
शुद्धा मालवरूपा च सैन्धव्याभीरिकेत्यमूः ॥ ५६ ॥
भाषास्त्रयोदश ज्ञेया विज्ञैर्मालवकैशिके ।
विभाषे द्वे तु काम्बोजी तद्वद्देवारवर्धनी ॥ ५७ ॥
गान्धारपञ्चमे भाषा गान्धारी भिन्नषड्जका ।
गान्धारवल्ली कच्छेल्ली स्वरवल्ली निषादिनी ॥ ५८ ॥
त्रवणा मध्यमा शुद्धा दाक्षिणात्या पुलिन्दिका ।
तुम्बुरा षड्जभाषा च कालिन्दी ललिता ततः ॥ ५९ ॥
श्रीकण्ठिका च बाङ्गाली गान्धारी सैन्धवीत्यमूः ।
भाषाः सप्तदश ज्ञेयाश्चतस्रस्तु विभाषिकाः ॥ ६० ॥
पौराली मालवी कालिन्द्यपि देवारवर्धनी ।
वेसरे षाडवे भाषे द्वे वाह्या वाह्यषाडवा ॥ ६१ ॥
विभाषे पार्वतीश्रीकण्ठ्यथ मालवपञ्चमे ।
भाषास्तिस्रो वेदवती भाविनी च विभाविनी ॥ ६२ ॥

तानें तानोद्भवा भाषा भाषा पञ्चमषाडवे ।
पोता भाषां शकामेके रेवगुप्ते विदुर्विदुः ॥ ६३ ॥
विभाषा पल्लवी भासवलिता किरणावली ।
शङ्कराद्यावलितेत्येतास्तिस्रस्त्वन्तरभाषिकाः ॥ ६४ ॥
चतस्रोऽनुक्तजनका बृहद्देश्यामिमाः स्मृताः ।
एवं षण्णवतिर्भाषा विभाषा विंशतिः स्मृताः ॥ ६५ ॥
चतस्रोऽन्तरभाषाः स्युः शार्ङ्गदेवस्य संमताः ।
भाषा मुख्या स्वराख्या च देशाख्या चोपरागजा ॥ ६६ ॥
चतुर्विधा मतङ्गोक्ता मुख्याऽनन्योपजीविनी ।
स्वरदेशाख्यया ख्याता स्वराख्या देशजा क्रमात् ॥ ६७ ॥
अन्योपरागजा ताभ्यो याष्टिकेनोदिताः पुनः ।
संकीर्णदेशजामूलाछायामात्रेतिनामभिः ॥ ६८ ॥
शुद्धाऽऽभिरी रगन्ती च त्रिधा मालववेसरी ।
मुख्याः षडिति शेषास्तु सुज्ञाताः स्फुटलक्षणाः ॥ ६९ ॥
नामसाम्यं तु कासांचिद्भिन्नानामपि लक्ष्मतः ॥

इति श्रीअनूपसिंहकारिते भावप्रकाशे ग्रामरागोपरागराग-
भाषाविभाषान्तरभाषाविवेकः ।

---

अथ रागाङ्गभाषाङ्गक्रियाङ्गोपाङ्गनिर्णयः ।

केषांचिन्मतमाश्रित्य पूर्वं भावेन भाषितः ।
तत्र पूर्वंप्रसिद्धानामुद्देशः क्रियतेऽधुना ॥ ७० ॥
शंकराभरणो घण्टारवो हंसकदीपकौ ।
रीतिः पूर्णाटिका लाटी पल्लवीति बभाषिरे ॥ ७१ ॥
रागाङ्गान्यष्ट गाम्भीरी चौहाटी खशिकोत्पली ।
गोष्ठी नादान्तरी नीलोत्पली छायातरङ्गिणी ॥ ७२ ॥
गान्धारगनिकारञ्जावित्येकादश मेनिरे ॥



भाषाङ्गान्यथ भावक्रीस्वभावक्रीशिवक्रियः ।
मरुक्रीत्रिनेत्रक्रीकुमुदक्रीदनुक्रियः ॥ ७३ ॥
ओजक्रीन्द्रक्रियो नागकृतिर्धन्यकृतिस्तथा ।
विपायक्री क्रियाङ्गानि द्वादशेति जगुर्बुधाः ॥ ७४ ॥
त्रीण्युपाङ्गानि पूर्णाटो देवालश्च गुरुञ्जिका ।
चतुस्त्रिंशदिमे रागाः प्राक्प्रसिद्धाः प्रकीर्तिताः ॥ ७५ ॥

---

अथाधुना प्रसिद्धानामुद्देशः प्रतिपाद्यते ।
मध्यमादिर्मालवश्रीस्तोडी वङ्गालभैरवौ ॥ ७६ ॥
वराटी गुर्जरी गौडकोलाहलवसन्तकाः ।
धन्यासीदेशिदेशाख्या रागाङ्गानि त्रयोदश ॥ ७७ ॥
डोम्बक्रचासावरी वेलावली प्रथममञ्जरी ।
आडिकामोदिका नागध्वनिः शुद्धवराटिका ॥ ७८ ॥
नट्टा कर्णाटवङ्गालौ भाषाङ्गानि नवाब्रुवन् ॥
क्रियाङ्गत्रितयं रामकृतिर्गौडकृतिस्तथा ।
देवक्रीरित्यथोपाङ्गसप्तविंशतिरुच्यते ॥ ७९ ॥
कौन्तली द्राविडी सैन्धव्यथ स्थानवराटिका ।
हतस्वरवराटी च स्यात्प्रतापवराटिका ॥ ८० ॥
वराट्यः षडिति च्छाया तुरुष्काद्ये तु तोडिके ।
महाराष्ट्री च सौराष्ट्री दक्षिणा द्राविडीत्यमूः ॥ ८१ ॥
उक्ताश्चतस्रो गुर्जर्यो भुञ्छिका स्तम्भतीर्थिका ।
छायाप्रतापोपपदे वेलावल्यौ च भैरवी ॥ ८२ ॥
कामोदा सिङ्घली च्छायानट्टा रामकृतिस्तथा ।
वल्लातिका च मल्लारी मल्लारो गौडकास्ततः ॥ ८३ ॥
कर्णाटो देशवालश्च तौरुष्कद्राविडाविति ।
एतेऽधुना प्रसिद्धाः स्युर्द्वापञ्चाशन्मनोरमाः ॥ ८४ ॥

इति श्रीअनूपसिंहकारिते भावप्रकाशे रागाङ्ग-
भाषाङ्गक्रियाङ्गोपाङ्गनिर्णयः ।

पारिजातोक्तरागाणामुद्देशः क्रियतेऽधुना ।
सैंधवः पूर्णधन्नासी पाडवा चौडुवा त्रिधा ॥ ८५ ॥
मेघमल्लारको रागो नीलांबरी ततः परम् ।
मालश्री रक्तहंसाख्यो गौरी मल्लारिका ततः ॥ ८६ ॥
पंचमश्च वसंतश्च पुनःस्याद्देशकारिका ।
मुखारी भैरवी चैव भूपाली प्रसभस्ततः ॥ ८७ ॥
वसंतभैरवः कोल्हासो भैरवनामकः ।
मध्यमादिश्च बंगाली नारायणी विभासकः ॥ ८८ ॥
कानडी मेघनादश्च छायातोडी च तोडिका ।
मार्गतोडी ततो घंटारवो वराटिका ततः ॥ ८९ ॥
शुद्धपूर्वा वराटी च तोडी पूर्वा च सा पुनः ।
नागपूर्वा वराटी च पुन्नागाद्या वराटिका ॥ ९० ॥
प्रतापाद्या वराटी च त्वशोकाद्या वराटिका ।
कल्याणाद्या वराटी च ततः खंभावती पुनः ॥ ९१ ॥
कल्याणाभीरिके रागौ रामक्री मालवः पुनः ।
सारंगश्च गुणक्री च शंकराभरणस्ततः ॥ ९२ ॥
बृहद्धंसश्च ककुभो गोपीकांबोजिका ततः ।
बेलावली च केदारी कांबोजी दीपकस्ततः ॥ ९३ ॥
पटमंजरी ललिता बहुली गुर्जरी पुनः ।
दाक्षिणात्या गुर्जरी च ततोक्ता रेवगुप्तिका ॥ ९४ ॥
गौडः केदारगौडश्च कर्णाटाद्यश्च गौडकः ।
सारंगगौडरागश्च रीतिगौडस्ततः परम् ॥ ९५ ॥
नारायणाद्यगौडश्च तथा मालवगौडकः ।
देशीहिंदोलकश्चैव मार्गींहिंदोलकस्ततः ॥ ९६ ॥
टक्कश्च नाटको नट्टनारायणस्ततः परम् ।
सालंगनाटकश्छायानाटः कामोदनाटकः ॥ ९७ ॥



आभीरनाटः कल्याणः नाटः केदारनाटकः ।
वराटी नाटकः पूर्वी श्रीरागश्च पहाडिका ॥ ९८ ॥
सावेरीपूर्वसारंगौ सालंगश्च विहंगडः ।
सामंतो नादरामक्री गौंडो मंगलकौशिकः ॥ ९९ ॥
कुडाई देवगांधारस्त्रिवर्णश्च कुरंगकः ।
सौदामिनी देवगिरी वैजयंती च हंसकः ॥ १०० ॥
कोकिलश्च जयश्रीश्च सुरालयोऽर्जुनस्ततः ।
ऐरावतः कंकणकः कुमुदः कल्पपादपः ॥ १०१ ॥
रत्नावली च सौराष्ट्री मारू चक्रधरस्ततः ।
मंजुघोषा सिंहरवस्तथैव शिववल्लभः ॥ १०२ ॥
आनंदभैरवीरागो मनोहरश्च मानवी ।
राजधानी रागराजः शंकरानंदसंज्ञकः ॥ १०३ ॥
शार्वरीति शशीनेत्रशशांकः संमि ता इमे ।
पारिजातमते प्रोक्ताः श्रीजनार्दनभूनुना ॥ १०४ ॥
अथ नाटप्रभेदानामुद्देशः क्रियतेऽधुना ।
कानराहीरहंमीरकामोदशुद्ध नाटकाः ॥ १०५ ॥
मेघसारंगकेदारशुद्धाद्या नवनाटकाः ।
केदारादिकनाटश्च तथा कल्याणनाटकः ॥ १०६ ॥
वर्णनाटश्च विम्भारनाटो हंमीरनाटकः ।
कदंबनाटकः पूर्णनाटः कर्नाटनाटकः ॥ १०७ ॥
पूर्यांकर्णाटकोऽप्यत्र नाटभेदः प्रकीर्तितः ।
एवं षोडश नाटाः स्युस्ततः कर्णाटकान् ब्रुवे ॥ १०८ ॥

---

भाषापद्यद्वयेनाह श्रीजनार्दननंदनः ॥
जो दरबारि सो सुद्ध कहावे मलार मिलायके नायकि जानौं ।
बागेसरी धंनासिरिके मिलि मेघ मिले तो अडानोंहि मानौं ॥
होत सहानो मिले फिरोदस्तक पूरिया जैतसिरी सुर सानौं ।
मंगलअष्टक सोइ कहावत भाव कहे पटभेदानि जानौं॥१०९॥

मुद्रिकगारोहुसोंनिओ काफि मिले त्रिधिभेद वखानत हैंजू ।
सोरठि और खंभावति सों मिले द्वादसभेद यों मानत हैंजू ॥
गौरकर्णाट कर्णाटि भेद द्वै यों मुनिभेदनि पानत हैंजू ।
मूरछ्ना ग्रह असं ओ न्यासनि मेल मिलापिनि जानत हैंजू ११०
चतुर्दश प्रभेदास्तु कर्णाटस्य प्रकीर्तिताः ॥
औंडवः षाडवश्चैव संपूर्णश्च त्रिधा स्मृतः ।
वसंताद्यभैरवः स्यादानंदभैरवस्ततः ॥ १११ ॥
नंदभैरवसंज्ञस्तु गांधारभैरवस्ततः ।
स्वर्णाकर्षणपूर्वस्तु तथा पंचमभैरवः ॥ ११२ ॥
नवधा भैरवः प्रोक्तः श्रीजनार्दनसूनुना ॥
महाराष्ट्री च सौराष्ट्री दाक्षिणा सा ततः परा ।
द्राविडी च चतुर्धोक्ता श्रीमत्सोढलसूनुना ॥ ११३ ॥
औत्तरागुर्जरी चैव ततो मंगलगुर्जरी ।
रामगुर्जरिका चान्या ततो वहुलगुर्जरी ॥ ११४ ॥
अष्टधा गुर्जरी प्रोक्ता श्रीजनार्दनसूनुना ।
नवमी गुर्जरी प्रोक्ता श्यामगुर्जरिका बुधैः ॥ ११५ ॥

---

## अथ जातयः ।

शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः ।
षाड्ज्यार्षभी च गान्धारी मध्यमा पञ्चमी तथा ॥ ११६ ॥
धैवती चाथ नैषादी शुद्धतालक्ष्म कथ्यते ।
यासां नामस्वरो न्यासोऽपन्यासोंऽशो ग्रहस्तथा ॥ ११७ ॥
तारन्यासविहीनास्ताः पूर्णाः शुद्धाभिधा मताः ।
विकृता न्यासवर्ज्यैस्तल्लक्ष्महीना भवन्त्यमूः ॥ ११८ ॥
संपूर्णत्वग्रहांशापन्यासेष्वेकैकवर्जनात् ।
भवन्ति भेदाश्चत्वारो द्वयोस्त्यागे तु षण्मताः ॥ ११९ ॥



त्यागे त्रयाणां चत्वार एकस्त्यक्तचतुष्टये ।
भेदाः पञ्चदशैवैते षाड्ज्याः सद्भिर्निरूपिताः ॥ १२० ॥
तत्राष्टौ पूर्णताहीनाः सप्तत्विन्तरवर्जिताः ।
द्विधास्युः पूर्णताहीनाः षाडवौडुवभेदतः ॥ १२१ ॥
अतोऽष्टावधिका आर्षभ्यादिष्वौडुवजातिषु ।
अतस्त्रयोविंशतिधा षट्सु प्रत्येकमीरिताः ॥ १२२ ॥
विकृतानां तु संसर्गाज्जाता एकादश स्मृताः ॥
स्यात्षड्जकैशिकीषड्जोदीच्यवापड्जमध्यमाः ।
गान्धारोदीच्यवा रक्तगान्धारी कैशिकी तथा ॥१२३ ॥
मध्यमोदीच्यवा कार्मारवी गान्धारपञ्चमी ।
तथाऽऽन्ध्री नन्दयन्तीति तद्धेतूनधुना ब्रुवे ॥ १२४ ॥
षाड्जीगान्धारिकायोगाज्जायते षड्जकैशिकी ।
षाड्जिकामध्यमाभ्यां तु जायते षड्जमध्यमा ॥ १२५ ॥
गान्धारीपंचमीभ्यां तु जाता गान्धारपञ्चमी ।
गान्धार्यार्षभिकाभ्यां तु जातिरान्ध्री प्रजायते ॥ १२६ ॥
षाड्जी गान्धारिका तद्वद्धैवती मिलितास्त्विमाः ।
षड्जोदीच्यवतीं जातिं कुर्युः कार्मारवीं पुनः ॥ १२७ ॥
उत्पादयति नैषादी पञ्चम्यार्षभिकायुता ।
नन्दयन्तीं तु गान्धारी पञ्चम्यार्षभिकान्विता ॥ १२८ ॥
गान्धारी धैवती षाड्जी मध्यमेति युतास्त्विमाः ।
गान्धारोदीच्यवां कुर्युर्मध्यमोदीच्यवां पुनः ॥ १२९ ॥
एता एव विना षाड्ज्या पञ्चम्या सह कुर्वते ।
कुर्युस्ता रक्तगान्धारी नैषादी न च धैवती ॥ १३० ॥
आर्षभीं धैवतीं त्यक्त्वा पञ्चभ्यः कैशिकी भवेत् ॥
चतस्रः षड्जशब्दिन्यो नैषादी धैवती तथा ।
आर्षभी चेति सप्तैताः षड्जग्रामस्य जातयः ॥ १३१ ॥

शेषाः स्युर्मध्यमग्रामे पूर्णत्वाद्यधुनोच्यते ॥
कार्मारव्यथ गान्धारी पञ्चमी षड्जकैशिकी ।
मध्यमोदीच्यवेत्येता नित्यपूर्णाः प्रकीर्तिताः ॥ १३२ ॥
षाड्जी च नन्दयन्त्यान्ध्री गान्धारोदीच्यवेत्यमूः ।
संपूर्णषाडवाः प्राह चतस्रः सोढलात्मजः ॥ १३३ ॥
दशावशिष्टाः संपूर्णषाडवौडुविता मताः ॥
पञ्चमीमध्यमाषड्जमध्यमाख्यासु जातिषु ।
स्वरसाधारणं प्रोक्तं मुनिभिर्भरतादिभिः ॥ १३४ ॥
अंशेषु समवेष्वेव यथास्वनियमाद्भवेत् ।
एतदल्पानिगास्त्वाहुः कम्बलाश्वतरादयः ॥ १३५ ॥
अल्पद्विश्रुतिके रागभाषादावपि तन्मतम् ॥
निगयोरंशयोः षड्जमध्यमायां न तद्भवेत् ।
विकृता एव तत्रापि स्वरसाधारणाश्रयाः ॥ १३६ ॥
एकांशा नन्दयन्ती च मध्यमोदीच्यवा तथा ।
गान्धारपञ्चमीत्येतास्तिस्रो द्व्यंशास्तु धैवती ॥ १३७ ॥
गान्धारोदीच्यवा चाथ पञ्चमीत्युदिता इमाः ।
नैषाद्यार्षभिकाषड्जकैशिक्यस्त्र्यंशिका मताः ॥ १३८ ॥
आन्ध्रीकार्मारवीषड्जोदीच्यवाश्चतुरंशकाः ।
पञ्चांशा रक्तगान्धारी गान्धारी मध्यमा तथा ॥ १३९ ॥
षाड्जीत्येताश्चतस्रः स्युः षडंशैकैव कैशिकी ।
सप्तांशा सूरिभिः षड्जमध्यमा परिकीर्तिता ॥ १४० ॥
इति त्रिषष्टिरंशाः स्युर्जातिष्वष्टादशास्विमे ॥

---

ग्रहांशतारमन्द्राश्च न्यासापन्यासकौ तथा ।
अपि संन्यासविन्यासौ बहुत्वं चाल्पता ततः ॥ १४१ ॥
एतान्यन्तरमार्गेण सह लक्ष्माणि जातिषु ।
षाडवौडुविते क्वापीत्येवमाहुस्त्रयोदश ॥ १४२ ॥



गीतादिनिहितस्तत्र स्वरो ग्रह इतीरितः ।
तत्रांशग्रहयोरन्यतरोक्तावुभयग्रहः ॥ १४३ ॥
यो रक्तिव्यञ्जको गेये यत्संवाद्यनुवादिनौ ।
विदार्यां बहुलौ यस्मात्तारमन्द्रव्यवस्थितिः ॥ १४४ ॥
यः स्वयं यस्य संवादी चानुवादी स्वरोऽपरः ।
न्यासापन्यासविन्याससंन्यासग्रहतां गतः ॥ १४५ ॥
प्रयोगे बहुलः स स्याद्वाद्यंशो योग्यतावशात् ॥
रागश्च यस्मिन्वसति यस्माच्चैव प्रवर्तते ।
तेनैव तारमन्द्राणां योऽत्यर्थमुपलभ्यते ॥ १४६ ॥
ग्रहापन्यासविन्याससंन्याससन्यासयोगतः ।
अनुवृत्तश्च यश्चेह सोंऽशः स्याद्दशलक्षणः ॥ १४७ ॥
बहुलत्वं प्रयोगेषु व्यापक त्वंशलक्षणम् ॥
मध्यमे सप्तकेंऽशः स्यात्तस्मात्तारस्थितात्परान् ।
स्वरांश्चतुर आरोहेदेष तारावधिः परः ॥ १४८ ॥
अर्वाक्तु कामाचारः स्यात्तारे लुप्तोऽपि गण्यते ।
आतारषड्जमारोहो नन्दयन्त्यां प्रकीर्तितः ॥ १४९ ॥
तारगत्या तु षड्जं च कदाचिन्नातिवर्तते ।
अंशाक्षरैर्गतिं विद्यादाचतुर्थस्वरादिह ॥ १५० ॥
आपञ्चमात्सप्तमाद्वा नातः परमिहेष्यते ॥
मध्यस्थानस्थितादंशादामन्द्रस्थांशमाव्रजेत् ।
आमन्द्रन्यासमथवा तदधःस्थरिधावपि ॥ १५१ ॥
एषा मन्द्रगतेः सीमा ततोऽर्वाक्कामचारिता ॥
मन्द्रस्त्वंशात्परो नास्ति न्यासे तु द्वौ व्यवस्थितौ ।
गांधारन्यासलिंगेन दृष्टमार्षभसेवनम् ॥ १५२ ॥
गीते समाप्तिकृन्न्यास एकविंशतिधा च सः ॥
षाड्ज्यादीनां तु सप्तानां न्यासः स्यान्नामकृत्स्वरः ।
द्वौ नामकारिणौ षड्जमध्यमायां तु तौ मतौ ॥ १५३ ॥

उदीच्यवात्रयं मान्तं निषगान्ता तु कैशिकी ।
कार्मारवी पञ्चमान्ता गान्ताः पञ्चापराः स्मृताः ॥ १५४ ॥
अपन्यासः स्वरः स स्याद्यो विदारीसमापकः ।
कार्मारव्यां च नैषाद्यामान्ध्रीमध्यमयोस्तथा ॥ १५५ ॥
आर्षभ्यां च स्वरा येंऽशास्तेऽपन्यासाः प्रकीर्तिताः ।
उदीच्यवानां त्रितयेऽपन्यासौ षड्जधैवतौ ॥ १५६ ॥
मध्यमो रक्तगान्धार्यां गान्धार्यां षड्जपंचमौ ।
सारिपाः षड्जकैशिक्यां पञ्चम्यां निरिपाः स्मृताः ॥ १५७ ॥
रिपौ गान्धारपञ्चम्यां षाड्ज्यां गान्धारपञ्चमौ ।
धैवत्यां रिधमाः प्रोक्ता नन्दयन्त्यां मपौ मतौ ॥ १५८ ॥
रिवर्ज्याः षट् च कैशिक्यां सप्तापीत्यूचिरे परे ।
सप्तस्वरापन्यासां तु भाषन्ते षड्जमध्यमाम् ॥ १५९ ॥
अत्र येंऽशा अपन्यासास्ते स्युरेकोनविंशतिः ॥
सप्तत्रिंशत्परे ते च षट्पञ्चाशत्तु संयुताः ।
कैशिक्यां सप्तपक्षे तान्सप्तपञ्चाशतं विदुः ॥ १६० ॥
अंशाविवादी गीतस्याऽऽद्यविदारीसमाप्तिकृत् ।
संन्यासोंऽशाविवाद्येव विन्यासः स तु कथ्यते ॥ १६१ ॥
यो विदारीभागरूपपदप्रान्तेऽवतिष्ठते ॥
अलङ्घनात्तथाऽभ्यासाद्बहुत्वं द्विविधं मतम् ।
पर्यायांशे स्थितं तच्च वादिसंवादिनोरपि ॥ १६२ ॥
अल्पत्वं च द्विधा प्रोक्तमनभ्यासाच्च लङ्घनात् ।
अनभ्यासस्त्वनंशेषु प्रायो लोप्येष्वपीक्ष्यते ॥ १६३ ॥
ईषत्स्पर्शो लङ्घनं स्यात्प्रायस्तल्लोप्यगोचरम् ।
उशन्ति तदनंशेऽपि क्वचिद्गीतविशारदाः ॥ १६४ ॥
न्यासादिस्थानमुज्झित्वा मध्ये मध्येऽल्पतायुजाम् ।
स्वराणां या विचित्रत्वकारिण्यंशादिसंगतिः ॥ १६५ ॥



अनभ्यासैः क्वचित्क्वापि लङ्घनैरेव केवलैः ।
कृता साऽन्तरमार्गः स्यात्प्रायो विकृतजातिषु ॥ १६६ ॥
षडवन्ति प्रयोगं ये स्वरास्ते षाडवा मताः ।
षट्स्वरं तेषु जातत्वाद्गीतं षाडवमुच्यते ॥ १६७ ॥
वान्ति यान्त्युडवोऽत्रेति व्योमोक्तमुडवं बुधैः ।
पञ्चमं तच्च भूतेषु पञ्चसंख्या तदुद्भवा ॥ १६८ ॥
उडुवी साऽस्ति येषां च स्वरास्ते त्वौडुवा मताः ।
तेषु जातं तु यद्गीतं तदौडुवितमुच्यते ॥ १६९ ॥
तत्संबन्धादौडुवं च पञ्चस्वरमिदं विदुः ॥

ग्रहादीनां त्रयोदशानां जातीनां प्रत्येकसमन्वर्थतया स्वरूपे निरूप्य भाषादिजनकग्रामरागजनकजातिषु मध्ये प्रथमं लोके भैरवस्य प्रसिद्धत्वात् षड्जोदीच्यवां लक्षयति ।

अंशाः समनिधाः षड्जोदीच्यवायां प्रकीर्तिताः ।
मिथश्च संगतास्ते स्युर्मन्द्रगान्धारभूरिता ॥ १७० ॥
षड्जर्षभौ भूरितारौ रिलोपात्षाडवं मतम् ।
औडुवं रिपलोपेन धैवतेंऽशे न षाडवम् ॥ १७१ ॥
षाड्जीवद्गीतितालादि गान्धारादिश्च मूर्छना ।
द्वितीये प्रेक्षणे गाने ध्रुवायां विनियोजनम् ॥ १७२ ॥
अस्यां मध्यमो न्यासः । षड्जधैवतावपन्यासौ ।

---

### अथ भिन्नषड्जः ।

षड्जोदीच्यवतीजातो भिन्नषड्जो रिपोज्झितः ।
धांशग्रहो मध्यमान्त उत्तरायतयायुतः ॥ १७३ ॥
संचारिवर्णरुचिरः प्रसन्नान्तविभूषितः ।
काकल्यन्तरसंयुक्तश्चतुराननदैवतः ॥ १७४ ॥
हेमन्ते प्रथमे यामे बीभत्से सभयानके ।
सार्वभौमोत्सवे गेयः ॥

श्रुतिभिन्नो जातिभिन्नः शुद्धभिन्नः स्वरैस्तथा ।
चतुर्भिर्गीयते यस्मात्तस्माद्भिन्नः स उच्यते ।। १७५ ।।

---

अथ श्रुतिभिन्नस्य लक्षणम् ।

चतुः श्रुतिस्वरो यत्र भिन्नद्विश्रुतिको भवेत् ।
गांधारो द्विश्रुतिश्चैव श्रुतिभिन्नः स उच्यते ।। १७६ ।।

---

अथ जातिभिन्नस्य लक्षणम् ।

जातीनामंशकः स्थायी स्वल्पकस्तु बहुत्वतः ।
सूक्ष्मातिसूक्ष्मैर्वक्रैश्च जातिभिन्नः स उच्यते ।। १७७ ।।

---

अथ शुद्धभिन्नस्य लक्षणम्

परित्यज्यान्यगतिं स्वजातिकुलभूषणः ।
स्वकं कुलं तु संगृह्य शुद्धभिन्नः स उच्यते ।। १७८ ।।

---

अथ स्वरभिन्नस्य लक्षणम् ।

यदा वादी गृहीतः स्यात्संवादी च विमोक्ष्यते ।
विवादी चानुवादी च स्वरभिन्नः स उच्यते ।। १७९ ।।

---

ध्यानम् ।

रागकुतूहलेः—

कृपाणसंभिन्नरिपूत्तमांगः ।
कृतप्रहारोऽपि मुहुर्मुहुश्च ।।
पीनो रणे भाति गभस्तिशूरः ।
स भिन्नपड्जः कथितो मुनींद्रैः ।। १८० ।।

---



अथ भैरवः ।

रत्नाकरमते प्राह भैरवस्तत्समुद्भवः ।
धांशो मांतो रिपत्यक्तः प्रार्थनायां समस्वरः ।। १८१ ।।
धैवतांशग्रहन्यासः संपूर्णः स्यात्समस्वरः ।
तारमंद्रो यथा पड्जो गांधारः शुद्धभैरवः ।। १८२ ।।
रत्नाकरे द्विधा प्रोक्तः पूर्णौडुवप्रभेदतः ।।
तत्रौडुवेन हिंदोले तत्त्वभेदः प्रकथ्यताम् ।
जन्यजनकभेदोऽपि भो संगीतविशारदाः ।। १८३ ।।
पारिजातस्य मतवत् श्रीनिवासमते मतः ।।
भैरवे तु रिपौ न स्तो धैवतादिकमूर्च्छनः ।
तत्रोक्तौ च गनी तीव्रौ कोमलो धैवतः स्मृतः ।। १८४ ।।
रागार्णवमतेऽपि स्यात् रिपहीनोऽथमांतगः ।
धैवतो विकृतो यत्र चौडुवः परिकीर्तितः ।। १८५ ।।
दामोदरकृते ग्रंथे दर्पणेऽपीदमेव च ।
एतेषामैकमत्यम् ।।
नृत्यादिनिर्णयमतं प्राह भावः प्रसन्नधीः ।
तत्र विठ्ठलभट्टेन पूर्णपाडवभेदतः ।। १८६ ।।

रागमालायाम्ः—

सद्यो जातोद्भवोऽयं प्रथमगतिगनिः सत्रिकोऽरिः कपर्दी ।
रक्तः श्यामस्त्रिशूली सिततरवसनो भस्मदेहस्त्रिनेत्रः ।।
कंठे शृंगं दधानः श्रवणयुगलतो मुद्रिके चंद्रजूटो ।
हैमन्तेऽपि प्रभाते विलसति वपपो भैरवः शुद्धपूर्वः ।।१८७।।
रागमंजरिके ग्रंथेऽप्युक्तं विठ्ठलभट्टकैः ।।
रिहीनो भैरवः सात्रिर्मेळे हिज्जेजसंज्ञके ।
उक्तं नोद्घाटितं तत्तु श्रीमद्विठ्ठलभट्टकैः ।। १८८ ।।
रागचंद्रोदये ग्रंथे संपूर्णो भैरवः स्मृतः ।।

चंद्रोदये:—

धांशग्रहन्यासयुतश्च पूर्णः ।
प्रातः प्रयुज्येत स भैरवाख्यः ॥
इदं समंजसं प्रोक्तं श्रीमद्विठ्ठलभट्टकैः ।
उक्तं नोदाहृतं कस्मात् श्रीमद्विठ्ठलभट्टकैः ॥ १८९ ॥
सदसद्विचारदक्षा ये सन्त्यत्र विचारकाः ।
स्वग्रंथे सोमनाथोक्तं लक्षणं तद्विविच्यताम् ॥ १९० ॥

रागविबोधे:—

भैरवमेले शुद्धाः सरिमपधा अन्तरश्च कैशिककः ।
भैरवपौरविकाद्या रागा मेलादतस्तु स्युः ॥ १९१ ॥
संपूर्णो भैरवो प्रातर्मतो धांशग्रहश्च सः ।
अंशांतरो ग्रहस्तस्मात् कैशिकत्वं प्रकथ्यताम् ॥ १९२ ॥
अथात्रैकगतित्वन्तु पारिजाते प्रकल्पितम् ।
विनापि तेन लोकेऽत्र तदुद्भवः प्रतीयते ॥ १९३ ॥
तस्माद्भैरवरागस्तु त्रिविधः परिकीर्तितः ।
वसंतभैरवस्तुर्यस्तत आनंदभैरवः ॥ १९४ ॥
नंदभैरवसंज्ञस्तु गांधारभैरवस्तथा ।
स्वर्णाकर्षणपूर्वस्तु ततः पंचमभैरवः ॥ १९५ ॥
नवधायं प्रपंचोक्तः श्रीजनार्दनसूनुना ॥
संपूर्णो भैरवः प्रोक्तो गांधारादिकमूर्छनः ।
गादित्वं तु कुतो ज्ञातं श्रीमद्हृदयभूभुजा ॥ १९६ ॥
शुद्धभैरवसंज्ञोऽत्राप्युक्तो विठ्ठलभट्टकैः ॥

रागमालायाम्:—

भस्मांगः कंठशृंगी श्रवणयुगलतः शंखमुद्रे दधानः ।
पादत्राणे प्रवाले फणिपतिसुजटाबद्धमौलिः प्रसन्नः ॥
उज्झालस्यानुयायी पटुतरवचनः किंनरीवाद्यमानः ।
पूर्णो धाद्यंतमध्यस्त्वनलविधुगनिर्भैरवः पूर्वयामे ॥ १९७ ॥



प्रसिद्धरागभाषाख्यलक्षणे समुदाहृते ।
ग्रहांशन्यासकल्पत्वे रिपहीने च भैरवे ॥ १९८ ॥
भिन्नषड्जेन रागेण कथं भेदः प्रतीयते ।
अभेदे पुनरुक्तिः स्याज्ज्ञात्रभट्टेन कीर्तिता ॥ १९९ ॥
विरोधोऽस्ति नवीनैस्तु हिंदोलभिन्नषड्जयोः ।
कोमलत्वे [illegible] श्रीनिवासमते कथम् ॥ २०० ॥
नृत्यनिर्णयकारेण पंचमग्रहणं कृतम् ।
रिहीनत्वं कथं प्रोक्तं तस्य मूलं न दृश्यते ॥ २०१ ॥
पूर्णत्वे न विरोधोऽस्ति मतं तत्सर्वसंमतम् ॥

---

## अथ हिजेजः ।

मंजर्याम्:—

गनीह्येकगती यत्र हिजेजाख्यस्य मेलकः ।
हिजेजः सर्वदा पूर्णो निस्त्रिः सांतरकाकली ॥ २०२ ॥

रागविबोधे:—

मांशग्रहः सन्यासोऽखिलो हिजेजस्तु सायाह्ने ॥

चन्द्रोदये:—

शुद्धौ सरी मध्यमपंचमौ च ।
विशुद्धधो मो लघुशब्दपूर्वः ॥
निः कैशिकी चापि यदा तदा तु ।
हिजेजरागस्य हि मेलकः स्यात् ॥ २०३ ॥
न्यंशग्रहांत्योऽतरकाकलीकः ।
पूर्णो हिजेजः क्रियते सदैव ॥

---

## अथ वसंतभैरवः ।

पारिजाते:—

कोमलाख्यौ रिधौ तीव्रौ गनी वसंतभैरवे ।
धैवतांशग्रहन्यासो मध्यमांशोऽपि संमतः ॥ २०४ ॥

---

## अथ आनंदभैरवः ।

भैरवीलक्ष्मसंयुक्तस्त्वानंदभैरवः स्मृतः ।
स्वमेलजनितत्वं तु विशेषः समुदाहृतः ॥ २०५ ॥

---

## अथ नंदभैरवः ।

निषादनैम्न्ययुक्तस्तु गांधारग्रहसंयुतः ।
बहुलीलक्ष्मसंयुक्तो नंदभैरवसंज्ञकः ॥ २०६ ॥

---

## अथ गांधारभैरवः ।

गांधारेण समायुक्तो गांधारभैरवः स्मृतः ॥

---

## अथ पंचमभैरवः ।

पंचमेन समायुक्तः प्रोक्तः पंचमभैरवः ॥

---

## अथ स्वर्णाकर्षणभैरवः ।

गांधाररहितः प्रोक्तः स्वर्णाकर्षणभैरवः ।
एवं दशविधो रागो भैरवः समुदाहृतः ॥ २०७ ॥

---

## ध्यानम् ।

गंगाधरः शशिकलातिलकस्त्रिनेत्रः ।
सर्पैर्विभूषिततनुर्गजकृत्तिवासाः ॥
भास्वत्त्रिशूलकर एष नृमुंडधारी ।
शुभ्राम्बरो जयति भैरव आदिरागः ॥ २०८ ॥

इति श्रीअनूपसिंहकारिते भावप्रकाशे भैरवराग-
विवरणम् ।

---



## अथ भैरवी ।

पारिजाते:—

सस्वरांशग्रहन्यासा भैरवी स्याद्रिकोमला ।
रिणारोहे तु पन्यासा पञ्चमेनोभयोरपि ॥ २०९ ॥
षड्जेनाप्यवरोहे तु सर्वदा सुखदायिनी ॥

---

## अथ बंगाली ।

पारिजाते:—

बंगाली रिधहीना स्यान्मतीव्रतरसंयुता ।
नितीव्रेणापि संयुक्ता सस्वरोत्थितमूर्छना ॥ २१० ॥

---

## अथ आडीकामोदी ।

रत्नाकरे:—

आडीकामोदिका तज्जा ग्रहांशन्यासधैवता ।
समंद्रा तारगांधारा गुर्वाज्ञायां समस्वरा ॥ २११ ॥

---

## अथ कामोदः ।

रत्नाकरे:—

तारषड्जग्रहः षड्जे षड्जमध्यमिकोद्भवः ।
गतारमंद्रः कामोदो धांशः सांतः समस्वरः ॥ २१२ ॥

---

## अथ द्वितीयकामोदः ।

षड्जे षाड्जीभवं षड्जग्रहांशन्याससंयुतः ।
समस्वरोऽन्यकामोदे मंद्रगांधारसुंदरः ॥ २१३ ॥

---

## अथ सिंहलीकामोदा ।

कामोदोपांगमाख्याता कामोदा सिंहली बुधैः ।
कामोदलक्षणोपेता समंद्रा कंपधैवता ॥ २१४ ॥

संकीर्णरागाध्याये:—

गौंडाद्विलावलाज्जातः कामोदः पंचधा भवेत् ॥
प्रथमः शुद्धकामोदः सामंतस्तिलकस्तथा ॥
पुनः कल्याणकामोदो नाटपूर्वश्च पंचमः ॥ २१५ ॥
तथा हि शुद्धकामोदो यदि शुद्धेन संयुतः ॥
कामोदेन यदायुक्तः केदारो यदि गीयते ।
तदा भवति सामंतकामोदः प्रीतिवर्धनः ॥ २१६ ॥
षड्रागो यदि संयुक्तः कामोदेन ततादिषु ।
तदा तिलककामोदो भवेद्द्रवविदारकः ॥ २१७ ॥
यदीमने संमिलतीह गौंड—
स्तुंडे गुणीनामथवार्धद्वंद्वे ॥
तदावनीपालसभासु याति ।
कल्याणकामोद इति प्रसिद्धीम् ॥ २१८ ॥
शुद्धनाटेन कामोदो युक्तः कामोदनाटकः ।
आडीसिंहालिपूर्वस्तु कामोदः सप्तधा भवेत् ॥ २१९ ॥
सौराष्ट्रीकौरवीयोगात्कामोदी समुदीर्यते ॥

मंजर्याम्:—

निगावेकैकगतिकौ तृतीयगतिकोऽपि मः ।
एष कामोदमेलः स्यादस्मादन्यतराः परे ॥ २२० ॥
सत्रिः संपूर्णः कामोदो गायेत्तुरीययामतः ॥

चन्द्रोदये:—

शुद्धौ पधौ पंचमको लघुश्च ।
शुद्धौ सरी त्रिश्रुतिकौ निगौ च ॥
एवं यदास्यात्स्वरमेलनं च ।
तदा हि कामोदकमेल एषः ॥ २२१ ॥
षड्जग्रहांशांतविराजमानः ।
कामोदरागो दिवसांत्ययामे ॥



नृत्यनिर्णये:—

कामोदः कामरूपी धृतकुमुदकरः श्वेतवस्त्रं दधानः ।
कस्तूरीबिंदुभालः कुसुमसुमुकुटः कंठमालादिकाढ्यः ॥
वक्ता सद्व्यंग्यवाक्यं युवजनसहितो वेत्रहस्तः प्रतापी ।
संपूर्णः सत्रिको [illegible]गौ त्रिश्रुतिगनिकश्चापराह्णे चकास्ति॥२२२॥

---

## अथ ललिता ।

पारिजाते:—

या गौरीरागसंभूता ललिता पंचमोज्झिता ।
सांशग्रहा तथा मांता गीतांते सा सुशोभना ॥ २२३ ॥

रत्नाकरे:—

भिन्नषड्जेऽपि ललिता ग्रहांशन्यासधैवता ।
रिगमैर्ललितैस्तारमंद्रैर्युक्ता धमंद्रभाक् ॥ २२४ ॥
प्रयोज्या ललिते स्नेहे मतंगमुनिसंमता ॥

---

## अथ भिन्नषड्जस्य भाषाः ।

## अथ गांधारवल्ली ।

रत्नाकरे:—

गांधारवल्ली भाषा स्याद्भिन्नषड्जस्य धांतिमा
मांशा पूर्णा सधयुता गीयते पितृकर्मणि ॥ २२५ ॥

---

## अथ कच्छेली ।

षड्जग्रहांशा मन्यासा कूटतानसमाश्रया ।
गधहीना भिन्नषड्जे कच्छेलीं तां विदुः परे ॥ २२६ ॥
मग्रहांशा मंद्रतारऋषभा गनिवर्जिता ॥

---

## अथ स्वरवल्लिका ।

रिहीना निग्रहा धांशन्यासा स्यात्स्वरवल्लिका ।
भिन्नषड्जस्य भाषेयं मृदुला मुनिसंमता ॥ २२७ ॥

अथ निषादिनी ।

निषादिनी भिन्नषड्जभाषा धांशग्रहांतिमा ॥

अथ मध्यमा ।

मध्यमा भिन्नषड्जस्य भाषा मांता ग्रहांशधा ॥

अथ शुद्धा ।

धांशग्रहांता मृदुलधैवता रिपवर्जिता ।
पवर्जिता वा सगयोः संगंधा भिन्नषड्जजा ॥ २२८ ॥
गापन्यासा मंद्रमगधा शुद्धादिदीर्घपंचमा ॥

अथ दाक्षिणात्या ।

धाद्यंतांशा दाक्षिणात्या भाषा पंचमदुर्बला ।
सधयोः सपयोर्युक्ता षाडवा भिन्नषड्जजा ॥ २२९ ॥

अथ पुलिंदी ।

सांता धांशा हीनगपा पुलिंदी भिन्नषड्जजा ।
सधयोः समयोर्युक्ता पुलिंदजनवल्लभा ॥ २३० ॥

अथ तुंबुरा ।

तुंबुरा भिन्नषड्जस्य भाषा रिपभवर्जिता ।
धैवतांशग्रहन्यासा गीयते ब्रह्मचारिणा ॥ २३१ ॥

अथ षड्जभाषा ।

षड्जभाषा भिन्नषड्जभाषा धांशग्रहांतिमा ।
सकाकल्यंतरा त्यक्तरिपा देवार्चने मता ॥ २३२ ॥



अथ कालिंदी ।

गांशा मिदुर्बला धांता परिहीना चतुःस्वरा ।
ह्यारोहावरोहे च कालिंदी भिन्नषड्जजा ॥ २३३ ॥

अथ श्रीकंठी ।

धाद्यंतांशा परहिता श्रीकंठी भिन्नषड्जजा ।
भाषाऽपन्यासऋषभा रिमयोः संगता भवेत् ॥ २३४ ॥

अथ गांधारी ।

गांधारांशा मध्यमांता गांधारी मध्यमोप्सिता ।
गेयैकांते भिन्नषड्जभाषा शार्दूलसंमता ॥ २३५ ॥

अथ भिन्नषड्जस्य विभाषाः ।

अथ पौराली ।

विभाषा भिन्नषड्जस्य मांशा धांता रिदुर्बला ।
नागप्रिया स्यात्पौराली रिमपैः संगता मिथः ॥ २३६ ॥

अथ मालवी ।

पूर्णा सरिगमैर्बद्धा ग्रहांशन्यासधैवता ।
धमंद्रा भिन्नषड्जोत्था विभाषा मालवी मता ॥ २३७ ॥

अथ कालिंदी ।

गग्रहा धांतिमा न्यल्पा परिहीना समस्वरा ।
विभाषा स्यात्तु कालिंदी विस्मये भिन्नषड्जजा ॥ २३८ ॥

## अथ देवारवर्धिनी ।

भिन्नषड्जे विभाषा तु भवेद्देवारवर्धिनी ।
निषादांशा धैवतांता रिषभेण विवर्जिता ॥ २३९ ॥

---

## अथ पंचमषाडवः ।

तज्जनिततया जातिद्वयं लक्षयति ।

रत्नाकरे:—

आर्षभ्यां तु त्रयोंशाः स्युर्निषादर्षभधैवताः ।
द्विश्रुत्योः संगतिः शेषैर्लंघनं पंचमस्य च ॥ २४० ॥
षाडवं षड्जलोपेन सपलोपादिहौडुवम् ।
मूर्छना पंचमादिश्च तालश्चञ्चत्पुटो मतः ॥ २४१ ॥
अष्टौ कला भवंतीह विनियोगस्तु पूर्ववत् ॥
मध्यमग्रामसंबंधे धैवत्यार्षभिकोद्भवः ।
रिन्यासांशग्रहे क्वापि मांतः पंचमषाडवः ॥ २४२ ॥
विलसत्काकली कोऽपि कलोपनतार्थान्वितः ।
प्रसन्नाद्यंतकलितारोहिवर्णः शिवप्रियः ॥ २४३ ॥
वीररौद्राद्भुतरसो नारीहास्ये नियुज्यते ॥

---

## ध्यानम् ।

रागकुतूहले:—

प्रभूतशक्तिर्हतवैरिशक्तिः ।
परं निहंतुर्धृतहस्तखड्गः ॥
सुशोभिसन्नाहविशोभितांगः ।
स पिंजरः पंचमषाडवाख्यः ॥ २४४ ॥

---

## अथ गुर्जरिका ।

रत्नाकरे:—

तज्जा गुर्जरिका मान्द्रा रिग्रहांशा समध्यभाक् ।
रितारा रिश्चभूयिष्ठा शृङ्गारे नाडिना मता ॥ २४५ ॥



रागविबोधे:—

गुर्जरिका रिन्यासग्रहांशया पविमुक्ता प्रभातार्हा ॥

मंजर्याम्:—

निगौ तृतीयगनिकौ गौडी मेलः प्रकीर्तितः ।
रित्रिका पेनहीना सा गुर्जरी प्रातरिष्टदा ॥ २४६ ॥

चन्द्रोदये:—

शुद्धा सरी मध्यमपंचमौ च ।
शुद्धस्तथा धैवतको यदि स्यात् ॥
लघ्वादिकौ षड्जकमध्यमौ च ।
तदा भवेन् मालवगौडमेलः ॥ २४७ ॥
न्यंशग्रहान्ता ससमुद्रिता वा ।
स्याद्गुर्जरी प्रातरियं विगेया ॥
पांशग्रहत्वं ससमुद्रितत्वम् ।
निर्मूलमेतत्प्रवदंति तज्ज्ञाः ॥

नृत्यनिर्णये:—

संधत्ते हस्तमूले करिरदवलयान्यंघ्रिमंजीरयुग्मम् ।
नासाग्रे हेमपुष्पं कनकसमनिभां कंचुकीं रक्तवस्त्रम् ॥
बिंबोष्ठी गौरवर्णा द्विजसुररचिता मुक्तकच्छाप्यसौ वा ।
रामक्रीमेलसौख्या त्रिसमयरिरसौ गुर्जरीयं प्रभाते ॥ २४८ ॥

हृदयप्रकाशे:—

रिधयोः कोमलत्वात्तु गन्योस्तीव्रतरत्वतः ।
गादिर्मांशा मनिस्यागादौडुवेऽथ गुर्जरी ॥ २४९ ॥

---

गादिदं तु मतं कस्य भो संगीतविशारदाः ।
पूर्वाचार्यैर्विरोधोऽत्र कथं तैः प्रतिपादितः ॥ २५० ॥
कल्लिनाथमतं प्राह जनार्दननंदनः ॥
सगता समया रिन्यासा संपूर्णा निग्रहांशिका ।
षड्जांता देशजा रक्ता विभाषा गुर्जरीमता ॥ २५१ ॥

शुद्धपंचमभाषा स्याद्गुर्जरी पग्रहांशिका ।
पाला सगा चासंपूर्णा गपा पन्यासभूषिता ॥ २५२ ॥

पारिजाते:--

गुर्जरी मालवोत्पन्नावरोहे मानिवर्जिता ।
गाश्लिष्टा मध्यमोपेता धैवतश्लिष्टसस्वरा ॥ २५३ ॥
गांधारमूर्च्छनोपेता दाक्षिणात्या प्रकीर्तिता ।
औत्तरा गुर्जरी ज्ञेया शुद्धगा पूर्ववत्सदा ॥ २५४ ॥

---

इयं नोदाहृता कस्मादहोबलमहाशयैः ।

---

श्यामो रामकरीरागो गांधारो बहुलगुर्जरी ।
एता एकत्र गीयंते भवेन्मंगलगुर्जरी ॥ २५५ ॥
गुर्जरदेशप्रचाराद्गुर्जरी । बहुलीयोगाद्भवेद्बहुलगुर्जरी ।
रामगुर्जरिकादिस्याद्रामक्री रागयोगतः ।
श्यामगुर्जरिकापि स्यात् श्यामरागस्य मिश्रणात् ॥ २५६ ॥

रागकुतूहले:—

चतुर्धा गुर्जरिका रत्नाकरमते मता ॥

---

## अथ महाराष्ट्रगुर्जरी ।

रत्नाकरे:—

पंचमेनोज्झिता मंद्रा निषादा ताडितोन्सवे ।
गीयते ऋषभांतांशा महाराष्ट्री तु गुर्जरी ॥ २५७ ॥

---

## अथ सौराष्ट्रगुर्जरी ।

गुर्जर्यैव रिकंपाढ्या, सौराष्ट्री गुर्जरी भवेत् ।

---

## अथ दक्षिणा गुर्जरी ।

दक्षिणा गुर्जरी कंप्रमध्यमा ताडितेतरा ।

---



## अथ द्राविडगुर्जरी ।

रिपंद्रतारा स्फुरिता हर्षे द्राविडगुर्जरी ॥

---

### ध्यानम् ।

पिंगलवर्णाभरणा संचिंतितचित्तभारार्ता ।
असकृद्विहितकटाक्षा धृतहारा गुर्जरी ज्ञेया ॥ २५८ ॥

---

## अथ मालवकैशिकः ।

मंजर्याम्:--

एकैकगतिकौ रिधौ निगौ मालवकैशिके ।
सत्रिः सायं च रसिको मालवकैशिकोऽध्वगः ॥ २५९ ॥

हृदयप्रकाशे:--

गनितीव्रतरे मेले केदारः श्यामनाटकः ।
सन्यासः षाडवः सादिः कथितो मालवकैशिकः ॥ २६० ॥

पारिजाते:--

धैवतोद्ग्राहधांशांतो गौरीमेलसमुद्भवः ।
रागो मंगलकोशाख्यो धनिस्वरसमन्वितः ॥

---

### ध्यानम् ।

आरक्तवर्णः कृतरौद्रदृष्टि-
र्वीरः सुधीरेषु कृतप्रहारः ॥
वीरैर्धृतो वैरिकपालमालः ।
मालीमतो मालवकैशिकोऽयम् ॥ २६१ ॥

---

## अथ मालवकैशिकभाषाः ।

## अथ बांगाली ।

रत्नाकरे:—

सांता मांशग्रहा पूर्णा बांगाली मध्यमोज्वला ।
रिनसंवादिनी भाषा भवेन्मालवकैशिके ॥ २६२ ॥

---

अथ मांगली।

सार्यंतांशा मपाल्पा या स्फुरिता दीर्घधैवता।
रिगतारा मांगली स्याद्भाषा मालवकैशिके ॥ २६३ ॥

अथ मालववेसरी।

धवर्जिता सार्यंतांशा जाता मालवकैशिकात्।
रितारा मंद्रपा कंपमपा मालववेसरी ॥ २६४ ॥

अथ खंजिनी।

सांता मांशा धरहिता निसयो रिमयोर्युता।
संकीर्णा खंजिनी भाषा जाता मालवकैशिकात् ॥ २६५ ॥

अथ गुर्जरी।

रिन्योश्च रिमयोश्चैव संगता निग्रहांशिका।
षड्जांता गुर्जरी पूर्णा भाषा मालवकैशिकात् ॥ २६६ ॥

अथ पौराली।

पौराली सग्रहांशांता षड्जमध्यमभूयसी।
संपूर्णा चैव संकीर्णा जाता मालवकैशिकात् ॥ २६७ ॥

अथ अर्धवेसरी।

षड्जन्यासा मध्यमांशग्रहा पूर्णाऽर्धवेसरी।
निदुर्बला बहुसमा भाषा मालवकैशिके ॥ २६८ ॥

अथ शुद्धा।

मध्यमांशग्रहा षड्जन्यासा समस्वरैर्युता।
शुद्धा महर्षे नियुक्ता जाता मालवकैशिकात् ॥ २६९ ॥

अथ मालवरूपा।

गांधारधबला षड्जा ग्रहांतांशा निपोज्झिता।
भाषा मालवरूपा स्यादेषा मालवकैशिके ॥ २७० ॥

अथ आभीरी।

साधारणकृताऽऽभीरी निगाल्पा सरिसंगता।
पूर्णा सांतग्रहा वीरे भाषा मालवकैशिके ॥ २७१ ॥

अथ मालवकैशिकविभाषे।

अथ कांबोजी।

सार्यंतांशा निबहुला गमकोग्रा रिपोज्झिता।
कांबोजी मंद्रषड्जा विभाषा मालवकैशिके ॥ २७२ ॥

अथ देवारवर्धिनी।

देवारवर्धिनी सांशा जाता मालवकैशिकात्।
विभाषा त्यक्तगांधारन्निषादा पंचमांतिमा ॥ २७३ ॥

अथ मालवश्रीः।

रत्नाकरेः—

समस्वरा तारमंद्रा षड्जांशा न्यासषड्जभाक् ॥

चंद्रोदयेः—

सांशग्रहा सांतयुता रिधाल्पा।
पूर्णा सदा राजति मालवश्रीः ॥

हृदयप्रकाशेः—

रिधत्यागाद्गौडवेषु मालश्रीर्गादिरिष्यते ॥

पारिजाते:—

रिहीना मालवश्रीः स्याच्छुद्धमेलस्वरोद्भवा ।
मध्यादिस्वरोद्ग्राहा धांशयुक्तान्त्यपंचमा ॥ २७४ ॥

नृत्यनिर्णये:—

जाता श्रीरागमेले नवगिरिरचिता सादिमध्यांतिका या ।
श्रीखंडं पंकचोलीं कुसुमसुवसनं संदधाना मृगाक्षी ॥
प्रौढैःपद्व्यंग्यवाक्यैः प्रियमुपहसती मालवश्रीः सुतन्वी ।
वक्रक्षेपावकर्षैश्चपलकरतला भ्राम्यती सा सदैव ॥ २७५ ॥

मंजर्याम्:—

रिधाल्पा सत्रिका पूर्णा मालवश्रीः सदारुचिः ।

---

## ध्यानम् ।

स्वर्णारविंदस्य दलानि पाणौ ।
विभावयंती तनुदेहवल्लीम् ॥
मानूरहक्षस्य तले निषण्णा ।
शोणा स्मृता सा किल मालवश्रीः ॥ २७६ ॥

---

## अथ मुखारी ।

मंजर्याम्:—

सप्तस्वराः स्वभावाश्च मुखारीमेलको भवेत् ।
मुखारी सर्वदा गेया पूर्णा सत्रिका भवेत् ॥ २७७ ॥

चन्द्रोदये:—

सप्तस्वरा यत्र भवंति शुद्धाः ।
मुखारिकायाः कथितः समेलः ॥
न्यासांशसा सग्रहसंयुता सा ।
पूर्णा मुखारी क्रियते सदैव ॥ २७८ ॥

हृदयप्रकाशे:—

धकोमला मुखारी स्यात् पूर्णा धादिकमूर्छना ॥



पारिजाते:--

ऋषभः कोमलो यत्र गांधारः पूर्वसंज्ञकः ।
मुखार्यां धैवतोद्ग्राहो नियौ पूर्वाख्यकोमलौ ॥ २७९ ॥

रागविबोधे:--

सन्ति मुखारीमेले शुद्धाः षड्जादयः स्वराः सप्त ।
पूर्णा नित्यं गेया सांशन्यासग्रहा मुखारीयम् ॥२८०॥

---

## अथाभीरी ।

पारिजाते:--

धकोमला नितीव्राद्या षड्जपूर्वकमूर्छना ।
धगयोः कंपसंयुक्ता सपांशाभीरिका मता ॥ २८१ ॥

---

## अथ सुरालयः ।

पारिजाते:--

गौरीमेलसमुद्भूतो धैवतस्वरवर्जितः ।
आरोहणे रिहीनः स्यान्निषादादिः सुरालयः ॥ २८२ ॥

---

## अथ अर्जुनः ।

पारिजाते:--

गौरीमेलमुद्भूत आरोहे मनिवर्जितः ।
धगहीनोऽवरोहे स्यद्गादिरर्जुनसंज्ञकः ॥ २८३ ॥

---

## अथ पहाडी ।

पारिजाते:--

गौर्युत्पन्ना पहाडी स्यादवरोहे गवर्जिता ।
उद्ग्राहे षड्जसंपन्ना न्यासांशयो रिशोभिता ॥ २८४ ॥

---

## अथ षाडवः ।

रत्नाकरे:—

विकारिमध्यमोद्भूतः षाडवो गपदुर्बलः ।
न्यासांशमध्यमस्तारमध्यमग्रहसंयुतः ॥ २८५ ॥
काकल्यंतरसंयुक्तो मध्यमादिकमूर्छनः ।
अवरोह्यादिवर्णेन प्रसन्नान्तेन भूषितः ॥ २८६ ॥
पूर्वरंगे प्रयोक्तव्यो हास्यशृंगारदीपकः ।
शुक्रप्रियः पूर्वयामे तोडीजनकषाडवः ॥ २८७ ॥

---

### ध्यानम् ।

तरुमूले स्थितचेताः प्रियया सह संहसन् ।
धृतोत्तमांगमुकुटः शुद्धषाडव ईरितः ॥ २८८ ॥

---

## अथ तोडी ।

रत्नाकरे:—

मध्यमांशग्रहन्यासा सतारा कंप्रपंचमा ।
समेतरस्वरा मंद्रगांधारा हर्षकारिणी ॥ २८९ ॥

रागविबोधे:—

गाद्यंशसांतपूर्णा तोडी कंप्राणु संगवरुक् ॥

चंद्रोदये:—

शुद्धौ सरी मध्यमपंचमौ च ।
शुद्धस्तथा धैवतको यदि स्यात् ॥
साधारणो गोऽपि च कैशिकी निः ।
तदा तु तोड्याह्वयकस्य मेलः ॥ २९० ॥
मांशग्रहांता पधकंपयुक्ता ।
तोडी भवेत्प्रातरसौ तु पूर्णा ॥ २९१ ॥

मंजर्याम्:—

तोडीमेलः प्रसिद्धस्यादेकैकगतिकौ निगौ ।
प्रत्रिका पधकंपाढ्या पूर्णा तोडी प्रभातिका ॥ २९२ ॥



हृदयप्रकाशे:—

कोमलर्षभधा पूर्णा गांशा तोडी निरूप्यते ॥

रागतत्त्वविबोधे:—

षड्जपूर्वांतुतोडीस्याद्यत्रोक्तौ कोमलौ रिधौ ॥

नृत्यनिर्णये:—

सव्ये हस्ते सुदंडी त्वपरकरतले तालयुग्मं दधाना ।
लिप्तांगा चंदनाद्यैः सुशुभ्रवसना सर्वभू...भियुक्ता ॥
प्रौढा तांबूलवक्त्रा विकसितनयना मोहिनी मुक्तचूर्णा ।
पूर्णा मायंतमध्या प्रथमगतिगानिस्तोडिका मातेव ॥ २९३

---

### ध्यानम् ।

तुषारकुंदोज्ज्वलदेहयष्टिः ।
काश्मीरकर्पूरविलिप्तदेहा ॥
स्तनांतरे मौक्तिकहारशोभा ।
वीणाधरा राजति तोडिकेयम् ॥ २९४ ॥

---

## अथ छायातोडी ।

पारिजाते:—

छायातोडी तथैव स्यान्निपाभ्यां रहिता सदा ॥

---

### ध्यानम् ।

कुंदवर्णा विशालाक्षी मनोनयननंदिनी ।
श्रिता कल्पद्रुमच्छायां छायातोडी मता बुधैः ॥ २९५ ॥

---

## अथ तौरुष्कतोडी ।

रत्नाकरे:—

तोडयेव ताडिता गाल्पा तौरुष्की रिनिभूयसी ॥

रागविबोधे:—

पूर्णा तुरुष्कतोडी गांशादिः संगवे कंप्रा ॥

चंद्रोदये:—

मांशग्रहा मांतवती च पूर्णा ।
मन्याहता पंचमकंपयुक्ता ॥
सहस्ररश्मेरुदये विरेजे ।
तौरुष्कतोडीयमुदीर्यमाणा ॥ २९६ ॥

रागमालायाम्:—

छायानाटस्य मेले प्रकटितसुतनुर्मादिमध्यांतपूर्णा ।
गौरांगी मूर्ध्नि वेणीं कनकमणिमयं कर्णपुष्पं दधाना ॥
गौढेपद्रक्तनेत्रा यवनसुवनिता वस्त्रवेशादिकाढ्या ।
द्राक्षां पीत्वा प्रभाते विलसति चतुरा यावनी तोडिका सा॥२९७॥

---

ध्यानम् ।

तुरुष्कदेशप्रचुरप्रचारा ।
सिताऽसिता पुष्पवरं दधाना ॥
सुरक्तवस्त्रेण विभूषितांगी ।
तुरुष्कतोडी कथिता मुनींद्रैः ॥ २९८ ॥

---

अथ तोडीवादनप्रकारः ।

स्थायिनं मध्यमं कृत्वा कंपयित्वा परं स्वरम् ।
तुर्यं विलंवि तं कृत्वा तृतीयं तं द्रुताहतम् ॥ २९९ ॥
विधाय तं पुनः प्रोच्य ग्रहन्यासेन जायते ।
स्वस्थानं प्रथमं तोड्याः प्रोक्तं मुनिवरैरिति ॥ ३०० ॥
प्राक्स्वस्थानवदारुह्य पंचमादवरुह्यते ।
स्थायिस्वरान्तः यत्रादः स्वस्थानं स्याद्द्वितीयकम् ॥ ३०१ ॥
प्राग्वदापष्ठमारोहावरोही च ग्रहावधिः ।
अस्याः तृतीयस्वस्थाने चतुर्थे त्वष्टमावधौ ॥ ३०२ ॥
आरोहिण्यवरोही स्यात्पूर्ववत्तद्विदां मतः ।
मुद्रितस्तु ग्रहः प्रोक्तो लक्ष्यस्याल्लक्ष्मवेदिभिः ॥ ३०३ ॥

---



अथ ललिता ।

रत्नाकरे:—

टक्कभाषेव ललितां ललितैरुत्कटैः स्वरैः ।
षड्जांशग्रहणन्यासा षड्जमन्द्रा रिपोज्झिता ॥ ३०४ ॥
श्रीरैवीरोत्सवे प्रोक्ता तारगांधारधैवता ॥

मंजर्याम्:—

धत्रिः संपूर्णललितः प्रातर्गेयश्च गायकैः ॥

चन्द्रोदये:—

सांशग्रहान्तो ललितोऽपरोऽसौ समस्वरः प्रातरसौ विगेयः ॥

नृत्यनिर्णये:—

सांशाद्यंतः प्रवीणः शुचितरललितो मारवीमेलजातो ।
भाले धत्ते सुबिंदुं कनकसमनिभं शुभ्रवस्त्रं दधानः ॥
गौरांगश्चंपमल्लीकुसुमभरशिराः पंकजाक्षो विलासी ।
कामी तांबूलहस्तः प्रतिदिनमुपासि प्रार्थकः खंडितानाम्॥३०५॥

---

अथ वादनप्रकारः ।

स्थायिनं द्विगुणं षड्जं द्रुतीकृत्य द्वितीयकम् ।
उक्त्वा द्वितीयतृतीयौ द्रुतीकृत्याधराधरम् ॥ ३०६ ॥
उदीर्य तं द्रुतीकृत्य द्वितीयं वादयेत्ततः ।
त्रितीयं द्विस्त्रिराहत्य स्थायिनि न्यस्यते यदा ।
ललितायास्तदा प्रोक्तं स्वस्थानं प्रथमं बुधैः ॥ ३०७ ॥
अस्यामपि स्वरो लक्ष्ये तृतीयो लक्ष्यते ग्रहः ॥

---

अथ सौराष्ट्री ।

मंजर्याम्:—

सत्रिः सायं च सौराष्ट्री पूर्णा शृंगारवल्लभा ॥

चंद्रोदये:—

सांशग्रहा सांतयुता च पूर्णा ।
सौराष्ट्रिका सायमियं त्रिगेया ॥ ३०८ ॥

नृत्यनिर्णये:—

सावेरीमेलरक्ता स्वरसकलयुता सत्रिका स्वैरिणी या ।
चित्रं वस्त्रं दधाना कठिणकुचतटे कंचुकीं मेचकीं च ॥
गौरांगी पंकजाक्षी हिमकरवदना दाडिमीबीजदंता ।
सायं शृंगारपूर्णा मदनसहचरी भाति सौराष्ट्रिका सा ॥ ३०९ ॥

हृदयप्रकाशे:—

रिषभादिस्तु सौराष्ट्री कंपांदोलितशोभिता ॥

पारिजाते:—

श्रीरागमेलसंभूता सौराष्ट्री रिस्वरग्रहा ।
पंचमाहुंफितोपेता रिपर्यंतं पुनस्तथा ॥ ३१० ॥
सहुंफिता मपर्यंतमग्रस्वस्थानषड्जका ॥

---

### अथ प्रथमसैंधवी ।

रत्नाकरे:—

चतुर्धा सैंधवी तत्र टक्कभाषा रिपोज्झिता ॥
सन्यासांशग्रहा सांद्रा गमकैर्लंवितस्वरैः ॥
सगतारा षड्जमन्द्रा गेया सर्वरसेष्वसौ ॥ ३११ ॥

---

### अथ द्वितीयसैंधवी ।

सैंधवी पंचमेऽप्यस्ति ग्रहांशन्यासपंचमा ।
रिपापन्याससंयुक्ता रम्या सगमकैः स्वरैः ॥ ३१२ ॥
नीतरं रिबहुस्तारपा पूर्वविनियोगिनी ॥

---

### अथ तृतीयसैन्धवी ।

मालवे कैशिकेऽप्यस्ति सैंधवी मृदुपंचमा ।
समन्द्रा निगमैर्युक्ता षड्जन्यासग्रहांशिका ॥ ३१३ ॥
प्रयोज्या सर्वभावेषु श्रीसोढलसुतोदिता ॥

---



### अथ चतुर्थसैंधवी ।

सैंधवी भिन्नषड्जेऽपि न्यासांशग्रहधैवता ।
उद्दीपने नियोक्तव्या धमन्द्रा रिपवर्जिता ॥ ३१४ ॥

पारिजाते:—

शुद्धमेलोद्भवा पूर्णा धैवतादिकमूर्छना ।
आरोहे गनिवर्ज्या स्यात्सैंधवी रागिणी मता ॥ ३१५ ॥

हृदयप्रकाशे:—

शुद्धसप्तस्वरे मेले सैंधवी धैवतादिका ।
आरोहे गनिवर्ज्या या स्फुरितेन युता मुहुः ॥ ३१६ ॥

मंजर्याम्:—

सत्रिका त्वरिपा नित्यं सैंधवी गमकैर्युता ॥

चन्द्रोदये:—

सांशग्रहान्ता त्वरिपा सदैव ।
स्यात्सैंधवी सद्गमकैर्लसन्ती ॥

नृत्यनिर्णये:—

भैरव्या मेलजाता स्वरसकलरता सत्रिका चंद्रवक्त्रा ।
तन्वंगी पद्मनेत्रा विलसितजघना मत्तमातंगयाना ।
मंदं मंदं वदंती बहुविधगमकैः सैंधवी रक्तवस्त्रा ।
युद्धे योधेश्वराणां विमलतरयशः प्रार्थयंती सदा सा ॥३१७॥

---

### अथ त्रवणा ।

रत्नाकरे:—

त्रवणा टक्कभाषा सग्रहांतांशा रिपोज्झिता ।
समंद्रा गमतारा सनिधभूरिर्दिनांतिमे ॥ ३१८ ॥
यामे गेया वीररसे गीयते रुद्रदेवता ।
त्रवणाभिन्नषड्जस्य भाषा धनिस भूयसी ।
धनिसैर्वलिता धांशग्रहन्यासा रिपोज्झिता ॥ ३१९ ॥
गमाद्विगुणिता मन्द्रधैवता विजये मता ॥

पारिजाते:—

गौरीमेलसमुत्पन्ना त्रिवणा मस्वरोज्झिता ।

अवरोहणवेलायां षड्जोद्ग्राहांशरिस्वरा ॥ ३२० ॥

ध्यानम् ।

केली कल्पतरोर्मूले निषण्णापीतवर्णभाक् ।

तन्वंगी हास्यसंयुक्ता प्रियेण त्रिवणा मता ॥ ३२१ ॥

---

## अथ त्रवणोद्भवा ।

रत्नाकरे—

सांता मांशा बहुरिधा गापन्यासा पवर्जिता ।

टक्कभाषा सदा गेया स्पर्धायां त्रवणोद्भवा ॥ ३२२ ॥

---

## अथ गांधारी ।

रत्नाकरे:—

पंचांशा रिधवर्जाः स्युर्गांधार्यां संगतिः पुनः ।

न्यासांशाभ्यां तदन्येषां धैवतादृषभं व्रजेत् ॥ ३२३ ॥

रिलोपनिधलोपाभ्यां षाडवौडुविते क्रमात् ।

पंचमः षाडवत्वेपी निसमध्यमपंचमाः ।

अंशा द्विपंन्त्यौडुवितं कलाः षोडश कीर्तिताः ॥ ३२४ ॥

मूर्छना धैवतादिः स्यात्तालश्चंचत्पुटो मतः ।

विनियोगो ध्रुवागाने तृतीयप्रेक्षणे भवेत् ॥ ३२५ ॥

---

## अथ रक्तगांधारी ।

अंशाः स्यू रक्तगांधार्यां पंच धर्षभवर्जिताः ।

रिमतिक्रम्य मगयोः कार्ये संनिधिमेलने ॥ ३२६ ॥

रिलोपरिधलोपाभ्यां षाडवौडुवमिष्यते ।

बहुत्वं रिधयोरंशः पंचमो द्वेष्टि षाडवम् ॥ ३२७ ॥



द्विपन्त्यौडुवितं षड्जनिमपाः संगतौ सगौ ।

पंचपाण्यादि षाड्जीवदृषभादिस्तु मूर्छना ॥ ३२८ ॥

तृतीयप्रेक्षणगतध्रुवायां विनियोजनम् ।

---

## अथ गांधारपंचमः ।

रत्नाकरे:—

गांधारीरक्तगांधारीजन्यो गांधारपंचमः ।

गांधारांशग्रहन्यासो हारिणाश्वाख्यमूर्छनः ॥ ३२९ ॥

प्रसन्नमध्यालंकारः संचारिणि सकाकली ।

राहुप्रियोऽद्भुते हास्ये विस्मये करुणे भवेत् ॥ ३३० ॥

---

ध्यानम् ।

स्वर्णवर्णः स्वर्णकर्णः प्रियया सह संहसन् ।

देवपादपशुष्कायां श्रितो गांधारपंचमः ॥ ३३१ ॥

---

## अथ देशाख्या ।

तज्ज्ञास्फुरितगांधारा देशाख्या वर्जितर्षभा ।

ग्रहांशन्यासगांधारा निमंद्रा च समस्वरा ॥ ३३२ ॥

---

ध्यानम् ।

आस्फोटनाविकृतरोमहर्षे निरुद्धसंरंभविशालबाहुः ।

प्रांशुः प्रचंडद्युतिरिंदुगौरो देशाख्यरागः स हि मल्लमूर्तिः ।३३३।

---

## अथ गांधारी ।

गांधारपंचमे भाषा गांधारी समभूषिता ।

धाधन्ता सर्वलोकस्य हृद्या स्त्रीणां विशेषतः ॥ ३३४ ॥

---

## अथ देशाक्षी ।

मंजर्याम्:—

रिगौ तृतीयगतिकौ निश्च देशाक्षिमेलके ।
गत्री रिहीना देशाक्षी प्रातर्गेया विचक्षणैः ॥ ३३५ ॥

चंद्रोदये:—

लघ्वादिकौ षड्जकमध्यमौ चेत् ।
गांधारकस्त्रिश्रुतिकस्तथा स्यात् ॥
शुद्धा भवेयुः समपा निषादो ।
देशाक्षिकाया गदितः स मेलः ॥ ३३६ ॥
गांशग्रहां तामनिमध्यमां वा ।
देशाक्षिकां प्रातरवेहि पूर्णाम् ॥ ३३७ ॥

नृत्यनिर्णये:—

गांधाराद्यंतमध्या गुणगतिरिनिगा धैवतोद्विर्गतिर्या ।
तांबूलास्यांजनाक्षी कनकमणिमयैर्भूषणैर्भूषितांगी ॥
नारायण्यंगलग्ना कुसुमसुकबरी कंचुकी चित्रवस्त्रा ।
देशाक्षी राजकन्या प्रतिदिनमुपसि प्रेक्षती मल्लयुद्धम् ॥३३८॥

हृदयप्रकाशे:—

धहीनः षाडवो गादिर्देशाख्यः परिकीर्तितः ॥

पारिजाते:—

रितीव्रतरसंयुक्तो गतीव्रेणापि संयुतः ।
गधवर्जोऽवरोहे स्यात् गांधारस्वरमूर्छनः ॥ ३३९ ॥
तीव्रो यत्र निषादः स्याद्देशाख्यः स विराजते ॥

---

## अथ मध्यमाजातिं लक्षयति ।

रत्नाकरे:—

पंचांशा मध्यमायां स्युरगांधारनिषादकाः ।
षड्जमध्यमबाहुल्यं गांधारोल्पोऽत्रषाडवम् ॥ ३४० ॥



गलोपान्त्यगलोपेन चौडुवं स्यात्कलाष्टकः ।
ऋषभादिमूर्छना स्याच्चालश्चंचत्पुटो मतः ॥ ३४१ ॥
विनियोगो ध्रुवागाने द्वितीयप्रेक्षणे भवेत् ॥

---

## अथ टक्ककैशिकः ।

रत्नाकरे:—

धैवत्या मध्यमायाश्च संभूतष्टक्ककैशिकः ।
धैवतांशग्रहन्यासः काकल्यंतरराजितः ॥ ३४२ ॥
सारोही सप्रसन्नादिरुत्तरायतयान्वितः ।
उद्धते नटने कामग्रस्ते कंचुकिकर्तृके ॥ ३४३ ॥
प्रवेशे तुर्ययामेऽह्नो बीभत्से च भयानके ।
प्रयोक्तव्यो महाकालमन्मथप्रीतये बुधैः ॥ ३४४ ॥

---

## अथ ध्यानम् ।

श्यामो युवा कुंकुमलिप्तदेहः ।
संकेतमाल्याय कृतप्रतीक्षः ॥
प्रियाजनस्य स्मरपीडितस्य ।
टक्कोऽयमुक्तः किल कैशिकाख्यः ॥ ३४५ ॥

---

## अथ छायानाटः ।

मंजर्याम्:—

छायानाटस्त्रिसः सायं काकल्यंतरराजितः ॥

चंद्रोदये:—

षड्जग्रहः सांतयुतश्च सांशो-
ऽन्तराश्रितः काकलिदीप्यमानः ॥
छायादिमः सागमसौ त्रिगेयो ।
नट्टाह्वयो गानविचक्षणेन ॥ ३४६ ॥

नृत्यनिर्णये:—

कर्णाटस्य प्रमेले प्रकटितसुतनुस्त्वादिमध्यांतषड्जः ।
कंठे हारः सरत्नः सितवसनरुचिः पाटलोष्णीषधारी ॥
गौरांगो रक्तनेत्रः सहचरबहुभिर्वीरशृंगारवान्यः ॥
छायानाटो दिनांते प्रहसति पथिकान् पुष्पसत्कंदुहस्तः॥३४७॥

पारिजाते:—

छायानाटस्तु विज्ञेयः शंकराभरणस्वरैः ।
आरोहणे निवर्ज्यः स्यादवरोहे गवर्जितः ॥ ३४८ ॥
धैवतोद्ग्राहसंयुक्तो रिन्यासोऽनेकमध्यमः ॥

हृदयप्रकाशे:—

गांधारादिश्च संपूर्णः छायानाट उदाहृतः ॥

---

## अथ अडानः ।

इयं मदुक्तिः—

मेघरागेण संयुक्तः कर्णाटो यदि गीयते ।
तदाडानाख्यरागोऽयं भेदः कर्णाटसंभवः ॥ ३४९ ॥
संकीर्णरागाध्यायकारेण लिखितं तद्विचार्यताम् ।
उक्तो मल्हारसंयुक्तस्तत्र निः काकली भवेत् ।
कर्णाटस्य तदाभावो भावभट्टेन कीर्तितः ॥ ३५० ॥
कर्णाटगो निषादस्तु शुद्धोऽसौ परिकीर्तितः ।
केनचिदेकगतिस्तु तदा कैशिकिसंज्ञकः ॥ ३५१ ॥
तदा तु मेघ एवस्यान्न तु मल्लारनामता ।
गौरीमेले समुत्पन्नो रागतत्वेन भाषितः ॥ ३५२ ॥
तृतीयगतिको निस्तु मंजर्यां परिभाषितः ।
अनूपसिंहभूपाग्रे सन्तैः सम्यग्विचार्यताम् ॥ ३५३ ॥
नृत्यस्य निर्णयेऽप्युक्तस्तीव्र एव न काकली ।
कर्णाटगौडमेलेऽसौ सोमनाथेन कीर्तितः ॥ ३५४ ॥
पूर्णोडुवाणः षाधो षांशः संन्यास उल्लसेद्वादौ ॥

---



## अथ कुडाई ।

लोकप्रसिद्धसुघराइ इति इयं प्रातः ॥

---

## अथ सौवीरः ।

रत्नाकरे:—

षड्जमध्यमया सृष्टः सौवीरः काकलीयुतः ।
गाल्पः षड्जग्रहन्यासांशकः षड्जादिमूर्छनः ॥ ३५५ ॥
प्रसन्नाद्यवरोहिभ्यां संयतानां तपस्विनाम् ।
गृहिणां च प्रवेशादौ रसे शान्ते शिवप्रियः ॥ ३५६ ॥
प्रयोज्यः पश्चिमे यामे वीरे रौद्रेऽद्भुते रसे ॥

---

## ध्यानम् ।

निर्मलकमलदलांतः शांतोदात्तः तपस्वितापन्नः ।
क्षीणः क्षीणतरैर्नाम्ना धीरः सौवीररागोऽयम् ॥ ३५७ ॥

---

## अथ सौवीरभाषाः ।

## अथ सौवीरी ।

सौवीरी तद्भवा मूलभाषा बहुलमध्यमा ।
षड्जाद्यंताऽत्र संवादः सधयो रिधयोरपि ॥ ३५८ ॥

---

## ध्यानम् ।

भोगोन्मना: पुनः प्रायो भुक्ता राजीवलोचना ।
शांता पद्मश्रुतिः सेयं सौवीरी परिकीर्तिता ॥ ३५९ ॥

---

## अथ वेगमध्यमा ।

सौवीरजा सग्रहांता संपूर्णा सपसंगता ।
मध्यधांशा स्मृता वेगमध्यमा मध्यमोज्ज्वला ॥ ३६० ॥

---

अथ शुद्धवराटिका ।

तज्जा वराटिका सैव षड्जकी धनिषाधिका ।
सन्यासांशग्रहा तारसधा शांते नियुज्यते ॥ ३६१ ॥

---

ध्यानम् ।

नीलोत्पलाक्षी सुमुखी सुकेशी ।
बाला कृशांगी तनुरोमराजिः ॥
विलोकयंती दयितं सतृष्णम् ।
मुग्धानना शुद्धवराटिकेयम् ॥ ३६२ ॥

---

अथ साधारिता ।

रत्नाकरेः—

सौवीरा साधारिता स्यान्मन्यासा सग्रहांशिका ।
रिमयोः समयोर्युक्तगमका सकलस्वरा ॥ ३६३ ॥

अथ सौवीरजा गांधारी ।

गांधारी करुणे सांता संपूर्णा निग्रहांशिका ॥

---

अथ भिन्नपंचमः ।

रत्नाकरेः—

मध्यमापंचमीजात्योः संजातो भिन्नपंचमः ।
धग्रहांशः पंचमांतः पौरवीमूर्छनान्वितः ॥ ३६४ ॥
काकल्या कलितः क्वापि निषादेनाप्यलंकृतः ।
प्रसन्नाद्येन संचारिवर्णः शौरिप्रियो रसे ॥ ३६५ ॥
भयानके सबीभत्से सूत्रधारप्रवेशने ।
ग्रीष्मे प्राक्प्रहरे गेयः ॥

---

ध्यानम् ।

पीतः पिंगलमूर्धजः कनकहारांकारणे निद्रिताय् ।
स्कंधांतः परमोन्नतः परमतः बक्षाकपालावली ॥



वंदे विभ्रदद्भ्रभीतिजननीमुद्बोधदासं मुहुः ।
कुर्वन्नेष निरूपितो बुधजनैर्भिन्नादिमः पंचमः ॥ ३६६ ॥

---

अथ भिन्नपंचमभाषाः ।

अथ धैवतभूषिता ।

रत्नाकरेः—

पूर्णा धांशग्रहन्यासा सधयो रिमयोर्युता ।
भिन्नपंचमसंभूता भाषा धैवतभूषिता ॥ ३६७ ॥

---

अथ शुद्धभिन्ना ।

भिन्नपंचमजा शुद्धभिन्ना धांशा ग्रहांतिमा ।
रिधयोः समयोर्युक्ता पूर्णा किन्नरवल्लभा ॥ ३६८ ॥

---

अथ वराटी ।

भिन्नपंचमभाषा स्याद्वराटी धमभूयसी ।
धांता रिदुर्बला मांशा सधयोर्निगयोर्युता ॥ ३६९ ॥

---

अथ विशाला ।

सधसंचारिणी पूर्णा पांशा धांता धभूषिता ।
भिन्नपंचमभाषा तु विशाला किन्नरप्रिया ॥ ३७० ॥

---

अथ भिन्नपंचमविभाषा ।

अथ कौशाली ।

निषादांशग्रहा भिन्नपंचमस्य विभाषिका ।
कौशाली धैवतन्यासा ऋषभेण विवर्जिता ॥ ३७१ ॥

---

## अथ वराटी ।

रत्ना.प.रे:—

वराटी स्यात्तदुद्भवा ।
धांशा षड्जग्रहन्यासा समन्द्रा तारधैवता ।
समेतरस्वरा गेया शृंगारे शार्ङ्गिणोदिता ॥ ३७२ ॥

मंजर्याम्:—

निमौ तृतीयगतिकौ वराटीमेल एव सः ।
शुद्धवराटिका सत्रिः सदा पूर्णा मनोहरा ॥ ३७३ ॥

चंद्रोदये:—

शुद्धौ सरी शुद्धगपंचमौ चेत्तथोज्ज्वलो धैवतनामधेयः ।
लघ्वादिकौ षड्जकपंचमौ च मेलस्तदा शुद्धवराटिकायाः ॥३७४॥
सांशग्रहा सांतवती च शुद्धावराटिकेष्येत सदैव पूर्णा ।
षड्जग्रहा न्यासवती च सांशा सप्तस्वरा काकलिनोपयाता ।
दिवा निशी राजति गीयमाना तद्वेदिभिः श्यामवराटिकाऽसौ ।३७५।

नृत्यनिर्णये:—

स्वागारे स्वेच्छया या मृदुतरवचनैः क्रीडिता चालिपुंजैः ।
चित्रं वस्त्रं दधाना कुसुमसुकवरी चामरैर्वीज्यमाना ॥
नानाशृंगारयुक्ता मदनसहचरी कोमलांगी सुगौरी ।
सायं पूर्णा त्रिषड्जात्वनलगतिनिमा राजते सा वराटी ॥३७६॥

---

## अथ कौंतलीवराटी ।

रत्नाकरे:—

स्युर्वराट्या उपांगानि सन्यासांशग्रहाणि षट् ।
समंद्रा कौंतली तत्र निभूरिः कंप्रधारिता ॥ ३७७ ॥

---

## अथ द्राविडीवराटी ।

वराटी द्राविडी भूरिनिमंद्रा स्फुरितपमा ॥



## अथ सैंधवीवराटी ।

वराटी सैंधवी भूरिगांधारा सपकंपिता ।
शार्ङ्गदेवेन गदिता शृंगारे मंद्रमध्यमा ॥ ३७८ ॥

---

## अथ अपस्थानवराटी ।

धंडिता मनिधैर्मंद्रैरपस्थानवराटिका ॥

---

## अथ हतस्वरावराटी ।

हतस्वरा धमंद्रा स्यात्कंपिता हतपंचमा ॥

---

## अथ प्रतापवराटी ।

स्यात्प्रतापवराटी धमंद्रा कंपपसोरुपा ॥

---

## अथ शुद्धवराटी ।

पारिजाते:—

अथ शुद्धवराट्यां तु रिगौ कोमलपूर्वकौ ।
मस्तु तीव्रतरो धः स्यात्कोमलस्तीव्रनिस्वरः ॥ ३७९ ॥
धैवतोग्राहयुक्तायां निभौ न्यासांशकौ मतौ ।

---

## अथ तोडीवराटी।

रिधौ च कोमलौ प्रोक्तौ यत्र तीव्रतरश्च मः ।
उद्ग्राहकौ धगौ स्यातां वराटीतोडिका च सा ॥ ३८० ॥

---

## अथ पुन्नागवराटी ।

पुन्नागाख्यवराट्यां तु निषादस्तीव्रसंज्ञकः ।
मस्तु तीव्रतरः प्रोक्तो गधावुद्ग्राहकौ स्मृतौ ॥ ३८२ ॥

---

अथ नागवराटी ।

अथ नागवराट्यां तु मस्तु तीव्रतरो भवेत् ।
कोमलो धैवतः प्रोक्तो गधावुद्ग्राहकौ मतौ ॥ ३८१ ॥

---

अथ प्रतापवराटी ।

मतीव्रतरसंयुक्ता प्रतापोपपदान्विता ।
वराटी च निना युक्ता तीव्रसंज्ञेन गादिका ॥ ३८३ ॥

---

अथ कल्याणवराटी ।

कल्याणोपपदा या सा वराटी गादिमूर्छना ।
कल्याणमेलसंभूता मपांशन्यासका स्मृता ॥ ३८४ ॥

---

अथ ककुभः ।

रत्नाकरे:—
मध्यमापंचमीधैवत्युद्भवः ककुभो भवेत् ।
धांशग्रहः पंचमांतो धैवतादिकमूर्छनः ॥ ३८५ ॥
मसत्रमध्यारोहिभ्यां करुणे यमदैवतः ॥
गेयः शरदि ।

---

ध्यानम् ।

मानिनि मामवमानितमेकांते कांतमीदृशम् ।
दीनं संभावयेत्यकथयत्पीतांगः ककुभरागोऽयम् ॥ ३८६ ॥

संकीर्णरागाध्याये—
देवश्री मालवः पूर्वो केदारश्च विलावलः ।
अन्योन्ययोगतस्तेषां कुकुभो जनिरुच्यते ॥ ३८७ ॥
पूर्वो शंकरभूपाख्यः केदारश्चविलावलः ।
एतेभ्यः कुकुभो रागो जातः शांतिकरो रणम् ॥ ३८८ ॥



पारिजाते:—
पंचमोद्ग्राहसंपन्ने धहीने कुकुभे पुनः ।
तीव्रगांधाररराहित्यमारोहे चावदन्बुधाः ॥ ३८९ ॥

---

अथ रगंती ।

रत्नाकरे:—
तज्जाता भवेद्भाषा रगंतिका ॥
धन्यासांशग्रहा भूरिधैवतैः स्फुरितैर्युता ।
आतारमध्यमा पापन्यासा श्रीशार्ङ्गिणोदिता ॥ ३९० ॥

---

ध्यानम् ।

भर्तुर्वियोगानलदह्यमाना ।
मानांशमभ्येति सखीजनेन ॥
आश्वास्यमाना विमना मनोज्ञा ।
पीता रगंती किल सानुरागा ॥ ३९१ ॥

---

अथ कांभोजी ।

कांभोजी ककुभस्य स्याद्भाषा धांशग्रहांतिमा ।
सधसंवादिनी पूर्णा रिगसंवादिनी तथा ॥ ३९२ ॥

---

अथ मध्यमग्रामी ।

कुकुभे मध्यमग्रामी भाषा भांशग्रहांशिका ।
मध्यमग्रामिकी पूर्णा संकीर्णा रिधसंगता ॥ ३९३ ॥

---

अथ मधुरी ।

मधुरी ककुभोद्भूता सांशा धांताखिलस्वरा ।
मपयोर्निधयोर्युक्ता संकीर्णा याष्टिकोदिता ॥ ३९४ ॥

---

### अथ शकमिश्रा ।

निपयो रिधयोर्थस्यां संवादो निग्रहांशता ।
पन्यासककुभे भाषा शकमिश्रा तु सा मता ॥ ३९५ ॥

---

### अथ भोगवर्धिनी ।

विभाषा ककुभे भोगवर्धिनी तारमंद्रगा ।
धैवतांशग्रहन्यासा गापन्यासा रिवर्जिता ॥ ३९६ ॥
धनिभ्यां गमकैर्भूरिवैराग्ये विनियुज्यते ।

---

### ध्यानम् ।

संभुज्य भोगान् विविधान् विरागा ।
पीता तपस्यां हृदये दधाना ॥
कामं करे दक्षिणकेऽक्षिमाला ।
भोगादिमावर्धनिका प्रदिष्टा ॥ ३९७ ॥

---

### अथ आभीरी ।

आभीरिका माद्यंतांशा पतारा मंद्रधैवता ।
द्रुतप्रयोगा निरिसैर्विभाषा ककुभोद्भवा ॥ ३९८ ॥
निर्वेदे विनियोक्तव्या पूर्णा प्रचुरमध्यमा ॥

---

### अथ मधुकरी ।

ककुभोत्था मधुकरी विभाषा सग्रहांतिमा ।
गापन्यासा निसरिधपंचमैर्बहुभिर्युता ॥ ३९९ ॥

---

### अथ शालवाहिनी ।

रिग्रहांशा धैवतांता संपूर्णा रिमसंगता ।
ककुभांतरभाषेयं विज्ञेया शालवाहिनी ॥ ४०० ॥

---



### अथ आसावरी ।

रत्नाकरेः—

तद्भवाऽऽसावरी धांता गतारा मंद्रमध्यमा ।
मग्रहांशा स्वल्पषड्जा करुणे पंचमोज्झिता ॥ ४०१ ॥

मंजर्यामः—

मत्रिकासावरी पूर्णा सदा गेयातिकारुणा ।

चंद्रोदयेः—

मांशग्रहा मांतवती च पूर्णा ।
ह्यासावरी शब्दसौ नियुक्ता ॥

नृत्यनिर्णयेः—

गांधारोत्राशिगः स्यात्प्रथमगतिमनिर्मादिमध्यांतपूर्णा ।
तन्वंगी श्यामवर्णा करधृतमुकुरा सर्वशृंगारयुक्ता ॥
रंभायाः काननेषु प्रियविमलयशोऽध्यापयंती सुकेशं ।
गंधर्वैः स्तूयमाना प्रियरसकरुणा शब्दद्रासावरी सा ॥ ४०२ ॥

हृदयप्रकाशेः—

गांधारश्च निषादश्च यत्र तीव्रतरौ कृतौ ।
निशून्यारोहणा मादिः संपूर्णासावरी मता ॥ ४०३ ॥

पारिजातेः—

गौरीमेलसमुत्पन्ना रोहणे गनिवर्जिता ।
मध्यमोद्ग्राहधांशाद्यासावरी न्यासपंचमा ॥ ४०४ ॥

---

### ध्यानम् ।

श्रीखंडशैलशिखरे शिखिपिच्छवस्त्रा ।
मातंगमौक्तिककृतोत्तमहारवल्ली ॥
आकृष्य चंदनतरोरुरगं वहन्ती ।
आसावरी वलयमुज्वलनीलकांतिः ॥ ४०५ ॥

---

अथ वेलावली ।

रत्नाकरेः--

तज्जा वेलावली तारधा गमंद्रा समस्वरा ।
धाद्यंतांशा कंम्रपड्जा विप्रलंभे हरिप्रिया ॥ ४०६ ॥

मंजर्याम्ः--

धत्रिका रिपहीना वा प्रातर्वेलावलीष्टदा ।

चंद्रोदयेः--

धांशग्रहांता रिपवर्जिता वा ।
वेलावली प्रातरसावभीष्टा ॥

नृत्यनिर्णयेः--

धित्तां धित्तां धितांतामिति मृदुमुरजं वाद्यमाना सुतन्वी ।
शृंगाराढ्या सुगौरी कमलवसनकिर्मीरकूर्पासयुक्ता ॥
प्रौढा वेलावली योषसि निजमधुमाधव्यशेषस्वरास्था ।
धाद्यंतांशारिधा वा सरपरदसुता सत्कुराईसहाया ॥ ४०७ ॥

पारिजातेः--

वेलावल्यां गनी तीव्रौ मूर्छना चाभिरुद्गता ।
आरोहे मनिवर्जायामंशः षड्जो बुधैः स्मृतः ॥ ४०८ ॥
अवरोहे गवर्जायां क्वचिद्गांधारमूर्छना ।

---

ध्यानम् ।

संकेतदीक्षां दयिताय दत्वा ।
वितन्वती भूषणमंगयष्टौ ॥
मुहुःस्मरंती स्मरमिष्टदेवम् ।
वेलावली नीलसरोजकांतिः ॥ ४०९ ॥

---

अथ वेलावल्युपांगानि ।
अथ भुंछिकवेलावली ।

रत्नाकरेः--

मत्यक्तांऽऽदोलितसपा धन्यासांशग्रहान्विता ।
विप्रलंभे भवेद्भुंछीत्यवोचत्सोढलात्मजः ॥ ४१० ॥

---



अथ खंभावतिवेलावली ।

मध्यमेन निषादेनांऽऽदोलिता त्यक्तपंचमा ।
खंभाइति स्तदंशांता शृंगारे विनियुज्यते ॥ ४११ ॥

---

अथ छायावेलावली ।

छायावेलावली वेलावलीवत्कंप्रमंद्रमा ।

---

अथ प्रतापवेलावली ।

सैव प्रतापपूर्वा स्यादाहता रिपवर्जिता ।

---

अथ अलहियाबिलावलः ।

हृदयप्रकाशेः--

ऋपर्भांशस्तु संपूर्णोऽलहियाह्वस्तु धादिकः ॥

---

अथ सावेरी ।

मंजर्याम्ः--

सपवर्ज्या च सावेरी धत्रिका प्रातरिष्टदा ।

चंद्रोदयेः--

धांशग्रहांता सपवर्जनीया ।
सावेरिका प्रातरियं नियोज्या ।

नृत्यनिर्णयेः--

धाद्यंतांशा सपा या नयनगुणगतिश्चात्र धांत्यौ रिगौ स्तः ।
कस्तूरीबिंदुभाला मृगशिशुनयना चंद्रवक्त्रा सुतन्वी ।
सावेरी हारकंठा सुशवरवसना पीतकूर्पासयुक्ता ।
दुग्धाढ्या श्यामवर्णा वरगजगमना सस्मिता सायमेति ॥ ४१२ ॥

पारिजातेः--

सावेरी तीव्रगांधारा धैवतोद्ग्राहसंभवा ।
मध्यमांशानिहीना च रोहणे गनिवर्जिता ॥ ४१३ ॥

---

## अथ नारायणि ।

मंजर्याम्ः—

नारायणी गत्रिका च संपूर्णा उषसि प्रिया ॥

पारिजातेः—

नारायण्यां मनी तीव्रौ गांधारादिकमूर्छना ।
आरोहे मनिवर्ज्या स्यान्न्यासांशधैवता स्मृता ॥ ४१४ ॥

---

## अथ कांभोजी ।

मंजर्याम्ः—

कांवोजी मनिहीना वा सत्रिः सांतरकाकली ।

चंद्रोदयेः—

सांशग्रहा सांतवती मनिभ्याम् ।
समुज्झिता चांतरकाकलीष्टा ॥
कांवोजिका सा तु विगीयमाना ।
विभातकाले नितरां विभाति ॥ ४१५ ॥

नृत्यनिर्णयेः—

कांवोजी मोहिनी या द्विगतिगनिरिधा सत्रिकाढ्याऽनिमा वा ।
गौरी तांबूलवक्त्रा कुसुमजवसनं कंचुकीं चादधाना ॥
कस्तूरीबिंदुभाला कनकमणिमयैर्भूषणैर्भूपितांगी ।
कर्णाढ्यांश्रीसखिभ्यामुषसि विलसती किन्नरीवाद्यहस्ता ॥४१६॥

---

## अथ केदारः ।

मंजर्याम्ः—

रिधौ द्वितीयगतिकौ तृतीयगतिकौ निगौ ।
एष केदारमेलः स्यादतो जाताश्च रागकाः ॥ ४१७ ॥
नित्री रिपोनः केदारो निशीथे करुणाप्रियः ॥

चंद्रोदयेः—

लघ्वादिकौ षड्जकमध्यमौ च
शुद्धौ समौ पंचमको विशुद्धः ।



निगौ विशुद्धौ च यदा भवन्ति ।
तदा तु केदारकमेल उक्तः ॥ ४१८ ॥
न्यंशांतको निग्रहकोऽरिधो वा ।
केदारकः सायमभीष्ट एषः ॥

नृत्यनिर्णयेः—

सव्ये दंडं त्रिशूलं त्वपरकरतले शुभ्रवस्त्रं दधानो ।
भस्मांगो रक्तनेत्रो विमलसुजटिलो द्वीपिचर्मोपविष्टः ॥
नासाग्रे दत्तदृष्टिर्गिरिशजपमना वेष्टितः शिष्यवर्गैः ।
केदारो वारिधोऽस्ति त्रिविधनिसुहवीमेलजातो निशीथे॥४१९॥

हृदयप्रकाशेः—

गनीतीव्रतरे मेले केदारः श्यामनाटकः ।
भूपाली चेति केदारः संपूर्णो गादिमूर्छनः ॥ ४२० ॥

रागविबोधेः—

मल्लारिमेल उक्तास्तीव्रतररिमृदुमतीव्रतरधाश्च ।
मृदुसः शुद्धाः समपा अस्मादेते तु मल्लारिः ॥४२१॥
न्यंशन्यासग्रहकः पूर्णो निश्येव केदारः ।

पारिजातेः—

गनी तीव्रौ तु केदार्यां रिधौ नस्तोऽथ गादिमा ॥

---

## अथ भूपाली ।

मंजर्याम्ः—

सत्रिर्निमाभ्यां हीना च भूपाली प्रातरुत्तमा ।

चंद्रोदयेः—

गांश ग्रहांता निमवर्जिता या ।
भूपालिका प्रातरसौ विगेया ॥

नृत्यानिर्णयेः—

जाता मल्लारमेले निमरतिरहिता गादिमध्यांतरूपा ।
नासाग्रे स्वर्णपुष्पं कमलनयनयोः कज्जलं कंठमालाम् ।

मौक्तेयं भालमध्ये तरुवरतिलकं कंकणे हस्तमूले ।
रक्तं वस्त्रं दधाना त्वनवरतमदा याति भूपालिका सा ॥४२२॥

हृदयप्रकाशेः—

मनित्यागादौडुवेषु भूपाली गादिरिष्यते ।

पारिजातेः—

मनिवर्जा च भूपाली रिधौ यत्र च कोमलौ ।
गांधारोद्ग्राहसंयुक्ता रिन्यासा गांशशोभिता ॥ ४२३ ॥

रागविबोधेः--

सन्यासग्रहगांशा मनिहीनोपासि स्मृतेह भूपाली ॥

---

## अथ विहंगडः ।

नृत्यनिर्णयेः--

गौरः सुश्वेतवस्त्रः सुरभितसुतनुर्हस्ततांबूलधारी ।
कामी पुष्पधन्वा विरहिजनमनोवेधकः सत्रिकाढयः ॥
चंपाजातीसुयूथीविरचितमुकुटः कंठमध्ये सुमालः ।
सायं केदारमेले जनिरुपविलसन्नो विहादिर्गडः स्यात्॥४२४॥

पारिजातेः—

विहंगडे गनीतीव्रावारोहे रिविवर्जिते ।
गांधारोद्ग्राहसंपन्ने न्यासांशो निस्वरो मतः ॥ ४२५ ॥

रागविबोधेः—

न्यंशग्रहसंन्यासोल्पधो लसेन्निशि विहंगडः ॥

---

## अथ गौडसारंगः ।

हृदयप्रकाशेः—

मादिर्गपांशः संपूर्णो गौडसारंग इष्यते ।

---

## अथ सुहवी ।

मंजर्यामः—

धत्रिः पूर्णा च सुहवी प्रातःकाले सुखप्रदा ॥



नृत्यनिर्णयेः—

तन्वी श्यामा मृगाक्षी वरकमलमुखी पीतवस्त्रं दधाना ।
प्रोढा सन्मूर्छि वेणी द्विजवरगमना कंचुकीकर्बुरा च ॥
वक्त्रेपद्धास्ययुक्ता दशरसरचिता चामरैर्वीज्यमाना ।
सावेरीमेलयुक्ताप्युपसि सुसुहवी सत्रिका पूर्णरूपा ॥४२६॥

हृदयप्रकाशेः—

निहीना षाडवा गादिः सुहवी परिकीर्तिता ॥

---

## अथ शंकराभरणः ।

मंजर्यामः--

शंकराभरणः सत्रिः प्रातः संपूर्णमुद्रितः ॥

चंद्रोदयेः--

षड्जग्रहः सांतयुतोंऽशषड्जः ।
सप्तस्वरो मुद्रितभूषितश्च ॥
सूर्योदयेऽयं समुदीर्यमाणः ।
विराजते शंकरभूषणाख्यः ॥ ४२७ ॥

नृत्यनिर्णयेः--

गौरो रक्तांबरोसौ गुरुजलजवरश्रेणिकंठः सुरूपी ।
शृंगारी पत्रपंकैर्विरचितसुतनुर्भालभस्मैकपुंड्रः ॥
नृत्यारंभे प्रियोऽसौ मुद्रितगमकवान् शंकराभूषणाख्यः ।
प्रातः सायंतमध्यः प्रचरति मधुमाधव्यशेषस्वरस्थः ॥४२८॥

पारिजातेः--

शंकराभरणे प्रोक्तौ गनी तीव्रौ च सादिमे ।

रागविबोधेः—

पूर्णः सांशन्यासः सग्रह उपसीह शंकराभरणः ॥

---

## अथ नटनारायणः।

मंजर्याम्ः—

नटनारायणो रागः काकल्यंतरराजितः।
संपूर्णः सततं सत्रिर्वर्षाकालेऽतिवल्लभः ॥ ४२९ ॥

चंद्रोदयेः—

षड्जग्रहः सांतयुतोंऽशषड्जो।
युतस्तु पूर्णोऽन्तरकाकलिभ्याम् ॥
विराजमानः सततं नियुक्तो-
ऽसौ नट्टनायणनामधेयः ॥ ४३० ॥

नृत्यनिर्णयेः—

मुग्धस्त्रीसंगतो द्विर्गतिरिगधनयः पूर्णसाद्यंतमध्यो।
रुद्राणीवक्त्रजातः शिखिकुलनटिनी नर्तको भूषणाढ्यः॥
श्यामांगः पीतवस्त्रः करधृतचपलाकांतिखड्गो दयावान्।
प्रावृट्काले नृणांशं प्रकटयति सदा नट्टनारायणोऽसौ॥ ४३१ ॥

हृदयप्रकाशेः—

गांधारादिर्नटः पूर्णः पधसै कंपितैः कलः।

पारिजातेः—

वेलावलीसमुद्भूतो मांशो रिन्यासको नटः।
अवरोहे गहीनः स्यात् गांधारादिकमूर्छनः॥ ४३२ ॥

---

## अथ नारायणगौडः।

चंद्रोदयेः—

गांशग्रहो गांतयुतो रिशून्यः।
मांतस्तु नारायणगौडकः स्यात् ॥

---

## अथ हिंदोलः।

रत्नाकरेः—

धैवत्यार्षभिकावर्जस्वरनामकजातिजः।
हिंदोलको रिधत्यक्तः षड्जन्यासग्रहांशकः ॥ ४३३ ॥



आरोहिणि प्रसन्नाद्ये शुद्धमध्याख्यमूर्छनः।
काकलीकलितो गेयो वीरे रौद्रेऽद्भुते रसे ॥ ४३४ ॥
वसंते प्रहरे तुर्ये मकरध्वजवल्लभः ॥
संभोगे विनियोक्तव्यः।

---

## ध्यानम्।

नितंबिनी मंदतरंगितासु।
दोलासु खेला सुखमादधानः ॥
खर्वः कपोतद्युतिकामधुक्तः।
हिंदोलरागः कथितो मुनींद्रैः ॥ ४३५ ॥

---

## अथ वेसरी।

हिंदोलभाषा सांतांशा वेसरी रिधदुर्बला।
संगता सगयो रिन्योः प्रेक्षणे विनियुज्यते ॥ ४३६ ॥

---

## अथ चूतमंजरी।

सपसंचारिणी मांता पग्रहांशा रिवर्जिता।
हिंदोलभाषा निगयोर्यता स्याच्चूतमंजरी ॥ ४३७ ॥

---

## अथ षड्जमध्यमा।

षड्जाद्या मध्यमान्तांशा हिंदोले षड्जमध्यमा।
भाषेयं निरिहीना स्यात् समयोर्गपयोर्युता ॥ ४३८ ॥

---

## अथ मधुरी।

मांशा सांता बहुपधनिसा हिंदोलसंभवा।
मधुरी ऋषभाल्पा स्यात्प्रेक्षणे विनियुज्यते ॥ ४३९ ॥

---

## अथ भिन्नपौराली।

मध्यमांशग्रहा षड्जन्यासा सप्तस्वरान्विता।
हिंदोलभाषा स्याद्भिन्नपौराली प्रेक्षणे मता ॥ ४४० ॥

---

अथ मालववेसरी ।

गापन्यासा सग्रहांता मपयोर्गमकान्विता ।
रिधत्यक्ता च हिंदोलभाषा मालववेसरी ॥ ४४१ ॥

अथ पिंजरी ।

हिंदोले पिंजरीभाषा गांशा सांता निवर्जिता ॥

अथ नट्टा ।

तज्जा समस्वरा नट्टा तारगांधारपंचमा ।
सन्यासांशग्रहा मंद्रनिषादा तारधैवता ॥ ४४२ ॥

अथ छायानट्टा ।

छायानट्टा तु नट्टैव मंद्रपंचमभूषिता ।
नट्टोपांगं निषादेन गांधारेण च कंपिता ॥ ४४३ ॥

अथ छेवाटी ।

हिंदोलभाषा छेवाटी मापन्यासा धभूयसी ।
रिहीनांऽशग्रहन्यासषड्जा सगममंद्रभाक् ॥ ४४४ ॥
सगतारोत्सवे हास्ये गेया गमकसंयुता ॥

ध्यानम् ।

रागकुतूहले:—
पद्मभा पद्मपत्राक्षी संकेतस्थानमाश्रिता ।
कांतेन तन्वती हासं छेवाटी परिकीर्तिता ॥ ४४५ ॥

अथ बल्लातिका ।

बल्लाता तदुपांगं स्याद्रिहीना मंद्रधैवता ।
सन्यासांशग्रहा ज्ञेया शृंगारे शार्ङ्गिणोदिता ॥ ४४६ ॥



ध्यानम् ।

पीतं वसाना वसनं मनोहरम् ।
कांतस्य कंठे सुनिधाय वामम् ॥
बाहुं सपत्नी बहुमानमानिनी ।
बल्लातिका सा रतिखिन्नचित्तका ॥ ४४७ ॥

अथ दीपकः ।

पारिजाते:--
दीपको मालवोत्पन्नो मन्यारोहेऽत्र वर्जितौ ।
गांधारोद्ग्राहसंयुक्तो न्यासस्त्वंशो गधैर्वृतः ॥ ४४८ ॥

मंजर्याम्:—
संध्याकाले च गातव्यः धत्रिः संपूर्णदीपकः ॥

अथ गौडी ।

रत्नाकरे:--
हिंदोल भाषा गौडी स्यात् षड्जन्यासग्रहांशिका ।
पंचमोत्पन्नगमकबहुला धरिवर्जिता ॥ ४४९ ॥
षड्जमंद्रा प्रयोक्तव्या प्रियसंभाषणे बुधैः ॥

पारिजाते:--
रजनीमूर्छनायुक्ता रिकोमला धकोमला ।
गतीव्रा सा नितीव्रा च गौरी न्यंशस्वरामता ॥ ४५० ॥

मंजर्याम्:—
निगौ तृतीयगतिकौ गौडीमेलः प्रकीर्तितः ।
षड्जत्रिका धगत्यक्ता सायं गौडी विराजते ॥ ४५१ ॥

चंद्रोदये:—
सांशग्रहा सांतवती धगाभ्याम् ।
रिक्ता दिनांते विहिता तु गौडी ॥

हृदयप्रकाशेः—

रिधयोः कोमलत्वात्तु गन्योस्तीव्रतरत्वतः ॥
ऋषभांशा तु गौरी स्यात्पूर्णाऽऽरोहे गधोज्झिता ॥ ४५२ ॥

नृत्यनिर्णयेः—

रामक्रीमेलजाता धगपरिरहिता सत्रिका षोडशाब्दा ।
चित्रं वस्त्रं दधाना करधृतकमलाऽऽकर्णनेत्रा सुकेशी ।
चैत्रीमुल्तानिपूर्वीवरयवनपुरीकर्पटीमिश्रसार्धम् ।
संक्रीडंती दिनांते चतुररतिकला गौरदेशा तु गौडी ॥ ४५३॥

---

ध्यानम् ।

चंचूपुटे कोकिलशावकस्य ।
चूतांकुरान्यस्य निवेशयन्ती ॥
श्यामंमधुस्यंदितसूक्ष्मनादा ।
गौडीयमुक्ता किल कोहलेन ॥ ४५४ ॥

---

अथ शुद्धपंचमः ।

रत्नाकरेः—

मध्यमा पंचमीजातः काकल्यंतरसंयुतः ।
पंचमांशग्रहन्यासो मध्यसप्तकपंचमः ॥ ४५५ ॥
हृष्यकामूर्छनोपेतो गेयः कामारिदैवतः ।
चारुसंचारिवर्णश्च ग्रीष्मेऽह्नः प्रहरेऽग्रिमे ॥ ४५६ ॥
शृंगारहास्ययोः संधाववमर्शे प्रयुज्यते ॥

---

अथ शुद्धपंचमभाषाः ।

---

अथ दाक्षिणात्या ।

तद्भाषा दाक्षिणात्या स्याद्ग्रहांशन्यासधैवता ।
ऋषभोऽस्यामपन्यासस्तारा निमपधैवताः ॥ ४५७ ॥

---



अथ तानोद्भवा ।

मांशाऽल्पऋषभा मांता संकीर्णा मधसंगता ।
तानोद्भवा पंचमस्य भाषा प्रबलपंचमा ॥ ४५८ ॥

---

अथ आभीरी ।

पग्रहांशांऽतिमा पूर्णा न्यधिका सधयोर्युता ।
आभीरी पंचमोद्भूता रणे काकलिसंयुता ॥ ४५९ ॥

---

अथ गुर्जरी ।

शुद्धपंचमभाषा स्यात् गुर्जरी पग्रहांशिका ।
पांता समोच्चा संपूर्णा गपापन्यासभूषिता ॥ ४६० ॥

---

अथ आंध्री ।

रिग्रहा काकलीयुक्ता पंचमांता सदुर्बला ।
शुद्धपंचमभाषा स्यादांध्री किन्नरवल्लभा ॥ ४६१ ॥

---

अथ मांगली ।

पग्रहा पंचमे भाषा मांगली सधसंयुता ।
रिपसंवादिनी धांता संकीर्णा काकलीयुता ४६२ ॥

---

अथ भावनी ।

शुद्धपंचमभाषा स्याद्भावनी पग्रहांतिमा ।
रिहीना मंद्रसा मापन्यासा सा मनिभूयसी ॥ ४६३ ॥

---

अथ कैशिकी ।

शुद्धपंचमभाषा स्यात्कैशिकी मपभूयसी ।
पन्यासांशग्रहा मापन्यासा सगमतारभाक् ॥ ४६४ ॥
ईर्षायां विनियोक्तव्या भाषांगं केचिदूचिरे ।
समस्वरा रितारा ममंद्रा चोत्सवे भवेत् ॥ ४६५ ॥

---

अथ सौराष्ट्री ।

पंचमादेव सौराष्ट्री भाषा पांतग्रहांशिका ।
रिहीना सगधैस्तारा ममंद्रा समभूयसी ॥ ४६६ ॥
नियुक्ता सर्वभावेषु मुनिभिर्गमकान्विता ॥

अथ भंमाणी ।

पंचमस्य विभाषा स्यात् भम्माणी मंद्रषड्जभाक् ।
पांता सादिः समनिपैस्तारत्यक्तरिरुत्सवे ॥ ४६७ ॥

अथ प्रसभः ।

पारिजातेः—

षड्जादिमूर्छनोपेतः प्रसभः पंचमोज्झितः ॥

अथ कोल्लहासः ।

पारिजातेः—

मोज्झितः कोल्लहासः स्याद्गांधारादिकमूर्छनः ।
अवरोहे धवर्जः स्यात् पाडवः परिकीर्तितः ॥ ४६८ ॥

अथ रक्तहंसः ।

पारिजातेः—

गहीनो रक्तहंसः स्यादारोहे निस्वरोज्झितः ।
अवरोहे धवर्जः स्यात्षड्जपूर्वकमूर्छनः ॥ ४६९ ॥

अथ त्रावणी ।

याष्टिके त्रावणीभाषा पंचमी स्यात् ग्रहांशसा ।
सान्ता सरिगमैर्भूरिसंगता द्विश्रुतिर्मता ॥ ४७० ॥

अथ खंभावती ।

पारिजातेः—

खंभावती पहीना स्यात् कोमलीकृतधैवता ।
गांधारमूर्छनायुक्ता रिणा त्यक्तावरोहिका ॥ ४७१ ॥



अथ नीलांबरी ।

पारिजातेः—

नीलांबरी तु संपूर्णा षड्जपूर्वकमूर्छना ।
शुद्धमेलसमुत्पन्ना बहुकंपमनोहरा ॥ ४७२ ॥
अंशन्यासौ पमौ यत्र गरी सनी तथैव च ।
षड्जात्पंचम उद्ग्रानं पंचमात्सस्वरे पुनः ॥ ४७३ ॥

अथ वसंतः ।

वराटीललिताभ्यां च शुद्धरिषभरागतः ।
उत्पन्नोऽयं वसंतस्तु संकीर्णत्वेन लक्षितः ॥ ४७४ ॥

रत्नाकरेः—

वसंतस्तत्समुद्भवः ।
पूर्णस्तल्लक्षणो देशीहिंदोलोऽप्येष कथ्यते ।

मंजर्यामः—

सत्रिर्वसंतः संपूर्णः प्रातर्गेयोऽयनंददः ॥

नृत्यनिर्णयेः—

जातो हिंदोलमेले स्वरसकलयुतः सत्रिकश्च प्रभाते ।
त्वारामे क्रीडमानो नवदलकुसुमामोदलुब्धालिवृंदैः ॥
तांबूलास्योतिगौरो रतिपतिसदृशो रक्तवस्त्रश्च सार्धम् ।
योषिद्भिः सर्ववाद्यारवरभसमहत्[illegible]ास्ययुक्तो वसंतः ॥ ४७५ ॥

हृदयप्रकाशेः—

आरोहे पोज्झितो मान्यः पूर्णो धांशो वसंतकः ।

पारिजातेः—

षड्जादिमूर्छनो मांतो गनितीव्रो वसंतकः ॥

ध्यानम् ।

शिखंडिबर्हॊचयबद्धचूडः ।
कर्णावतंसीकृतशोभनाम्रः ॥

इन्दीवरश्यामतनुर्विलासी ।
वसंतकः स्यादलिमंजुलश्रीः ॥ ४७६ ॥

## अथ देशिकारः ।

मंजर्याम्:--

तृतीयगतिनिगमा देशिकारस्य मेलकः ।
देशिकारोपराह्णेस्यात्सत्रिः संपूर्णको भवेत् ॥ ४७७ ॥

नृत्यनिर्णयेः—

जातोऽघोराख्यवक्त्रात् त्रिगतिगनिगमाः सत्रिपूर्णोऽत्र रागे ।
रक्तांगः पद्मनेत्रः सितगजगमनो बाखरेजस्य मित्रम् ॥
कंठे मुक्तैकमालो धृतमुकुटशिराश्चित्रवासाः सखड्गो ।
मध्याह्ने योधसंघे सुललितशिशिरे देशिकारश्चकास्ति ॥ ४७८ ॥

हृदयप्रकाशेः—

गनिशून्यो मध्यमांशो देशकारस्तथौडुवः ।

पारिजातेः--

देशकारे गनीतीव्रौ धांशो धादिकमूर्छनः ।

रागविबोधेः—

सांशाद्यंतोऽह्नोन्तः कंममनिर्देशकृत्पूर्णः ॥

## अथ विभासः ।

मंजर्याम्:—

विभासः सत्रिकः पूर्णः पहीनः स्यात्प्रातरेव हि ।

चन्द्रोदयेः--

सांशग्रहांतः सकलस्वरश्च ।
प्रातः प्रयुज्येत विभासकोऽसौ ॥

नृत्यनिर्णयेः—

गौरांगः पंकजाक्षः सुशवल्वसनो भालकाश्मीरबिंदुः ।
मल्लीस्रग्भूष्यकंठश्चतुरवरगिरं कीरमध्यापयन्तः ॥



मेले तातस्य जातस्त्रिकमथममः सत्रिकोऽगः शठोऽसौ ।
स्वेच्छागामी प्रभाते वदति च दयितां श्रीविभासाख्यरागः॥४७९॥

हृदयप्रकाशेः—

औडुवो मनीहीनत्वाद्विभासो गादिरिष्यते ॥

पारिजातेः—

मस्तु तीव्रतरः प्रोक्तो गनी तीव्रौ रिधौ मतौ ।
कोमलौ न्यासधोपेते विभासे गादिमूर्छने ।
आरोहे मनिवर्जं स्यात् गपांशस्वरसंयुते ॥ ४८० ॥

रागविबोधेः—

विभास उषसि संपूर्णो धांशः सांतग्रहः पहीनो वा ।

## अथ जयश्रीः ।

नृत्यनिर्णयेः—

नासाग्रे श्रीलवंगं जलजकुटिलकेशी कुंडले श्रोत्रयोर्द्वे ।
चौलीं कौसुंभवस्त्रं शिशुविधुतिलकं चांजनं नेत्रयोश्च ।
हस्तद्वंद्वे सुकाचप्रवलयनिचयं मूर्ध्नि वेणीं दधाना ।
देशीमेले रुचिज्ञा च सकलजयतश्रीस्त्रिसा चापराह्णे ॥ ४८१ ॥

हृदयप्रकाशेः—

गादिर्जयश्रीः पांशा स्यादारोहे धरिवर्जिता ॥

संकीर्णरागाध्यायेः--

देशीकारवराव्यौ च धवलो धैवतो यदि ।
तुंवरो देवगोष्टीषु जयश्रीजननं जगौ ॥ ४८२ ॥
सन्यासग्रहगांशात्वरिधा प्रातस्तुजैताश्रीः ।

## अथ षाड्जी ।

षाड्ज्यामशाः स्वराः पंच निपादर्षभवर्जिताः ।
निलोपात् षाडवं सोऽत्र पूर्णत्वे काकली क्वचित् ॥ ४८३ ॥
सगयोः सधयोश्चात्र संगतिर्बहुलस्तु गः ।
गांधारेंऽशे न नैर्लोपो मूर्छना धैवतादिका ॥ ४८४ ॥

त्रिधा तालः पंचपाणिरत्र चैककलादिकः ॥
क्रमान्मार्गी चित्रवृत्तिदक्षिणा गीतयः पुनः ।
मागधी संभाविता च पृथुलेति च क्रमादिमाः ॥ ४८५ ॥
नैष्क्रामिकध्रुवायां च प्रथमप्रेक्षणे स्मृतः ।
विनियोगो द्वादशात्र कला अष्टलघुः कला ॥ ४८६ ॥
अस्यां षाड्ज्यां षड्जोन्यासः गांधारपंचमावपन्यासौ वराटी-
दृश्यते ॥

---

## अथ श्रीरागः ।

रत्नाकरेः—

षड्जे षाड्जीसमुद्भूतः श्रीरागं स्वल्पपंचमम् ।
सन्यासांशग्रहं मंद्रगांधारं तारमध्यमम् ॥ ४८७ ॥
समशेषस्वरं वीरे शास्ति श्रीकरणाग्रणीः ॥

मंजर्याम्ः—

धरिन्येकैकगतिका गस्तृतीयगतिर्यदा ।
श्रीरागमेल एषः स्यात् श्रीरागाद्या ह्यनेकशः ॥ ४८८ ॥
श्रीरागः सत्रिकः सायं धगोनः श्रीरसप्रदः ॥

चंद्रोदयेः—

चतुःश्रुती यत्र रिधौ भवेताम् ।
साधारणो गोऽपि च कैशिकी निः ॥
तथा विशुद्धाः समपा भवंति ।
श्रीरागकस्याभिहितः स मेलः ॥ ४८९ ॥
सांशग्रहांतो धगवर्जितो वा ॥
श्रीरागनामाऽस्तमिते रवौ स्यात् ॥

नृत्यनिर्णयेः—

शृंगारी सुंदरस्तत्पुरुषवदनजः कंठनक्षत्रमालः ।
श्रीरागः श्वेतवासाः प्रथमगतिगता धैवतोरिगिनी स्युः ॥



आरोहे ऽधैवतोऽगस्त्ववगमनयुतः सत्रिपूर्णोऽत्र गौरो ।
ग्रीष्मे सायं सुकृत्ये विलसति सरसं हस्तलग्नालिपद्मः ॥४९०॥

हृदयप्रकाशेः—

संपूर्णो रिषभादिः स्यादारोहे धगवर्जितः ।
रिपंचमांशः श्रीरागः सांतः कंपेन शोभितः ॥ ४९१ ॥

पारिजातेः—

रित्रयोद्ग्राहसंयुक्तः षड्जोद्ग्राहोऽथवा मतः ।
श्रीरागस्तीव्रगांधार आरोहे धगवर्जितः ॥ ४९२ ॥

---

## ध्यानम् ।

अष्टादशाब्दः स्मरचारुमूर्तिः ।
धीरोल्लसत्पल्लवकर्णपूरः ॥
षड्जादिसेव्योऽरुणवस्त्रधारी ।
श्रीराग एष क्षितिपालमूर्तिः ॥ ४९३ ॥

---

## अथ श्रीरागवादनप्रकारः ।

ग्रहं द्विगुणितं कृत्वाधस्तनं स्थायिनं तदा ।
कृत्वा द्वितीयतुर्यौ च द्वितीयं स्थायिनं स्पृशेत् ॥ ४९४ ॥
विलंबिते द्वितीयेऽथ स्थायीं विन्यस्यते यदा ।
श्रीरागस्य बुधैः प्रोक्तं तदा स्वस्थानमादिमम् ॥ ४९५ ॥
स्वरो वंशे द्वितीयोऽस्य ग्रहत्वेनोपलक्षितः ॥

---

## अथ मेघः ।

संकीर्णरागाध्यायेः—

यदि कल्याणकामोदौ सामंतः कोकिलप्रियः ।
जननं मेघरागस्य बभाणेतिमहेश्वरः ॥ ४९६ ॥

रत्नाकरेः—

षड्जे धैवतिकोद्भूतः षड्जतारसमस्वरः ।

मेघरागो मंद्रहीनो ग्रहांशन्यासधैवतः ॥ ४९७ ॥

---

## ध्यानम् ।

नीलोत्पलाभवपुरिंदुसमानवक्त्रः ।
पीतांबरस्तृपितचातकयाच्यमानः ॥
पीयूषमंदहसितो घनमध्यवर्ती ।
वर्षासु राजति युवा किल मेघरागः ॥ ४९८ ॥

---

## अथ शुद्धनाटः ।

मंजर्याम्ः—
तृतीयगतिकौ शुद्धनाटमेले रिधौ गनी ।
सत्रिकः शुद्धनाटोऽसौ सायं गंभीरनादवान् ॥ ४९९ ॥

चन्द्रोदयेः—
निगौ यदा त्रिश्रुतिकौ भवेताम् ।
लघ्वादिकौ षड्जकमध्यमौ च ॥
तथा विशुद्धाः समपा भवन्ति ।
विशुद्धनट्टाह्वयकस्य मेलः ॥ ५०० ॥
सांशग्रहान्तः सकलस्वरश्च ।
स्याच्छुद्धनट्टोऽह्नि तुर्ययामे ॥

नृत्यनिर्णयेः—
ईशानास्याभिजातास्त्रिगतिगनिरिधः सत्रिपूर्णः स धीरो ।
रक्तांगः कंजनेत्रः सिततरवसनः कंठमालादिकाढ्यः ।
पाणौ खड्गः प्रतापी स्मितवचनपरः स्निग्धगंभीरनादः ।
संध्यायां राजमार्गे शरदि हयगती राजते शुद्धनाटः ॥५०१॥

संकीर्णरागाध्यायेः—
पूर्विकामध्यमादिभ्यां युक्तो वागीश्वरो यदि ।
निदानं शुद्धनाटस्य भण्यते भरतादिभिः ५०२ ॥



पारिजातेः—
रिस्तु तीव्रतरो यस्मिन् गांधारस्तीव्रसंज्ञकः ।
धस्तु तीव्रतरः प्रोक्तो निषादस्तीव्रनामकः ॥ ५०३ ॥
अवरोहे धगौ नस्तो नाटे रिस्वरमूर्छना ॥

हृदयप्रकाशेः—
गधैवतनिषादास्तु यत्र तीव्रतराः कृताः ।
तत्र मेले भवेन्मेघः शुद्धनाटविलावलौ ॥
ऋषभादिश्च संपूर्णोऽवरोहे धगवर्जितः ।
निमांशस्वरयोः कंपी शुद्धनाट उदाहृतः ॥

---

## अथ वर्णनाटः ।

रागविबोधेः—
पूर्णोऽथ वर्णनाटः सांशन्यासग्रहो निशागेयः ॥

रत्नाकरेः—
संकीर्णा सग्रहा माता गवन्ही पंचमोज्झिता ।
सायाह्ने गीयते नट्टा भाषा वेसरषाडवे ॥ ५०४ ॥

---

## अथ बाह्यषाडवा ।

रत्नाकरेः—
निगयो रिमयोर्युक्ता संपूर्णा बाह्यषाडवा ।
मध्यमांशग्रहन्यासा भाषा वेसरषाडवे ॥ ५०५ ॥

---

## अथ पार्वती ।

रत्नाकरेः—
त्रिभाषा पार्वती पूर्णा सांशा वेसरषाडवे ॥

---

## अथ श्रीकंठी ।

रत्नाकरेः—
निगयो रिधयोर्युक्ता श्रीकंठी सग्रहांतिमा ।
त्रिभाषा पंचमत्यक्ता जाता वेसरषाडवे ॥ ५०६ ॥

## अथ सोमरागः ।

रत्नाकरेः—

षड्जे षाड्जीभवः षड्जग्रहांशांतो निगोत्कटः ।
सोमरागः स्मृतो वीरे तारमध्यस्थमध्यमः ॥

---

### ध्यानम् ।

शातकुंभनिकषोज्वलकृतिः ।
खड्गपाणिररविंदलोचनः ॥
चित्रपीतवसनः सनूपुरः ।
सोमराग इह कांचनांगदः ॥ ५०७ ॥

## अथ सारंगः ।

मंजर्याम्ः—

तृतीयगतिमनिधा द्वितीयगतिकोपि रिः ।
तुरीयगतिको गश्च मेलः सारंगनामकः ॥ ५०८ ॥
सत्रिः सारंगकः पूर्णः सदा गेयः पराह्नतः ।

चन्द्रोदयेः—

शुद्धौ सगौ मध्यमपंचमौ च ।
लघ्वादिकौ षड्जकपंचमौ चेत् ॥
निःकैशिकी चापि यदा तदा स्यात् ।
सारंगकस्याभिहितः स मेलः ॥ ५०९ ॥
सांशग्रहः सांतयुतश्च पूर्णः ।
सारंगकः स्यादपराह्नशोभी ॥

नृत्यनिर्णयेः—

श्यामांगः पीतवासाः प्रबलतरगदाशंखचक्राब्जहस्तः ।
बाणैः शार्ङ्गेण पूर्णः स्फुरदिषुधिकटिस्तार्क्ष्यगो भूषणाढ्यः ॥
गांधारो वेदगः स्युर्गुणगतिमनिधाः पक्षगो रिस्त्रिषड्जः ।
संपूर्णाश्चापराह्णे प्रचरति चतुरो वीरसारंगरागः ॥ ५१० ॥



हृदयप्रकाशेः—

अतितीव्रतमो गाख्यो मधौ तीव्रतरौ कृतौ ।
यत्र निः काकली तत्र, सारंगः सादिमूर्छनः ॥ ५११ ॥

पारिजातेः—

अतितीव्रतमो गः स्यान्मस्तु तीव्रतरो मतः ।
धस्तु तीव्रतरो निः स्यात्तीव्रः षड्जादिमूर्छने ॥ ५१२ ॥
संन्यासे मध्यमांशे च रागे सारंगसंज्ञके ।

रागविबोधेः—

संपूर्णः सारंगः सांशन्यासग्रहोऽपराह्णरुचिः ॥

---

## अथ सामंतः ।

मंजर्याम्ः—

सामंतकस्त्रिसः सायं काकल्यंतरभूषितः ॥

चंद्रोदयेः—

षड्जग्रहन्यासयुतश्च पूर्णः ॥
षड्जांशयुक्तोऽतरकाकलीकः ॥
प्रयुज्यमानः स विभातकाले ।
चकास्ति सामंतकनामधेयः ॥ ५१३ ॥

नृत्यनिर्णयेः—

कर्णाटाख्यस्य मेले प्रकटस्वरतनुः पूर्णरूपस्त्रिषड्जः ।
पद्माभः पद्मनेत्रः श्रवणयुगुलतः कुंडले द्वे दधानः ॥
बिभ्रन्मौलौ किरीटं बहुकुसुममयं कंजमालां सुवस्त्रम् ।
प्रातःकाले चकास्ति प्रबलगमकवान् प्रौढसामंतरागः ॥५१४॥

हृदयप्रकाशेः—

मनित्यागाद्गौडवेषु सामंतः सादिरिष्यते ॥

रागविबोधेः—

सामंतः सायाह्ने सांशन्यासग्रहः पूर्णः ॥

---

## अथ पूर्वी ।

मंजर्याम्ः—

संपूर्णा सत्रिका पूर्वी सायंकाले विराजते ॥

चंद्रोदयेः—

सांशांतिका सग्रहिका च पूर्णा स्यात्पूर्विका सा दिनतुर्ययामे॥

पारिजातेः—

गौरीमेलसमुत्पन्ना षड्जोद्ग्राहसमन्विता ।
न्यासांशगस्वरोपेता पूर्वी सा सुखदायिनी ॥ ५१५ ॥

रागविबोधेः—

पूर्वी पूर्णा सांता गांशा षड्जग्रहा च सायाह्ने ॥

## अथ परजः ।

हृदयप्रकाशेः—

गादिर्धन्युज्झितो रोहे परजो मध्यमांशकः ॥

रागविबोधेः—

परजो न्यल्पो गांशग्रहधगकंप्रः सदा सान्तः ॥

नृत्यनिर्णयेः—

सत्रिः संपूर्णकोऽसौ द्विविधुगतिगनिस्तालहस्तः सुभार्यः ।
पृष्ठे पैनाकपाणिर्बहुविधरचितैर्भूषणैः शोभमानः ॥
गौरो दीर्घस्वरूपी मृदुवचनपरः सर्वलोकोपकारी ।
नित्यं याच्यः सदाहर्निशि च स परजो भाति चाग्रे
नृपाणाम् ॥ ५१६ ॥

---

## अथ पटमंजरी ।

मंजर्याम्ः—

पूर्णा सा सर्वदा पत्री राजते पटमंजरी ॥

चंद्रोदयेः—

पांशग्रहन्यासयुता सदैव ।
मंजर्युपास्या प्रथमादिरेषा ॥



नृत्यनिर्णयेः—

जाता गौडस्य मेले धरिपरिरहिता वादिमध्यांतपा या ।
गौरांगी पीतवस्त्रा मृगमदतिलकं भालमध्ये दधाना ॥
हस्ते वीणैकवाद्या सरसमधुरवाक् मुक्तकेशी कुरंजी ।
प्रीतालंकारयुक्ता प्रथमपदपुरा मंजरी सा सदैव ॥ ५१७ ॥

हृदयप्रकाशेः—

गधत्यागादौडुवेषु षड्जादिः पटमंजरी ॥

---

## अथ देवगांधारः ।

चन्द्रोदयेः—

सांशग्रहः सांतयुतश्च पूर्णः ।
स्यादेवगांधारक एष नित्यम् ॥

नृत्यनिर्णयेः—

गांधारो देवपूर्वस्त्वनलगतिगानिः सत्रिकः पूर्णरूपो ।
नैरंतर्यं चकास्ति प्रथमगतिरिधो रत्नसिंहासनस्थः ॥
इंद्राद्यैः स्तूयमानो रसपतिरसिकश्चंदनालिप्तदेहः ।
शुभ्रं वस्त्रं दधानः करधृतकुमुदः सर्वभूषाभियुक्तः ॥ ५१८ ॥

हृदयप्रकाशेः—

ऋषभादिर्धैवतांशो गांधारः परिकीर्तितः ॥

पारिजातेः—

तदा तु देवगांधारः संपूर्णो भैरवो यदा ।
गांधारादिस्वरोद्ग्राहः सस्वरांशेन शोभितः ॥ ५१९ ॥
स यदा रि-स्वरोद्ग्राहस्तदारोहे ग-वर्जितः ।

रागविबोधेः—

रिग्रहपांशः सांतः सदागनिर्देवगांधारः ॥

---

## अथ गुणक्री ।

मंजर्याम्ः—

संपूर्णा सा गुणक्री स्यात्सायं स्फुरितपंचमा ॥

नृत्यनिर्णये:--

गुर्जर्या मेलजाता स्फुरिततरसया न्यादिमध्यांतपूर्णा ।
वक्षोहारायताक्षी सितततरवसना रक्तकूर्पासिका या ॥
नानाशृंगारभूष्या मृदुमधुवचना श्यामलांगी सुतन्वी ।
भर्तुः संकेतकं सद्विमलगुणकरी कामिनी याति सायम् ॥५२०॥

हृदयप्रकाशे:—

औडुवेषु गधत्यागाद्गण्या गुणकरी बुधैः ॥

पारिजाते:—

रिधकोमलसंयुक्ता गनिवर्जा गुणक्रिया ।
धैवतोद्ग्राहसंयुक्ता क्वचिद्गांधारसंयुता ॥ ५२१ ॥

---

## अथ बहुली ।

मंजर्याम्:—

मत्रिका गनिहीना वा बहुली स्यात्पराह्णतः ॥

चंद्रोदये:--

मांशग्रहांता गनिवर्जिता वा ।
न वा विगेया बहुली पराह्णे ॥

नृत्यनिर्णये:—

रामक्रीमेलजाता निगपरिरहिता वापि माद्यन्तमध्या ।
तन्वंगी श्यामवर्णा विलुलितकबरी सव्यहस्ते सुदंडी ॥
तांबूलास्या प्रगल्भा मरहटवनिता वस्त्रभूषादिकाढ्या ।
नासायां पीनमुक्ता बहुमतिबहुली शोभते पूर्वयामे ॥ ५२२ ॥

हृदयप्रकाशे:—

गादिर्मर्हीना बहुली षाडवा सा निरूप्यते ।

पारिजाते:—

गौरीमेलसमुद्भूता बहुली मध्यमोज्झिता ।
आरोहणे निहीना सा गांधारोद्ग्राहपांशिका ॥ ५२३ ॥

---



## अथ मल्लारः ।

रत्नाकरे:--

आन्धाल्युपाङ्गं मल्लारः षड्जपंचमवर्जितः ।
धन्यासांशग्रहो मन्द्रगांधारस्तारसप्तमः ॥ ५२४ ॥

चन्द्रोदये:—

धांशग्रहो धांतयुतोऽसपश्च ।
मल्लारनामोपसि गीयतेऽसौ ॥

मंजर्याम्:--

धत्रिः सपाभ्यां हीनोऽयं मल्लारोऽप्युपसि प्रियः ॥

रागमालायाम्:--

सावेरीमेलजातः सपपरिरहितो धग्रहन्यासकांशः ।
श्यामः पीतांबरो यो मदनपरिचितः कंठमालादिकाढ्यः ॥
विद्युन्मेघादिगर्जैरुदितशिखिगणान्नर्तयन् कीर्णपक्षान् ।
वारामीजन्ममित्रो ह्युपसि मलहरो भाति मल्लाररागः ॥५२५॥

पारिजाते:--

गौरीमेलसमुत्पन्नः मल्लारो निस्वरोज्झितः ।
आरोहणे गहीनः स्यात् षड्जादिस्वरसंभवः ॥ ५२६ ॥

रागविबोधे:--

मल्लारिनेद्युगपि स धांशांतादिरगनिश्च संगवभाः ।

हृदयप्रकाशे:—

गनिहीनस्तु मल्लारः सादिरौडुव ईरितः ॥

दर्पणे:--

मल्लारी सपहीना स्याद्ग्रहांशन्यासधैवता ।
अथवा पौरवी ज्ञेया वर्षासु सुखदा सदा ॥ ५२७ ॥

---

### ध्यानम्

गौरी कृशा कोकिलकंठनादा ।
गीतच्छलेनात्मपतिं स्मरन्ती ॥
आदाय वीणां मलिना रुदन्ती ।
मल्लारिका यौवनदूनचित्ता ॥

## अथ कल्याणः ।

**मंजर्याम्:—**

मनी तृतीयगतिकौ द्वितीयगतिकोऽपि रिः ।
एकैकगतिगांधार एष कल्याणमेलकः ॥ ५२८ ॥
सत्रिः संपूर्णः कल्याणः सायंकाले महारुचिः ।

**चंद्रोदये:--**

शुधौ सगौ शुद्धपधौ तथैव ।
लघ्वादिकौ षड्जकपंचमौ च ॥
साधारणो गोऽपि यदा भवेयुः ।
कल्याणकस्याभिहितः स मेलः ॥ ५२९ ॥
सांशग्रहः सांतयुतश्च पूर्णः ।
कल्याणनामोदयमेति सायम् ॥

**नृत्यनिर्णये:--**

सत्रिः पूर्णो द्विनेत्राश्रियमरिगमनी राजवृंदैः समेता ।
गौरस्तांबूलवक्त्रः सिततरवसनः कंठरत्नैकमालः ॥
कंजाक्षः छत्रमूर्ध्नोभयचमरयुतो रत्नसिंहासनस्थः ।
कल्याणोयम्मनाग्रः परिजनसहितो राजतेऽसौ दिनांते ॥५३०॥

**संकीर्णरागाध्याये:--**

कल्याणेन यदायुक्तः केदारो वा विलावलः ।
निगदंतीमनं रागमुद्रिरंति मनीषिणः ॥ ५३१ ॥

**हृदयप्रकाशे:—**

गमध्यमनिषादास्तु यत्र तीव्रतराः कृताः ।
तत्र ईमनः संपूर्णः सायंकाले विराजते ॥ ५३२ ॥

---

## अथ पूरिया ।

पूरिया मध्यमादि स्यात्संपूर्णः कंपशोभितः ॥

---



## अथ जयत्कल्याणः ।

गांधारादिस्तु संपूर्णो जयत्कल्याण इष्यते ॥

---

## अथ शुद्धकल्याणः ।

मानिहीनः शुद्धपूर्वकल्याणः कथितो बुधैः ॥

**पारिजाते:—**

कल्याणमेलसंभूतोऽवरोहे धगवर्जितः ।
षड्जादिमूर्छनोपेतो रागः कल्याणनाटकः ॥ ५३३ ॥

---

## अथ हंमीरः ।

**मंजर्याम्:—**

द्वितीयगतिको रिश्च तृतीयगतिकौ निगौ ।
हंमीरमेल एषः स्याद्धंमीराद्या ह्यनेकशः ॥ ५३४ ॥
सत्रिस्तृतीययामे च हंमीरः पूर्ण ईरितः ॥

**चंद्रोदये:—**

शुधौ सगौ मध्यमपंचमौ च ।
शुद्धस्तथा धैवतको यदि स्यात् ॥
लघ्वादिकौ षड्जकमध्यमौ चेत् ।
हंमीरनट्टाव्हयकस्य मेलः ॥ ५३५ ॥
सांशग्रहांतोऽह्नि तुर्ययामे ।
पूर्णो भवेन्नट्टहमीरपूर्वः ॥

**नृत्यनिर्णये:--**

संपूर्णो द्विगती रिस्त्वनलगतिनिगः सग्रहन्यासकांशः ।
शृंगारी यौवनाढ्यः स्मितपरवदनः कंदुसद्दण्डहस्तः ॥
गौरस्तांबूलवक्त्रः कुसुमशरसुहृद्रक्तवस्त्रः प्रतापी ।
चेतः सीमंतिनीनामनुसरति हंमीरादिनाटो हि सायम् ॥५३६॥

हृदयप्रकाशेः--

रिगांशो गादिकः पूर्णो हंमीरः परिकीर्तितः ॥

## अथ श्यामनाटः ।

श्यामनाटस्तु केदारमेले गेयो मनीषिभिः ॥

हृदयप्रकाशेः--

गादिपूर्णश्च मन्यासः पमांशः श्यामनाटकः ॥

## अथ कोकिलः ।

पारिजातेः--

कल्याणमेलसंभूतो रागः कोकिलसंज्ञकः ।
सर्वदा मनिहीनः स्याद्गांधारादिकमूर्छनः ॥ ५३७ ॥

## अथ ऐरावतः ।

पारिजातेः--

कल्याणमेलसंभूतो धहीनः पंचमोज्झितः ।
ऐरावतो गपूर्वोक्तो न्यासषड्जविभूषितः ॥ ५३८ ॥

## अथ बंगालः ।

रत्नाकरेः--

षड्जग्रामे मंद्रहीनः षड्जमध्यमया कृतः ।
बंगालोंऽशग्रहन्यासषड्जस्तुल्याखिलस्वरः ॥ ५३९ ॥

मंजर्याम्--

सदाकालः सत्रिकश्च बंगालः सकलस्वरः ॥

चंद्रोदयेः--

सांशग्रहान्तः सकलस्वरश्च ।
सदैव बंगालकनामधेयः ॥



## ध्यानम् ।

कक्षानिवेशितकरंडधरस्तपस्वी ।
भास्वत्त्रिशूलपरिमंडितवामहस्तः ।
भस्मोज्वलो निविडबद्धजटाकलापो ।
बंगाल इत्यभिहितस्तरुणार्कवर्णः ॥ ५४० ॥

## अथ द्वितीयबंगालः ।

रत्नाकरेः—

मध्यमे कैशिकीजातः षड्जन्यासांशकग्रहः ।
बंगालस्तारमध्यस्थपंचमः स्यात्सगस्वरः ॥ ५४१ ॥

नृत्यनिर्णयेः--

जातः कर्णाटमेले स्वरसकलयुतो सत्रिकः पूर्णकायः ।
शुभ्रांगः पीतवासा मणिगणरचिते कुंडले कर्णयोः स्तः ॥
आस्ते मौलौ किरीटं करतलकमलः कुंकुमालिप्तदेहः ।
प्रातर्गाच्यः प्रमत्तो युवजनसहितः शुद्धबंगालकोऽसौ ॥५४२॥

## अथ मध्यमषाडवः ।

रत्नाकरेः--

ऋषभांशः पंचमांतः स्यादपन्यासधैवतः ।
वीररौद्राद्भुतरसः पाल्पो मध्यमषाडवः ॥ ५४३ ॥

## ध्यानम् ।

शूरः खड्गं दधतसव्ये करे वामे सुचर्मकम् ।
× × × षाडवो मध्यमादिकः ॥

पारिजाते:--

बंगालो रिधहीनः स्यान्मतीव्रतरसंयुतः ।
नितीव्रेणापि संयुक्तः सस्वरोत्थितमूर्छनः ॥ ५४४ ॥

---

## अथ सालंगनाटः ।

पारिजाते:--

शंकराभरणोत्पन्ने गांधारस्वरवर्जिते ।
अथ सालंगनाटेऽस्मिन्संन्यासांशग्रहान्विते ॥ ५४५ ॥
षड्जोद्ग्राहेण संपन्ने मधावाम्रेडितौ स्मृतौ ।

---

## अथ मारुः ।

पारिजाते:--

शुद्धस्वरसमुद्भूतो गांधारोद्ग्राह संयुतः ।
आरोहे त्यक्तधो ज्ञेयो गांधारच्यवितोदितः ॥ ५४६ ॥
अग्रस्वस्थानसंयुक्तः पुनःस्वस्थानसंयुतः ।
आंदोलितनिषादाद्यो मारुर्धांदोलितो मुहुः ॥ ५४७ ॥

---

## अथ कुमुदः ।

पारिजाते:--

नाटमेलसमुद्भूतो रागः कुमुदसंज्ञकः ।
आरोहणे मवर्ज्योक्तो गांधारोद्ग्राहसंयुतः ॥ ५४८ ॥

---

## अथ मेघनादः ।

पारिजाते:--

रिणा युक्तः कोमलेन मेघनादस्तु षाडवः ।
सस्वरादिस्वरारब्धो मवर्ज्योऽपि रिगांशकः ॥ ५४९ ॥

---



## अथ नारायणी ।

पारिजाते:--

नारायण्यां गनीतीव्रौ गांधारादिकमूर्छना ।
आरोहे मनिवर्ज्या स्यान्न्यासांशधैवता स्मृता ॥ ५५० ॥

---

## अथ पहाडी ।

पारिजाते:--

गौर्युत्पन्ना पहाडी स्यादवरोहे गवर्जिता ।
उद्ग्राहे षड्जसंपन्ना न्यासांशयो रिशोभिता ॥ ५५१ ॥

---

## अथ घंटारागः ।

पारिजाते:--

घंटारागो गपूर्वः स्यान्न्यन्तः कोमलधैवतः ।

---

## अथ दीपकः ।

पारिजाते:--

दीपको मालवोत्पन्नो मन्यारोहेऽत्र वर्जितौ ।
गांधारोद्ग्राहसंयुक्तः सन्यासांशसुशोभितः ॥ ५५२ ॥

---

## अथ चक्रधरः ।

पारिजाते:--

नाटमेलसमुद्भूतो रागश्चक्रधरः स्मृतः ।
पंचमेन विहीनः स्यात् षड्जोद्ग्राहेण शोभितः ॥ ५५३ ॥

---

## अथ सिंहरवः ।

पारिजातेः--

भैरवीमेलसंभूतो गांधारेण विवर्जितः ।
आरोहे तु निवर्ज्यः स्यान्मादिः सिंहरवः स्मृतः ॥ ५५४ ॥

---

## अथ मंजुघोषा ।

पारिजातेः--

श्रीरागमेलसंभूता गस्वरेण विवर्जिता ।
मंजुघोषा धपूर्वा स्यादारोहे त्यक्तनिस्वरा ॥ ५५५ ॥

---

## अथ शिववल्लभा ।

पारिजातेः--

मुखारीमेलसंभूता महीना शिववल्लभा ।
न्यभावोद्ग्राहगांधारा पांशन्याससुशोभिता ॥ ५५६ ॥

---

## अथ सौदामिनी ।

पारिजातेः--

रिधौ च कोमलौ ख्यातावतितीव्रतमश्च गः ।
मश्च तीव्रतरो यत्र निषादस्तीव्रसंज्ञकः ॥ ५५७ ॥
सौदामिन्यां तु गांधारस्वरोद्ग्राहः सतां मतः ॥

---

## अथ वैजयंती ।

पारिजातेः--

षट्श्रुतिर्मध्यमो यत्र धैवतः कोमलो भवेत् ।
निषादस्तीव्रनामोऽस्यां वैजयंती रिपूर्विका ॥ ५५८ ॥
आरोहणेऽवरोहे च कादाचित्कौ धगौ मतौ ॥

---



## अथ हंसः ।

पारिजातेः--

गनिभ्यां वर्जितो हंसो रिधकोमलसंयुतः ॥

---

इति संगीतरायभावभट्टविरचिते अनूपसंगीतविलासे
स्वराध्यायः समाप्तः ।

---

इति श्रीमद्राठोडकुलदिनकरमहाराजश्रीकर्णसिंहात्मजजयश्रीवि-
राजमानचतुःसमुद्रमुद्रावच्छिन्नमेदिनीप्रतिपालनचतुरवदान्यता-
तिशयनिर्जितचिंतामाणि स्वप्रतापतापितारिवर्गधर्मावतारश्री-
महाराजाधिराजश्रीमदनूपसिंहप्रमोदितश्रीमहीमहेंद्रमौलि-
मुकुटरत्नकिरणनीराजितचरणकमलश्रीसाहिजहांसभा-
मंडनसंगीतराजजनार्दनभट्टांगजानुष्टपचक्रवर्तिसंगीत
राजभावभट्टविरचितः श्रीमदनूपसंगीतविलास-
ग्रंथः समाप्तः ।

श्रीः कल्याणमस्तु ।

समाप्तः।

DEPARTMENTAL LIBRARIES
UNIVERSITY OF MADRAS.

# अनूपसंगीतविलासग्रंथगतरागसूची।

राग: पृष्ठं


**अ**

अडाना: १४०
अपस्थानवराटी १४५
अर्जुन: १२९
अर्धवेसरी १२६
अलाहियाबिलावल: १५१

**आ**

आडीकामोदी ११७
आंध्री १६१
आनंदभैरव ११६
आभीरी १२७। १२९।१४८।१६१
आसावरी १४९

**ई**

ईमन: १७५

**ऐ**

ऐरावत: १७८

**क**

ककुभ: १४६
कच्छेली ११९
कल्याण: १७६
कल्याणवराटी १४६
कांबोजी १२७
कांभोजी १४७।१५२
कामोद: ११७
कालिंदी १२१
कुडाई १४१
कुमुद: १८०

राग: पृष्ठं

केदार: १५२
कैशिकी १६१
कोकिल: १७८
कोल्हाह्लास: १६२
कौंतलीवराटी १४४
कौशाली १४३

**ख**

खंजिनी १२६
खंबावती १६२
खंभावतीवेलावली १५१

**ग**

गांधारपंचम: १३७
गांधारभैरव:११६
गांधारवल्ली ११९
गांधारी १२१।१३६।१:४
गुणकी १७३
गुर्जरिका १२२
गुर्जरी १२६।१६१
गौडसारंग: १५४
गौडी १५९
गौरी १५९

**घ**

घंटाराग: १८१

**च**

चक्रधर: १८१
चतुर्थसैंधवी १३५
चूतमंजरी १५७

रागः पृष्ठं

छ

छायातोडी १३१
छायानाटः १३९
छायानट्टा १५८
छायावेलावली १५१
छेवाटी १५८

ज

जयत्कल्याणः १७६
जयश्रीः १६५

ट

टक्ककैशिकः १३९

त

तानोद्रवा १६१
तुंबुरा १२०
तोडी १३०
तोडीवराटी १४५
तौरुष्कतोडी १३१
तृतीयसैंधवी १३४
त्रवणा १३५
त्रवणोद्भवा १३६
त्रावणी १६२

द

दाक्षिणागुर्जरी १२४
दाक्षिणात्या १२०।१६०
दीपकः १५९ १८१
देवगांधारः १७३
देवारवर्धिनी १२२।१२७
देशाक्षी १३८
देशाख्या १३७
देशिकारः १६४
द्राविडगुर्जरी १२५
द्राविडीवराटी १२६।१४४

रागः पृष्ठं

द्वितीयकामोदः ११७
द्वितीयबंगालः १७९
द्वितीयसैंधवी १३४

ध

धैवतभूषिता १४३

न

नटनारायणः १५६
नट्टा १५८
नंदभैरवः ११६
नागवराटी १४६
नारायणगौडः १५६
नारायणी १५२।१८१
निषादिनी १२०
नीलांबरी १६३

प

पटमंजरी १७२
परजः १७२
पहाडी १२९ १८१
पंचमभैरवः ११६
पंचमषाडवः १२२
पार्वती १६९
पिंजरी १५८
पुलिंदी १२०
पुन्नागवराटी १४५
पूरिया १७६
पूर्वी १७२
पौराली १२१।१२६
प्रतापवराटी १४५ १४६
प्रतापवेलावली १५१
प्रथमसैंधवी १३४
प्रसभः १६२



रागः पृष्ठं

ब

बल्लातिका १५९
बहुली १७४
बंगालः १७८
बंगाली ११७
बाह्यषाडवा १६९
बांगाली १२५

भ

भंमाणी १६२
भावनी १६१
भिन्नपंचमः १४२
भिन्नपौराली १५७
भिन्नषड्जः १११
भूंछिकवेलावली १५०
भूपाली १५३
भैरवः ११३
भैरवी ११७
भोगवर्धिनी १४८

म

मधुकरी १४८
मधुरी १४७।१५७
मध्यमग्रामी १४७
मध्यमषाडवः १४७।१७९
मध्यमा १२०
मल्लारः १७५
महाराष्ट्रगुर्जरी १२४
मंजुघोषा १८२
मांगली १२६।१६१
मारुः १८०
मालवकौशिकः १२५
मालवरूपा १२७
मालवश्रीः १२७

रागः पृष्ठं

मालवी १२१
मालववेसरी १२३।१५८
मुखारी १२८
मेघः १६७
मेघनादः १८०

र

रक्तगांधारी १३६
रक्तहंसः १६२
रगंती १४७

ल

ललिता ११९।१३३

व

वराटी १४३।१४८
वर्णनाटः १६९
वसंतः १६३
वसंतभैरवः ११६
विभासः १६४
विहंगडः १५४
विशाला १४३
वेगमध्यमा १४१
वेलावली १५०
वेसरी १५७
वैजयंती १८२

श

शक्रामिश्रा १४८
शंकराभरणः १५५
शालवाहिनी १४८
शिववल्लभा १८२
शुद्धकल्याणः १७६
शुद्धनाटः १६८
शुद्धपंचमः १६०
शुद्धभिन्ना १४३

रागः पृष्ठं

शुद्धवराटी १४५
शुद्धवराटिका १४२
शुद्धा १२०।१२६
श्यामनाटः १७८
श्रीः १६६
श्रीकंठी १२१।१६९

ष

षड्जभाषा १२०
षड्जमध्यमः १५७
षाडवः १३०

स

साधारिता १४२
सामंतः १७१
सारंगः १७०
सालंगनाटः १८०
सावेरी १५१
सिंहरवः १८२
सिंहलीकामोदा ११७

रागः पृष्ठं

सुरालयः १२९
सुहवी १५४
सैंधवीवराटी १४५
सोमरागः १७०
सौदामिनी १८२
सौराष्ट्रगुर्जरी १२४
सौराष्ट्री १३३।१६२
सौवीरः १४१
सौवीरजागांधारी १४१
सौवीरी १४१
स्वर्णाकर्षणभैरवः ११६
स्वरवल्लिका ११९

ह

हतस्वरावराटी १४५
हंमीरः १७७
सः १८३
हिंजेजः ११५
हिंदोलः १५६


॥ श्रीः ॥

संगीतराजभावभट्टविरचितः

# अनूपसंगीतरत्नाकरः ।

अयं ग्रंथः

पुण्यपत्तनस्थपंडितदत्तात्रेयकेशवजोशीत्यभिधेन
यथामति संशोधितः ।

स च

## भालचन्द्रशर्मणा


आर्यभूषणाख्यमुद्रालये मुद्राक्षरैरंकयित्वा
प्राकाश्यं नीतः ।

शकः १८४१ सन १९१९


( सर्वेऽधिकाराः स्वायत्तीकृताः )